ISSN 2250-1711

॥ सत्यं ज्ञानमनन्तम् ॥

# JOURNAL OF VEDA SAMSKRITA ACADEMY

Recognised in the UGC-CARE List

**A NATIONAL PEER-REVIEWED RESEARCH JOURNAL**

## विश्वविद्यालय-अनुदान-आयोगेन केर सूच्यां मानिता

## मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका

**VOLUME: XVIII**
**July to December - 2021**

Editor in Chief

**DR. GOPALKRISHNA HEGDE**
[Jyotishashastra-Dharmashastra Vidwan]

**VEDA SAMSKRITA ACADEMY (R.)**
[Formerly: Veda Samskrita Prasarinee Sabha]
[No.: DR : SOR : 108 : 2003-04 Dated : 30-10-2003]

| | | |
|---|---|---|
| Title of the Journal | : | **Journal of Veda Samskrita Academy**<br>A National Peer-Reviewed<br>Research Journal<br>मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका |
| **ISSN** | : | **2250-1711** |



| | | |
|---|---|---|
| Editor & Publisher | : | **Dr. Gopalkrishna Hegde**<br>gopalkrishnh9@gmail.com<br>09741847399<br>Director,<br>Veda Samskrita Academy (Regd.)<br>Kalkod Road, HEGDE- 581330<br>Kumta, Uttara Kannada, Karnataka |
| web site | : | www.vedasamskritaacademy.org |
| E-mail | : | vedasmkac@gmail.com |


All rights are Reserved with the Publisher

" All opinion / views expressed in the research papers are of the authors only, no way they are ascribed to the Academy"


| | | |
|---|---|---|
| Languages | : | Samskrita, Kannada, English,Hindi |
| Imprint | : | Volume XVIII<br>July to December – 2021 |
| Paper | : | 70gsm (B2B) and Art paper – 300gsm |
| Size of the Journal | : | 21 X 14 cm |
| Number of Pages | : | 200 + 16 + 4 (colour page) |
| Number of Copies | : | 150 |
| D. T. P. | : | Pavan Graphics, Hegde |
| Art works | : | Girish R. Bhat, Digital World |
| Printing & Binding | : | Shri Krishna Mudranalaya, Hegde |

**Price : Rs. 300 /- per volume**

# विषयसूची
## CONTENTS


| | | |
|---|---|---|
| | प्राक् कथनम् | V |
| | Prologue | VI |
| | ಮೊದಲಮಾತು | VII |
| | Editorial Advisory Board | IX |
| 1. | इन्द्रियविमर्शः<br>–डा. भास्कर भट्टः जोशि (बेङ्गळूरु) | 1-5 |
| 2. | स्कन्धत्रयोपेतं ज्योतिषम्<br>–डा. कुमारसुब्रह्मण्य भट्टः ए. (मङ्गळूरु) | 6-10 |
| 3. | अलङ्कारस्य काव्यशास्त्रीयसमीक्षा तस्य सन्निवेशश्च<br>–रमेशचन्द्र बरमोला (मुम्बई) | 11-12 |
| 4. | हस्तलेखशास्त्रपरिचयः<br>–डा. रामकृष्ण भट्टः के. (बेङ्गळूरु) | 13-15 |
| 5. | क्रियायाः स्वरूपविमर्शः<br>–डा. पि.आर्. अर्चना कारन्त (बेङ्गळूरु) | 16-20 |
| 6. | 'कुरु भुङ्क्ष्व' तत्ववाद–भगवद्गीतयोः कर्मजिज्ञासा<br>–डा. गौतम आर्. (मणिपाल) | 21-26 |
| 7. | पुराणानि प्रति श्रीमध्वाचार्यस्य योगदानम्<br>–डा. एस्. आनन्दतीर्थः (मणिपाल) | 27-30 |
| 8. | व्याप्तिस्वरूपे साध्याभावाधिकरणवृत्तित्वसामान्याभावविचारः<br>–डा. वि. वि. एस्. आर्. लक्ष्मीः (बेङ्गळूरु) | 31-34 |
| 9. | द्वितीयहेत्वाभाससामान्यलक्षणानुगमपरिष्काराः<br>–डा. के.ई.श्रीवेङ्कटनाथन् (बेङ्गळूरु) | 35-38 |
| 10. | अवधानकलाङ्गभूतायाः निषिद्धाक्षर्याः समग्रं समीक्षणम्<br>–डा. रामकृष्ण पेजित्ताय ( एर्नाकुलम्) | 39-44 |
| 11. | योगदर्शने ईश्वरप्रणिधानोपायेषु शतरुद्रीयस्य प्राशस्त्यम्<br>–विद्वान् वेङ्कट बथुल (बेङ्गळूरु) | 45-49 |
| 12. | अद्वैताधुनिकमतानुरोधेन चैतन्यचिन्तनम्<br>–डा. आर्. सुरेश (मैसूरु) | 50-54 |
| 13. | मार्तण्डसोमयाजिग्रन्थोक्त–षोडशसंस्काराः<br>–विद्वान् राजराजेश्वर एन्. जोशि (मैसूरु) | 55-59 |
| 14. | ईशावास्य–केनोपनिषदोः सामान्यपरिचयः<br>–डा. सञ्जिब सरकार (मुम्बई) | 60-62 |
| 15. | अप्रतीकालम्बनाधिकरणस्य रत्नप्रभाद्यनुसारेण विमर्शः<br>–कार्तिक शर्मा के. (एर्नाकुलम्) | 63-66 |
| 16. | संस्कृतसाहित्ये अलङ्कारस्य स्थानम्<br>–डा. भीमानायक एस्. (बेङ्गळूरु) | 67-68 |
| 17. | यङ् लुक् विचारः<br>–आर् श्रीनिवासन् (चेन्नै) | 69-70 |
| 18. | पिण्डोत्पत्तिप्रकरणम्<br>–डा. सिद्दप्प बि. करेप्पगोळ (बेङ्गळूरु) | 71-73 |
| 19. | वेदबोधकं रामायणम्<br>–एस्. बृहदा प्रसन्ना (तिरचिरपल्लि) | 74-76 |

| | | |
|---|---|---|
| 20. | भासनाटके नवरसाः<br>–वाय्. षण्मुग प्रियदर्शिनि (चेन्नै) | 77-79 |
| 21. | भारतीयज्ञानपरम्परायां लौकिकविज्ञानविचाराः<br>–गणेश भट्टः (हरियाणा) | 80-84 |
| 22. | अभिधामूलका व्यञ्जना<br>–डा. रेखादेवि एस्. एच्. (बेङ्गळूरु) | 85-89 |
| 23. | श्रुतिप्रत्यक्षयोः विरोधपरिहारविचारः<br>–डा. गणपति वि. हेगडे (मुम्बई) | 90-92 |
| 24. | तात्पर्यार्थवादः<br>–डा. मनमोहन तिवरी (प्रयागराज) | 93-95 |
| 25. | राजनीतिषु राजगुणदोषाणां महत्वचिन्तनम्<br>–डा. वेङ्कटरमण हेगडे (मैसूरु) | 96-101 |
| 26. | Satyavati, Kunti and Draupadi, exhibiting the real constituent and paved the way for many female writers with reference to Shobhaa De<br>-Dr. Sapna G. S. (Bengaluru) | 102-105 |
| 27. | The relevance of Ancient wisdom in Sanskrit literature to Modern Science and Management<br>-Dr. Rama Rao .S. (Bengaluru) | 106-110 |
| 28. | Vedic literature on the evolution of human values and meditative ideas<br>-Dr. Somnath Das (Kolkata) | 111-113 |
| 29. | Mahabharata as A Management Guide For Millennials – A Descriptive Study<br>-KAVITHA.G (Bengaluru) | 114-116 |
| 30. | Reinterpretation of myth and magic realism in the select novels of Shashi Deshpande's<br>-T.Vijaya (P.Velur, Salem, Tamilnadu) | 117-118 |
| 31. | Structure of Anumana Pramana in INDIAN PHILOSOPHY schools of thoughts PRAMANAS<br>-Dr Anupama B (Bengaluru) | 119-121 |
| 32. | The relevance of Vedic culture to modern social thought<br>-Prabir Sarkar (Kolkata) | 122-125 |
| 33. | Sustenance Of Indian Culture, Values And Ethics In Contemporary World And Its Contribution To Today's Education<br>-Dr. Chitra Shashidhar (Bengaluru) | 126-128 |
| 34. | Ayurveda: The Philosophy of Medical Science in Ancient India<br>-Dr. Nasiruddin Mondal (West Bengal) | 129-133 |
| 35. | Usage of Interactive White Boards in Education<br>-Dr. Manjunath H. P. (Shivamogga) | 134-136 |
| 36. | Vikram Seth's 'A Suitable Boy' reflects Multi-Cenerational Tale of family, condition and politicsin post-Independence India<br>-J. Ambika (Salem, Tamilnadu) | 137-139 |
| 37. | Nature-worship in Parjanyasūkta of Rigvedā and Oraon Community<br>-Kajal Oraon (JNU, Naw Delhi) | 140-143 |
| 38. | Shakuntala as an Indian Feminist Foremother<br>-Sreelekshmi J. (Erode, Tamil Nadu) | 144-147 |
| 39. | Epistemology of Sukha in the Nyāya School of Indian Philosophy<br>-Shruti Krishna Bhat (BHU, Varanasi) | 148-150 |
| 40. | ಆಯುರ್ವೇದದ ಮಹತ್ವ ಮತ್ತು ಚಿಂತನೆ<br>–ಡಾ. ಜಯರೇವಣ್ಣ ಎಂ. ವಿ. (ಬೆಂಗಳೂರು) | 151-153 |
| 41. | ಕಲ್ಯಾಣ ಚಾಳುಕ್ಯರ ಕಾಲದ ಶೈವ ದೇವಾಲಯಗಳಿಗೆ 'ಪೆರ್ಜ್ಜುಂಕ' ಮತ್ತು 'ವಡ್ಡರಾವುಳ ಸುಂಕ' ದಾನಗಳು :<br>ಒಂದು ಸಂಖ್ಯಾಶಾಸ್ತ್ರೀಯ ಅಧ್ಯಯನ<br>–ಭರತ್ ಎ. ಸಿ. (ಮಂಗಳೂರು) | 154-158 |

| | | |
|---|---|---|
| 42. | ಬಳ್ಳಾರಿ ತಾಲ್ಲೂಕಿನ ಶಾಸನೋಕ್ತ ಶೈವ ಮತ್ತು ವೈಷ್ಣವ ಮಠಗಳು<br>–ರಾಘವೇಂದ್ರ. ಎಸ್ (ಮಂಗಳೂರು) | 159-161 |
| 43. | ಕನ್ನಡ ಸಾಹಿತ್ಯ : 'ಕೊಟ್ಟ ಮಾತು ತಪ್ಪದ' ಪ್ರಸಂಗಗಳ ವಿವೇಚನೆ<br>–ಡಾ. ಗಿರೀಶ್ ಮೂಗ್ತಿಹಳ್ಳಿ (ಚಿಕ್ಕಮಗಳೂರು) | 162-165 |
| 44. | ಜನಪದ ಸಾಹಿತ್ಯದಲ್ಲಿ ಶಿಕ್ಷಣ<br>–ಡಾ. ನಂದ ಟಿ. ಎನ್. (ಮೈಸೂರು) | 166-167 |
| 45. | ನಾಟ್ಯಶಾಸ್ತ್ರದ ಕೆಲವು ಗ್ರಹಿಕೆಗಳು<br>–ಡಾ. ಚನ್ನಬಸವಸ್ವಾಮಿ ಹಿರೇಮಠ ಹೆಚ್. ಎಂ. (ಮೈಸೂರು) | 168-172 |
| 46. | ತಬ್ಬಲಿಯು ನೀನಾದೆ ಮಗನೆ : ಸಂಸ್ಕೃತಿಯು ರೂಪಿಸುವ ಸಾಮಾಜಿಕ ಸಂಬಂಧಗಳ ಸ್ವರೂಪ<br>–ಮೈತ್ರಿ ಭಟ್ (ಪುತ್ತೂರು) | 173-177 |
| 47. | ಶಿವತತ್ತ್ವರತ್ನಾಕರದಲ್ಲಿನ ದರ್ಶನಗಳ ವೈಭವ<br>–ನಂಜನಾಯಕ. ಸಿ. ಜಿ. (ಶಿವಮೊಗ್ಗ) | 178-179 |
| 48. | ಶಿವತತ್ತ್ವರತ್ನಾಕರದಲ್ಲಿನ ಆಯುರ್ವೇದಶಾಸ್ತ್ರದ ವಿಶ್ಲೇಷಣಾತ್ಮಕ ಅಧ್ಯಯನ<br>–ಸುನೀತಾ ಎಮ್. ಆರ್. (ಶಿವಮೊಗ್ಗ) | 180-183 |
| 49. | ಕಾಳಿದಾಸನ ರಘುವಂಶ ಮಹಾಕಾವ್ಯದಲ್ಲಿನ ಸಾಮಾಜಿಕ ಮೌಲ್ಯಗಳು – ಒಂದನೇ ಸರ್ಗ<br>–ವಿದ್ವಾನ್ ಡಾ. ಪ್ರಭುಸ್ವಾಮಿ ಎಸ್. (ಬೆಂಗಳೂರು) | 184-186 |
| 50. | ಗೋತ್ರ–ಸೂತ್ರ ಶಬ್ದಾರ್ಥ ನಿರ್ಣಯ ಮತ್ತು ವೀರಶೈವಸಂಪ್ರದಾಯ<br>–ವಿದ್ವಾನ್, ಡಾ. ಕೆ.ಎಮ್. ಮಹದೇವಯ್ಯ (ಮೈಸೂರು) | 187-191 |
| 51. | मुण्डकोपनिषद् में प्रतिपादित मोक्ष<br>–कृष्णकान्त सरकार (दिल्ली) | 192-195 |
| 52. | भरतोक्त षट् त्रिंशत् काव्यलक्षण की वैदिक पृष्ठभूमि<br>–आशुतोष कुमार (दिल्ली) | 196-198 |
| 53. | सकारात्मक सोच : सफलता की कुन्जी<br>–बीना नेगी चौधरी (उत्तराखण्ड) | 199-200 |


***********

# प्राक्कथनम्

सप्रमोदं सविनयं सगर्वं च निवेद्यते यत्- नवभ्यः वर्षेभ्यः प्राक् **"जर्नल् आफ् वेद संस्कृत अकाडेमि"** (Journal of Veda Samskrita Academy) नाम्ना समारब्धेयं संशोधनपत्रिका भगवतः पशुपतेः अनुग्रहेण सोपानक्रमेण पूर्वसङ्कल्पं निर्दिष्टं लक्ष्यं च आसादितवतीति । संशोधनपत्रिकेयं षण्मासिकक्रममनुवर्तमाना प्रतिवर्षं द्विवारं स्वतनूं प्रकटीचकार इत्यत्र सम्पादकसमितेः सदस्यानां, लेखनप्रदातृणां सहयोगेन सारस्वतलोक उपकृत इति तान् नितराम् अभिवन्दामहे वयम् ।

अपि च सम्पादकसमितिसदस्येषु अन्यतमं **डा. जि. एल्. हेगडे** महोदयं सम्प्रति कर्णाटक सर्वकारः **"कर्णाटकयक्षगान-अकाडेमि"** इत्याख्यस्य आध्यक्ष्ये पदे न्ययूयुजत् । तेभ्यः वेद संस्कृत अकाडेमि परतया गौरवप्रदानं तेषां गृहगमनपूर्वकं कृतमिति आत्मनः धन्यतामनुभवामः ।

अन्यच्च मध्यप्रदेशस्य उज्जयिन्यां वर्तमानस्य **"महर्षि सान्दीपनी वेद विद्या प्रतिष्ठान"**स्य मन्त्रिपदं (कार्यदर्शी) अधितिष्ठन्, अस्याः पत्रिकायाः संस्थापकसदस्येष्वन्यतमः तत्रैव प्रतिष्ठाने स्वकर्मभूमौ सप्तदशीं संशोधन- पत्रिकां लोकाय समर्पयत् यस्य संशोधनकर्मणि अप्रतिहता गतिः, यश्च प्रारम्भात् मार्गदर्शकः; तस्मै **प्रो. विरूपाक्ष वि. जड्डीपाल्** महोदयाय नितान्तं सप्रश्रयं अभिवन्दनानि ।

इदमपि प्रमोदस्य परं निदानं यत्- वयसा स्वरूपेण च नवत्वं गतायाः अस्याः संशोधनपत्रिकायाः स्थितिगतिपर्यालोचनेन **विश्वविद्यालय-अनुदान-आयोगस्य "केर" पट्टिकायां (CARE List)** परिगणनम-भवदिति । पुस्तक- प्रकटनात् पूर्वं संशोधनलेखनानां परिशीलनं, दोषापाकरणं च सुतरामपेक्षितम् । तस्मिन् कर्मणि उडुपीस्थाः, निवृत्तप्रांशुपालाः, श्रीमन्तः **प्रो. एन्. लक्ष्मीनारायण भट्ट**वर्याः, शिरसिनिवासिनः निवृत्तप्रांशुपालाः **प्रो. रामचन्द्र भट्ट**वर्याः स्वर्णवल्ली संस्कृत महापाठशालायां अद्वैतवेदान्तप्राध्यापकाः **प्रो. शङ्कर भट्ट**वर्याः, तिरुपतिस्थकेन्द्रीयसंस्कृत विश्वविद्यालयस्य द्वैतवेदान्तप्राचार्याः **डा. नारायण आचार्य**वर्याः, बेङ्गलूरु महानगरे शेषाद्रिपुरस्थ महाविद्यालये आंग्लविभागाध्यक्षाः **डा. सप्ना जि.एस्.** महाभागाः, कुमटास्थ महाविद्यालये निवृत्तप्राध्यापकाः **डा. जि. एल्. हेगडे**वर्याः, हेगडे ग्रामनिवासिनः निवृत्त प्रांशुपालाः **प्रो. यु. जि. शास्त्री**वर्याश्च विशेषेण स्मर्तव्याः भवन्ति यैः सदा उपकृता वयमिति पौनःपुन्येन अभिनन्दनानि तेषाम् ।

तथैव काले काले डि.टि.पि. कर्मणि उपकृतवते **चि. पवन**शर्मणे मुखपुटस्य विन्यासं विदधते **गिरीश आर्. भट्टो**पाह्वयाय, मुद्रणं कृतवत्यै पवनग्राफिक्स् संस्थायै, श्रीकृष्णमुद्रणालयस्य **श्रीशङ्कर हेगडे**वर्याय च हार्दाः धन्यवादाः ।

संशोधनकर्मणि निमग्नाः विद्यार्थिनः, छात्रान् प्रेरयन्तः प्राध्यापकाः, लेखनप्रदानेन प्रोत्साहं यच्छन्तश्च अभिवन्द्यन्ते; प्रार्थ्यन्ते च लेखनप्रदानपुरस्सरं प्रेरयन्तु अस्मान्; **वेद संस्कृत अकाडेमि'** प्रयोजनं प्राप्नुवन्त्विति ।

स्थलम्  : हेगडे
दिनाङ्कः : ०१-०३-२०२२ (महाशिवरात्रिः)

**सम्पादकः**
[सम्पादकसमितेः पक्षतया]

*******

**"मार्गारब्धाः सर्वयत्नाः फलन्ति"**

## PROLOGUE

The expected goal of our Journal has been ful-filled in October, 2021. **"Journal of Veda Samskrita Academy"** has been included in UGC-CARE List. Perhaps, this has been achieved by the grace of Lord Pashupati and the well-weshers of our Journal. At the same time, the continuous efforts of the editorial board, leamed contributors of articles have rendered their service in this achievement. Academy is grateful to all these stakeholders.

Journal of Veda Samskrita Academy is being published continuously for the last nine years. Already we have published 17 volumes successfully. UGC has recognised our Journal under its CARE List. Really this is a great encouragement to us to move in the right direction. We contacted the UGC Cell at Pune to know the recognition no. of our Journal. We received the reply as under-
"With reference to letter dated, 27-01-2022 regarding Registration number of Journal in UGC-CARE List, The UGC-CARE List is **dynamic,** therefore, there are no registration numbers provided to Journals."

Our contributors of articles may note this and for details they may open the UGC-CARE List Web-site and click Language, Arts and Humanities. Immediately our Journal of Veda Samskrita Academy appears in the List. This is the proof of inclusion of our Journal in UGC-CARE List.

Another matter of pleasure is that, our one of the esteemed member of Editorial Board Dr. G.L.Hegde has been appointed by the Govt. of Karnataka as the President of **"Karnataka Yakshagana Academy."** He served in our Board right from its inception. Academy honoured Dr. Hegde in his residence with love and respect. Infact we are very happy for the selection of right person for the right job. We hope, Academy will progress under the able leadership of Dr. G.L.Hegde.

Formal release of the 17th Volume took place at "**Maharshi Sandeepani Veda Vidya Pratishthana, Ujjayani**" by the honourable **Secretary Prof. Viroopaksha V. Jaddipal**, during the pious occasion of Vasanta Panchami. He is also one of the founder member of our Journal. Journal is moving in the right derection under his guidance and co-operation. Indeed we are grateful to him.

In this **18th Volume, 53 articles** are being published, related to Arts and Humanities. We are publishing articles in four languages i.e. Kannada, Samskrita, Hindi and English. Infact we received more than sixty articles. Editorial Board selected **53 articles**, which are fit for publication. I hope, research scholars will be benefitted by going through these articles.

Honourable members of editorial board especially **Prof. N. Laxminarayana Bhat**, Rtd. Principal of Samskrita College, Udupi, **Prof. Ramachandra Bhat**, Rtd. Principal of Samskrita College, Ummachagi, **Prof. Shankar Bhat**, Balegadde H.O.D. Adwita Vedanta of Shree Swarnavalli Samskrita College, **Dr. U. G. Shastri**, Rtd. Principal of Dr. A.V. Baliga College of Arts & Science, Kumta, **Dr. G. L. Hegde**, Rtd. Prof., Dr. A.V. Baliga College of Arts & Science, Kumta, **Dr. Sapna G.S.,** H.O.D. of English, Seshadri Coolege, Bengaluru, have rendered their valuable service in editing these articles. We are greatful to all these dignitaries for their co-operation and service.

We are greatful to **Kumar Pavan Hegde** for his timely DTP work. Similarly our hearty gratitude to **Shri Girish R. Bhat**, who has designed the cover-page beautifully and our thanks to Pavan Graphics and Shree Krishna Mudranalaya, Hegde.

Research scholars and in-service teachers, specially M. Phil and Ph. D. researchers may send their articles to the Academy. Research articls accepted by the Editorial Board will be published in the journal. Thus, the Veda Samskrita Academy which is functioning in a rural area may be encouraged by sending valuable articles.

Place : Hegde
Date : 01-03-2022

**Editor and Publisher**
[On behalf of editorial board]

**********

## ಮೊದಲ ಮಾತು

ಯಾವ ಹಂತವನ್ನು ತಲುಪಬೇಕೆಂಬ ಬಯಕೆಯಿತ್ತೋ ಆ ಹಂತವನ್ನು ನಮ್ಮ ಪತ್ರಿಕೆ ಕಳೆದ 2021 ಅಕ್ಟೋಬರ ತಿಂಗಳಿನಲ್ಲಿ ತಲುಪಿದೆ ಎಂದು ಸಾರಸ್ವತ ಪ್ರಪಂಚಕ್ಕೆ ತಿಳಿಸಲು ಹೆಮ್ಮೆ ಎನಿಸುತ್ತಿದೆ. ಇದಕ್ಕೆ ಪ್ರಧಾನವಾಗಿ ಪಶುಪತಿಯ ಕೃಪೆ ಮತ್ತು ಎಷ್ಟೋ ಕಾಣದ ಕೈಗಳ ಪ್ರಾಮಾಣಿಕ ಪ್ರಯತ್ನ ಹಾಗೂ ನಮ್ಮ ಪತ್ರಿಕೆಯ ಸಂಪಾದಕ ಮಂಡಳಿಯ ಅವಿರತ ಸಾಧನೆ ಮತ್ತು ಲೇಖನಪ್ರದಾತೃಗಳ ಸಹಾಯ-ಸಹಕಾರ ಇವೆಲ್ಲಾ ಸೇರಿ ಈ ಹಂತವನ್ನು ತಲುಪಿದ್ದೇವೆ ಎನ್ನುವುದು ನಿತ್ಯ ಸತ್ಯವಾದ ವಿಚಾರ. ಸಹಕರಿಸಿದ ಎಲ್ಲರೂ ಅಭಿನಂದನಾರ್ಹರು. ಅವರೆಲ್ಲರಿಗೂ ವೇದ ಸಂಸ್ಕೃತ ಅಕಾಡೆಮಿಯ ಪರವಾಗಿ ಹೃತ್ಪೂರ್ವಕ ಕೃತಜ್ಞತೆಯನ್ನು ಪ್ರಪ್ರಥಮವಾಗಿ ಸಲ್ಲಿಸುತ್ತೇನೆ.

ಕಳೆದ 9 ವರ್ಷಗಳಿಂದ **"ಜರ್ನಲ್ ಆಫ್ ವೇದ ಸಂಸ್ಕೃತ ಅಕಾಡೆಮಿ"** ಎನ್ನುವ ಹೆಸರಿನಲ್ಲಿ ಅವಿಚ್ಛಿನ್ನವಾಗಿ ವರ್ಷಕ್ಕೆರಡು ಸಂಪುಟಗಳನ್ನು ಲೋಕಾರ್ಪಣೆ ಗೊಳಿಸುತ್ತಿರುವ ನಮ್ಮ ಪತ್ರಿಕೆಗೆ ಮಾನ್ಯತೆಯನ್ನು ನೀಡಿ ಯುಜಿಸಿ ಪ್ರಾಧಿಕರವು ತನ್ನ ಯುಜಿಸಿ ಕೆರ್ ಯಾದಿಯಲ್ಲಿ ನಮ್ಮ ಪತ್ರಿಕೆಯ ಹೆಸರನ್ನು ಪ್ರಕಟಿಸಿದೆ.

ಯುಜಿಸಿ ಕೇರ್ ಲೀಷ್ಟಿನಲ್ಲಿ ನಮ್ಮ ಪತ್ರಿಕೆಯ ಸಂಖ್ಯೆಯನ್ನು ತಿಳಿದುಕೊಳ್ಳಲು ಇಚ್ಛಿಸಿ ಪುಣೆಯಲ್ಲಿರುವ ಯುಜಿಸಿ ಸೆಲ್ಲಿಗೆ ಪ್ರಸ್ತಾವನೆಯನ್ನು ಸಲ್ಲಿಸಿದಾಗ ಅವರಿಂದ ಈ ರೀತಿ ಉತ್ತರ ಬಂದಿರುತ್ತದೆ.–

"With reference to Letter dated 27.01.2022 regarding Registration number of journals in UGC - CARE List. The UGC-CARE List is dynamic, therefore there are no registration numbers provided to journals."

ಪ್ರಕೃತ ಸಮಯದಲ್ಲಿ ಯು.ಜಿ.ಸಿ. ಯಲ್ಲಿ ಈ ಹಿಂದಿನ ಕ್ರಮದಂತೆ ಐ.ಎಸ್. ಎಸ್.ಎನ್. ನಂಬರನ್ನು ಹೊಂದಿರುವ ಪತ್ರಿಕೆಗಳಿಗೆ ರಜಿಷ್ಟ್ರೇಶನ್ ನಂಬರನ್ನು ನೀಡುವ ಪ್ರಾವಧಾನ ಇಲ್ಲವೆಂದು ನಾವು ತಿಳಿದುಕೊಳ್ಳಬೇಕಾಗಿದೆ. ಈ ವಿಚಾರವನ್ನು ನಾನು ಯಾಕೆ ಇಲ್ಲಿ ಉಲ್ಲೇಖಿಸುತ್ತಿದ್ದೇನೆಂದರೆ ನಮ್ಮ ಪತ್ರಿಕೆಯಲ್ಲಿ ಪ್ರಕಟಣೆಗಾಗಿ ತಮ್ಮ ಲೇಖನವನ್ನು ಕಳುಹಿಸುತ್ತಿರುವ ಬಹಳಷ್ಟು ಜನರು "ಯುಜಿಸಿ ಕೇರ್ ಲೀಷ್ಟಿನಲ್ಲಿ ನಿಮ್ಮ ಪತ್ರಿಕೆಯ ರಜಿಷ್ಟ್ರೇಶನ್ ನಂಬರನ್ನು ತಿಳಿಸಿ" ಎಂದು ಪ್ರಶ್ನಿಸುತ್ತಿರುತ್ತಾರೆ. ಅವರಲ್ಲಿ ನಮ್ಮ ವಿನಂತಿ ಏನೆಂದರೆ ಯುಜಿಸಿ ಕೇರ್ ಲೀಷ್ಟಿನ ವೆಬಸೈಟನ್ನು ತೆರೆಯಿರಿ. ಅಲ್ಲಿ Language, Arts and Humanities ಎಂಬುದರ ಮೇಲೆ ಕ್ಲಿಕ್ಕಿಸಿದಾಗ ನಮ್ಮ ಪತ್ರಿಕೆಯ ಹೆಸರು ಪ್ರಕಟವಾಗುತ್ತದೆ. ಈ ಅಂಶವೇ ನಮ್ಮ ಪತ್ರಿಕೆ UGC-CARE List ನಲ್ಲಿ ಸೇರಿದೆ ಎಂಬುದಕ್ಕೆ ಪ್ರಮಾಣವಾಗಿದೆ.

ಇನ್ನೊಂದು ಮಹತ್ವದ ವಿಚಾರವನ್ನು ತಮ್ಮಲ್ಲಿ ನಿವೇದಿಸಲು ಇಚ್ಛಿಸುತ್ತೇನೆ. ನಮ್ಮ ಪತ್ರಿಕೆಯ ಸಂಪಾದಕ ಮಂಡಳಿಯಲ್ಲಿ ಓರ್ವ ಸದಸ್ಯರಾಗಿರುವ **ಡಾ. ಜಿ.ಎಲ್.ಹೆಗಡೆ**ಯವರನ್ನು ಕರ್ನಾಟಕ ಸರಕಾರವು **"ಕರ್ನಾಟಕ ಯಕ್ಷಗಾನ ಅಕಾಡೆಮಿ"**ಗೆ ಅಧ್ಯಕ್ಷರನ್ನಾಗಿ ನೇಮಿಸಿ ಆದೇಶವನ್ನು ಹೊರಡಿಸಿದೆ. ನಮ್ಮ ಸಂಸ್ಥೆಯ ಪ್ರಾರಂಭದಿಂದ ಈ ತನಕವೂ ಅವಿರತವಾಗಿ ಸಂಪಾದಕ ಮಂಡಳಿಯಲ್ಲಿ ಸೇವೆ ಸಲ್ಲಿಸುತ್ತಿರುವ ಶ್ರೀಯುತ ಹೆಗಡೆಯವರಿಗೆ ಸಂದ ಗೌರವ ಇದಾಗಿದೆ. ಅರ್ಹರಿಗೆ ಸರಕಾರ ಗೌರವ ನೀಡಿದೆ ಎನ್ನುವುದರಲ್ಲಿ ಸಂಶಯ ಇಲ್ಲ. ಇದು ನಮಗೆಲ್ಲಾ ತುಂಬಾ ಸಂತಸದ ವಿಷಯವಾಗಿದೆ. ಶ್ರೀಯುತ ಹೆಗಡೆಯವರನ್ನು ಅವರ ಮನೆಯಲ್ಲಿಯೇ ಭೇಟಿ ಮಾಡಿ ಅಕಾಡೆಮಿಯ ವತಿಯಿಂದ ಗೌರವವನ್ನು ಸಲ್ಲಿಸಿರುತ್ತೇವೆ.

ಮಧ್ಯಪ್ರದೇಶದ ಉಜ್ಜಯನಿಯಲ್ಲಿರುವ **"ಮಹರ್ಷಿ ಸಾಂದೀಪನಿ ವೇದ ವಿದ್ಯಾ ಪ್ರತಿಷ್ಠಾನ"**ದ ಗೌರವಾನ್ವಿತ ಕಾರ್ಯದರ್ಶಿಗಳಾಗಿರುವ **ಪ್ರೊ. ವಿರೂಪಾಕ್ಷ ವಿ. ಜಡ್ಡಿಪಾಲ** ರವರು ನಮ್ಮ ಸಂಶೋಧನಾ ಪತ್ರಿಕೆಯ **17** ನೇ ಸಂಪುಟವನ್ನು ತಮ್ಮ ಕಾರ್ಯಾಲಯ ದಲ್ಲಿಯೇ ವಸಂತಪಂಚಮಿಯ ಶುಭ ಅವಸರದಲ್ಲಿ ಲೋಕಾರ್ಪಣೆ ಗೊಳಿಸಿರುತ್ತಾರೆ. ಅವರು ನಮ್ಮ ಪತ್ರಿಕೆಯ ಸಂಸ್ಥಾಪಕರಲ್ಲಿ ಓರ್ವರಾಗಿರುತ್ತಾರೆ. ಅವರ ಮಾರ್ಗದರ್ಶನದಲ್ಲಿಯೇ ಈ ಪತ್ರಿಕೆ ಓದುಗರನ್ನು ತಲುಪುತ್ತಿದೆ ಎಂದು ಆತ್ಮವಿಶ್ವಾಸದಿಂದ ಹೇಳಿಕೊಳ್ಳುತ್ತೇವೆ. ಲೋಕಾರ್ಪಣೆ ಗೊಳಿಸಿ, ಪತ್ರಿಕೆಯ ಶ್ರೇಯೋಭಿವೃದ್ಧಿಯನ್ನು ವ್ಯಕ್ತಪಡಿಸಿದ ಶ್ರೀಯುತರಿಗೆ ಧನ್ಯವಾದಗಳನ್ನು ಸಮರ್ಪಿಸುತ್ತೇನೆ.

ಲೋಕಾರ್ಪಣೆಗೊಳ್ಳುತ್ತಿರುವ ಈ **18** ನೇ ಸಂಪುಟದಲ್ಲಿ **53** ಕ್ಕೂ ಹೆಚ್ಚಿನ ಲೇಖನಗಳು ಪ್ರಕಟವಾಗುತ್ತಿವೆ ಎಂದರೆ ನಮ್ಮ ಪತ್ರಿಕೆಯ ಮಹತ್ವವನ್ನು ಈ ಮೂಲಕವೇ ತಾವು ಊಹಿಸಬಹುದಾಗಿದೆ. ಕನ್ನಡ, ಸಂಸ್ಕೃತ, ಹಿಂದಿ, ಇಂಗ್ಲೀಷ ಈ ನಾಲ್ಕೂ ಭಾಷೆಗಳಲ್ಲಿನ ಲೇಖನವನ್ನು ಪ್ರಕಟಿಸುತ್ತಿದ್ದೇವೆ. ಬಹುತೇಕವಾಗಿ ಕಲೆ ಮತ್ತು ಮಾನವೀಯ ಮೌಲ್ಯಗಳನ್ನು ಎತ್ತಿ ಹಿಡಿಯುವ ಲೇಖನಗಳಾಗಿವೆ. 60 ಕ್ಕಿಂತ ಹೆಚ್ಚು ಲೇಖನಗಳು ಬಂದಿತ್ತಾದರೂ ಸಂಪಾದಕ ಮಂಡಳಿಯಲ್ಲಿ ಚರ್ಚಿಸಿ, 53 ಲೇಖನಗಳನ್ನು ಮಾತ್ರ ಪ್ರಕಾಶಿಸುತ್ತಿದ್ದೇವೆ.

ಲೇಖನಗಳನ್ನು ಪರಿಶೀಲಿಸಲು ಉಡುಪಿಯ ನಿವೃತ್ತ ಪ್ರಾಂಶುಪಾಲರಾದ **ಪ್ರೊ. ಎನ್. ಲಕ್ಷ್ಮೀನಾರಾಯಣ ಭಟ್ಟ**ರು, ಉಮ್ಮಚಗಿಯ ನಿವೃತ್ತ ಪ್ರಾಂಶುಪಾಲರಾದ **ಪ್ರೊ. ರಾಮಚಂದ್ರ ಭಟ್ಟ**ರು, ಸ್ವರ್ಣವಳ್ಳಿಯ ಸಂಸ್ಕೃತ ಕಾಲೇಜಿನ ಅದ್ವೈತ ವೇದಾಂತ ಪ್ರಾಧ್ಯಾಪಕ ರಾದ **ಪ್ರೊ. ಶಂಕರ ಭಟ್ಟ ಬಾಲಿಗದ್ದೆ**ಯವರು, ತಿರುಪತಿಯ ಕೇಂದ್ರೀಯ ಸಂಸ್ಕೃತ ವಿಶ್ವವಿದ್ಯಾಲಯದ ದ್ವೈತ ವೇದಾಂತ ವಿಭಾಗದ **ಡಾ. ನಾರಾಯಣ ಆಚಾರ್ಯ**ರವರು, ಬೆಂಗಳೂರಿನ ಶೇಷಾದ್ರಿಪುರಂ ಕಾಲೇಜಿನ ಇಂಗ್ಲೀಷ ವಿಭಾಗದ ಮುಖ್ಯಸ್ಥರಾಗಿರುವ **ಡಾ. ಸಪ್ನಾ ಜಿ. ಎಸ್.** ರವರು, ಕುಮಟಾದ ನಿವೃತ್ತ ಪ್ರಾಧ್ಯಾಪಕರಾದ ಮತ್ತು ಕರ್ನಾಟಕ ಯಕ್ಷಗಾನ ಅಕಾಡೆಮಿಯ ಅಧ್ಯಕ್ಷರಾಗಿರುವ **ಡಾ. ಜಿ. ಎಲ್. ಹೆಗಡೆ**ಯವರು, ಹೆಗಡೆಯ ನಿವೃತ್ತ ಪ್ರಾಂಶುಪಾಲರಾಗಿರುವ **ಡಾ. ಯು. ಜಿ. ಶಾಸ್ತ್ರಿ**ಯವರು ಸಹಕರಿಸಿರುತ್ತಾರೆ. ಅವರೆಲ್ಲರೂ ಅಭಿನಂದನಾರ್ಹರು. ಅವರ ಸೇವೆಯನ್ನು ಮುಕ್ತಕಂಠದಿಂದ ಶ್ಲಾಘಿಸುವು ದಲ್ಲದೇ ಹೃತ್ಪೂರ್ವಕವಾಗಿ ಧನ್ಯವಾದಗಳನ್ನು ಸಮರ್ಪಿಸುತ್ತೇನೆ.

ಸಕಾಲದಲ್ಲಿ ಡಿ.ಟಿ.ಪಿ. ಮಾಡಿಕೊಟ್ಟ ಕುಮಾರ **ಪವನ ಹೆಗಡೆ**ಯವರಿಗೂ, ಮುಖಪುಟದ ವರ್ಣವಿನ್ಯಾಸ ಮಾಡಿಕೊಟ್ಟ **ಶ್ರೀಗಿರೀಶ ಆರ್. ಭಟ್ಟ**ರಿಗೂ, ಅಂದವಾಗಿ ಮುದ್ರಿಸಿಕೊಟ್ಟ ಪವನ್ ಗ್ರಾಫಿಕ್ಸ್ ಮತ್ತು ಪುಸ್ತಕವನ್ನು ಅಂದವಾಗಿ ಜೋಡಿಸಿ ಸಿದ್ಧಗೊಳಿಸಿ ಕೊಟ್ಟ ಶ್ರೀಕೃಷ್ಣ ಮುದ್ರಣಾಲಯದ **ಶ್ರೀ ಶಂಕರ ಹೆಗಡೆ**ಯವರಿಗೂ ಹೃತ್ಪೂರ್ವಕ ಧನ್ಯವಾದಗಳು.

ಎಮ್.ಫಿಲ್. ಅಥವಾ ಪಿಎಚ್.ಡಿ. ಸಂಶೋಧಕ ವಿದ್ಯಾರ್ಥಿಗಳು ಅಥವಾ ಈಗಾಗಲೇ ಸೇವೆ ಸಲ್ಲಿಸುತ್ತಿರುವ ಉಪನ್ಯಾಸಕರು, ಪ್ರಾಧ್ಯಾಪಕರು ತಮ್ಮ ಲೇಖನಗಳನ್ನು ಅಕಾಡೆಮಿಗೆ ಕಳುಹಿಸಿ ಕೊಡಬಹುದು. ಸಂಪಾದಕ ಸಲಹಾ ಮಂಡಳಿಯಿಂದ ಅಂಗೀಕೃತವಾದ

ಲೇಖನಗಳನ್ನು ಸಂಶೋಧನಾ ಪತ್ರಿಕೆಯಲ್ಲಿ ಪ್ರಕಟಿಸಲಾಗುವುದು. ಹೀಗೆ ಗ್ರಾಮೀಣ ಪ್ರದೇಶದಲ್ಲಿರುವ ಈ ವೇದ ಸಂಸ್ಕೃತ ಅಕಾಡೆಮಿಯ ಸದುಪಯೋಗವನ್ನು ಆಸಕ್ತರು ಪಡೆದುಕೊಳ್ಳಬಹುದು ಎಂದು ವಿನಂತಿಸುತ್ತೇನೆ.

ಸ್ಥಳ : ಹೆಗಡೆ
ದಿನಾಂಕ : 01–03–2022 (ಮಹಾಶಿವರಾತ್ರಿ)

ಸಂಪಾದಕರು
[ಸಂಪಾದಕ ಮಂಡಳಿಯ ಪರವಾಗಿ]

********


## EDITORIAL ADVISORY BOARD

| | |
|---|---|
| **Dr. Gopalkrishna Hegde**<br>Jyotisha Shastra & Dharma Shastra Vidwan<br>Ph : 9741847399 | **Editor in Chief**<br>Director, Veda Samskrita Academy (Reg.)<br># 1347, Kalkod Road, HEGDE-581330<br>Kumta, Uttarakannada, Karnataka |

## BOARD OF EXPERTS AND REFEREES

| | |
|---|---|
| **Prof. Viroopaksha V. Jaddipal,** Ujjain<br>Ph : 9440002813 | **Secretary**<br>Maharshi Sandipani Rashtriya Vedavidya Pratishthan, Vedavidya Marg<br>Chintaman Ganesh, P.O. : Jawasiya-456006, Ujjain, Madhyapradesha |
| **Prof. A. Sripad Bhat, Tirupati**<br>Ph : 9490586341 | **Professor**<br>Department of Jyotisha<br>National Sanskrit University<br>TIRUPATI-517507, (A.P.) |
| **Prof. N. Laxminarayana Bhatta,** Udupi<br>Ph : 9481750414 | **Rtd. Principal**<br>S.M.S.P. Samskrita College<br>UDUPI-576101, Karnataka |
| **Prof. Subray V. Bhat,**<br>**Shringeri**<br>Ph : 9449160458 | **Director (Principal)**<br>National Sanskrit University<br>Rajiv Gandhi Campus<br>Mense, Shringeri-577139<br>Chikkamagaluru, Karnataka |
| **Prof. Ramachandra N. Bhat**<br>Sirsi<br>Ph : 9480019152 | **Rtd. Principal**<br>‘SURABHI’ # : 6, I st cross, Mahalaxmi Layout, P.O. : N.M.Yard-581402<br>Hubli Road, Sirsi,<br>Uttarakannada, Karnataka |
| **Prof. Venkataramana Hegde**<br>Mysore<br>Ph : 9480476144 | **Professor**<br>Dept. of Dharma Shastra<br>Govt. Maharaja Samskrita College<br>Mysore-570024, Karnataka |

| | |
|---|---|
| **Dr. Shreedhara Bhat, Ainkai**<br>Krishna Raja Nagara<br>Ph : 9448933957 | **Professor**<br>Dept. of Advaita Vedanta Shastra<br>Govt. Maharaja Samskrita College<br>Mysore-570024, Karnataka |
| **Dr. U. G. Shastri, Hegde**<br>Ph : 9449992160 | **Rtd. Principal**<br>(Dr. A.V.Baliga College, Kumta)<br>'Manasa' Pancharabena, HEGDE-581330<br>Kumta, Uttarakannada, Karnataka |
| **Dr. G. L. Hegde, Manaki,**<br>Kumata<br>Ph : 9448441190 | **Rtd. Professor**<br>President, Karnataka Yakshagana<br>Academy, Karnataka Govt.<br>Research Guide<br>Kannada Vishwa Vidyalaya, Hampi<br>'Amrutavarshini' Manaki, Kumta-581343, Uttarakannada, Karnataka |
| **Dr. Nagaraja G. Bhat,**<br>Holanagadde<br>Ph : 9535668177 | 'Shreenaga Ayurdhama'<br>Holanagadde-581351<br>Kumta, Uttarakannada, Karnataka |
| **Dr. Bhaskar Bhat, Joshi**<br>Bengaluru<br>Ph : 9742269403 | **Professor**<br>H.O.D. of NyayaVaisheshika<br>Karnataka Samskrita University<br>Chamaraja Pete-560018<br>Bengaluru, Karnataka |

**********

Journal of Veda Samskrita Academy, ISSN 2250-1711
Volume XVIII : July to December – 2021

# इन्द्रियविमर्शः

**डा. भास्कर भट्टः जोशि**
विभागाध्यक्षः, न्याय-वैशेषिकविभागः
कर्नाटक संस्कृत विश्वविद्यालयः, बेङ्गलूरु

प्रत्यक्षप्रमाकरणं प्रत्यक्षमिति सर्वसम्मतं लघुलक्षणं भवति। ततश्च प्रत्यक्षप्रमा च सैवोच्यते या इन्द्रियसंनिकर्ष जन्या भवति। इन्द्रियात्मकं प्रमाणं प्रत्यक्षमिति प्रस्थानरत्नाकरे प्रमाणपरिच्छेदे वल्लभमतानुयायिनः। दोषदुष्टेन्द्रियवारणाय प्रमाणमिति, शब्दादिवारणाय इन्द्रियेति च पदद्वयम्। शाब्दिकानां मते इन्द्रियार्थसंनिकर्षजन्या या बुद्धिवृत्तिः सा, तत्प्रतिबिम्बितं चैतन्यं वा प्रत्यक्ष- प्रमा, तत्करण प्रत्यक्षं प्रमाणमिति लक्षणं लघुमञ्जूषायां बौद्धार्थस्य वाच्यत्वनिरूपणावसरे प्रसङ्गात् प्रतिपादितम्। एवं सांख्ययोगदर्शनयोः इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तु परागात् तद्विषया सामान्यविशेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं प्रमाणमिति योगसूत्रव्यासभाष्ये साधितम्।

**इन्द्रियविमर्शः**

चार्वाकास्तु अहं पश्यामि, अहं श्रुणोमीति प्रतीतिबलात् इन्द्रियाण्येव चेतयन्ते तानि गोलकादिलक्षणानीति। पृथिव्यप्तेजोवायुरिति तत्वानि, तत्समुदाये शरीरेन्द्रियविषयसंज्ञेति बार्हस्पत्यसूत्रम्।अश्नुते विषयमित्यक्षमिन्द्रियमिति, इन्दति-परमैश्वर्यं अनुभवतीति इन्द्र आत्मा, इन्द्रस्य लिङ्गमिन्द्रियमिति व्युत्पत्तिं प्रदर्श्य जैनाः इन्द्रियद्वैविध्येन लक्षणं द्विविधं १ स्वीकुर्वन्ति-तत्र द्रव्येन्द्रियम्– गोलकादि परिणामविशेषपरिणत रूपरसगन्धस्पर्शवत्पुद्गलात्मकम्। भावेन्द्रियन्तु लब्ध्युपयोगात्मकम्। आवरणक्षयोपशमप्राप्तिरूपार्थग्रहण शक्तिर्लब्धिः। तदभावे सतोऽप्यर्थस्याप्रकाशनात् २ इति। इन्द्रियाणां स्वरूपमणुतमम् अतीन्द्रियमनित्यम् चिरस्थायि विकारिचेति प्रमेयरत्नाकस्य प्रमेयप्रकरणे प्रतिपादितम्। सात्त्वकाहङ्कारोपादानकत्वमिन्द्रियसामान्य लक्षणं सांख्यनये। "अत्मलिङ्गत्वस्य तत्वे तु महदहङ्कारयोरप्यतिप्रसङ्गस्स्यात् तस्माद् व्युत्पत्तिमात्रं तद् यथा गच्छतिति गौरिति।

"उभयमप्येतद् इन्द्रस्यात्मनश्चिह्नत्वादिन्द्रियमुच्यते" इत्युक्त्या उभयविधेन्द्रियाणामसाधारणं लक्षणमिति ज्ञायते। त्वगेव बुद्धीन्द्रियम्, तच्च त्वगिन्द्रियं शरीरव्यापि, तत्सत्वे एव विषयग्रहणं भवतीति त्वगेवैकेन्द्रियमिति एकेद्रियवादः, इन्द्रियाणि विभूनि, न भौतिकानि, सात्विकाहङ्कारोपादानत्वमिन्द्रियत्वमिति च सांख्या इति पदार्थरत्नमालायाम्। न्यायसिद्धान्तमञ्जरीव्याख्यायाञ्च दृश्यते। सोऽयमेकेन्द्रियवादः अन्धेषु व्यभिचाराद् दुष्ट इति न्यायभाष्ये वार्तिके च खण्डितः। लब्धित्वमात्रं तावदिन्द्रियमिति प्रमाणमीमांसायाम्। इन् इति विषयाणां नाम, तान् इनः विषयान् प्रति द्रवन्ति गच्छन्ति अथवा तान् विषयान् द्रावयति-गभयतीति इन्द्रियमिति व्युत्पत्तिरपि प्रमाणमीमांसायां सांख्यकारिका-माठरवृत्तौ ३ च प्रदर्शिता।

आलोचनज्ञानासाधारणकारणत्वमिन्द्रियत्वमिति, इन्द्रं कार्यकारणस्वामिनं जीवभावापन्नं परमेश्वरं आनन्दयति भोगैः प्रीणयतीति इन्द्रियमिति च वेदान्तिनां मते स्वरूपं वक्तव्यम्। वर्तमानमात्रविषयग्राहित्वमिति लक्षणं वेदान्तपरिभाषा प्रकाशिकायां दृश्यते। सात्त्विकाहङ्कारोपादानकं द्रव्यमिन्द्रियमतीन्द्रियमिति भवति लक्षणम्। शरीरसंयुक्तं ज्ञानकरणमतीन्द्रियमिन्द्रियमिति लक्षणं कर्मेन्द्रियेष्वव्याप्त मितियतीन्द्रियमतदीपिकायाम्। साक्षात्कारप्रतीतिसाधनमिन्द्रियमिति प्रमाणमञ्जरी। मध्वमतानुयायिनस्तु प्रमातृप्राकृतभेदेन इन्द्रियं द्विविधम्। प्रमात्रिन्द्रियस्यैव प्रकृतिपरिणामाहङ्कारपञ्चभूतांशैरुपचितं साक्षीति नामान्तरम्। आन्मस्वरूपम्, तद्धर्माः सुखादयः, भावरूपाज्ञानम्, मनः, मनोवृत्तयः, बाह्योन्द्रियज्ञानसुखाद्याः कालः, दिक्, आकाशः, प्रामाण्यादयश्च प्रमात्रिन्द्रियस्य विषयाः। घ्राण-रसन-चक्षुस्त्वक्-श्रोत्र-मनोरूपं प्राकृतमिन्द्रियमित्युच्यते। काचकामलादयः इन्द्रियनिष्ठसमीचीनज्ञानानुकूलशक्तिविघटकाः प्राकृतेन्द्रियाणां दोषाः। तच्च प्राकृतेन्द्रियं दैवासुरमध्यमभेदेन त्रिविधम्। तेषु यथार्थज्ञानजनकं दैवमिन्द्रियम्। अयथार्थज्ञानजनकमासुरमिन्द्रियम्। अभयविधज्ञानजनकं मध्यममिति वदन्ति। वैय्याकरणानां दर्शने तु महदहङ्कारचेष्टाभिन्नत्वे सति प्रत्येकं जीवच्छरीरमात्मतत्त्वानुमापकमिन्द्रियमिति इन्द्रिय

-सामान्यलक्षणं वक्तव्यम्। इन्द्रियाणां नियमेन स्वाधिष्ठानवृत्तिगुणग्राहकत्वमिति वा लक्षणं वक्तव्यम्। परमिदं न कर्मेन्द्रियसामान्यम् परन्तु ज्ञानेन्द्रियस्यैव। सूचितञ्चेदं "इन्द्रियमिन्द्रलिङ्गमित्यादिसूत्रे ४ पाणिनिना। तत्र इन्द्र-आत्मा तस्य लिङ्गं ( ज्ञापकम्) करणेन कर्तुरनुमानादिति व्याख्यातं सिद्धान्तकौमुदीग्रन्थे। महत्तत्वे अहन्तत्वे चेष्टायाञ्च अतिव्याप्ति- वारणाय सत्यन्तदलम्। एवं सांख्यमतेऽपीति पूर्वमुक्तम्। सांख्यमत इव शाब्दिकानां मतेऽपि एकादशेन्द्रियवादः।

भोगसाधनानि, स्वविषयग्रहणलक्षणानि च इन्द्रियाणि इति वात्स्यायनभाष्ये दृश्यते। करणस्वभावकानि इन्द्रियाणि, स्वविषयग्रहणलक्षणत्वमिन्द्रियाणामिति ५ च न्यायवार्तिके विद्यते। शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनस्संयोगा श्रयत्वमिन्द्रियत्वमिति न्यायलीलावत्याम्, वादिविनोदे, लीलावती- कण्ठाभरणे मुक्तावल्याम्, लक्षणराजौ च लक्षितम्। शब्दादितरे प्रत्यक्ष- सन्निकर्षवत्तापादनविषया ये विशेषगुणा रूपादयः सुखादयश्च तेषामनाश्रयत्वे सति ज्ञानस्यासाधारणकारणं य इन्द्रियसंयोगः तदाश्रयत्वमिति तदर्थः। आत्मन्य-तिव्याप्तिवारणाय शब्देतरेति। चक्षुरादौ अव्याप्तिवारणाय उद्भूतेति। कालादावतिव्याप्तिवारणाय ज्ञानकारण-मनस्संयोगाश्रयत्वमिति। परन्तु लक्षणेऽस्मिन् विशेषपदवैयर्थ्यम् चक्रकापत्तिञ्चोद्भाव्य लक्षणराजौ साक्षात्कारत्व-व्याप्यजात्यवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वे सति द्रव्यत्वमिन्द्रियत्वमिति लक्षणान्तरमुपवर्णितम्। अत्रापि आत्मन्यतिव्याप्तिवारणाय सत्यन्तम्। चक्षुर्घटसंयोगेऽतिव्याप्तिवारणाय द्रव्यत्वमिति चोपात्तम्। विषयोपलब्धि-कारणत्वमिन्द्रियत्वमिति न्यायमञ्जरी।एवं पदार्थचन्द्रिकायां "साक्षात्कारमात्रवृत्तिधर्मावच्छिन्नकार्यतानिरूपित-कारणता श्रयव्यापारवदतीन्द्रियमिति"६ लक्षणं दृश्यते। शरीराश्रयं ज्ञातुरपरोक्षप्रतीतिसाधनं द्रव्यमिन्द्रियमिति ७ लक्षणं न्यायकन्दल्याम्, शरीरयोगे सत्येव साक्षात्प्रमितिसाधनं इन्द्रियमिति तार्किकरक्षायाम्, शरीरसंयुक्तं ज्ञानकारणमतीन्द्रियमिन्द्रियमिति ८ तर्ककौमुद्याम्, तर्कभाषायाञ्च दृश्यते। आलोकादौ अतिव्याप्तिवारणाय अतीन्द्रियमिति कालादावतिव्याप्तिवारणाय ज्ञानकारणमिति इन्द्रियार्थसंनिकर्षेऽतिव्याप्तिवारणाय शरीरसंयुक्तमिति पदानि। आत्मान्यत्वे सति ज्ञानकारणमनस्संयोगाश्रयत्वमिन्द्रियत्वम्, स्पर्शोपलब्धिसाधनमिन्द्रियम्, सुखदुःखा-नुकूलसाक्षात्कारप्रमितिक्रियान्यतरकरणमतीन्द्रियमिति लक्षणानि लक्षणराजौ विद्यन्ते।

आलोकेऽतिव्याप्तिवारणाय अतीन्द्रियमिति, धर्मादावतिव्याप्तिवारणाय सुखदुःखानुकूलेति अनुमित्यादि-करणेऽतिव्याप्तिवारणाय साक्षादिति पदानि निवेशितानि। शरीरसंयुक्तमतीन्द्रियं साक्षात्प्रतिसाधनमिन्द्रियमिति लक्षणमनूद्य तर्कसंग्रहे आनन्दज्ञानेन खण्डितम्। स्मृत्यजनकज्ञानहेतु मनस्संयोगाश्रयत्वमिन्द्रियत्वमिति ९ लक्षणं तत्वचिन्तामणौ पदार्थरत्नमालायाम्, वैशेषिकोपस्कारे कणादसिद्धान्तचन्द्रिकायाञ्च दृश्यते। ज्ञानक्रिया सकरणिका क्रियात्वात् छिदिक्रियावत् इत्यनुमानं इन्द्रियसत्वे प्रमाणमिति नैयायिकाः। तैजसाहङ्कारोपादेयत्वे सति ज्ञानक्रियान्यतरकरणमिन्द्रियमिति, देहसंयुक्तत्वे सति स्वफलेनात्मज्ञापकत्वं वा इन्द्रियत्वमिति च इन्द्रियसामान्यलक्षणमिति वल्लभमतानुयायिनः इति प्रमाणरत्नाकरे दृश्यते।

घरट्टयन्त्रादिक्रियाजनकवाय्वादिवारणाय प्रथमलक्षणे सत्यन्तम्, प्राणबुद्धि- वारणाय शेषमिति वदन्ति। तच्चेन्द्रियं अणुतममतीन्द्रियमनित्यं चिरस्थायि विकारि चेति वाल्लभाः प्रमाणरत्नाकरे प्रमेयप्रकरणे वर्णयन्ति। यत् सम्प्रयुक्तेऽर्थे विशदावभासं ज्ञानं जनयति तदिन्द्रियमितिमीमांसकाः। गोलकानां दृश्यत्वात् इन्द्रियाणां ऐन्द्रियकत्वमपि न।छिन्नकरणस्य शब्दश्रवणानुपपत्तेः, नष्टलिङ्ग- चक्षुषः अचाक्षुषापत्तेश्च। अतश्च रूपाद्युपलब्धिः करणसाध्या क्रियात्वात् छिदिक्रियावत् इत्यनेन इन्द्रियाणां करणत्वेन रूपेण सिद्धौ गौलकं न करणम्। उक्तरीत्या अन्वयव्यतिरेकव्यभिचारात् इत्येवं गोलकातिरिक्तेन्द्रियसिद्धौ तस्यातीन्द्रियत्वमप्यवसीयते इति प्रक्रिया।

इन्द्रियाणि विभूनि नभौतिकानीति१० सांख्यसिद्धान्तः परन्तु न्यायवार्तिके सर्वाणि इन्द्रियाणि भौतिकानि अतीन्द्रियाणि११चेति सिद्धान्तितम्।

**इन्द्रियविभागविमर्शः**

एकमेवेन्द्रियं न तु नाना इति केषाञ्चिन्मतम्। तच्च त्वगेवैकमिन्द्रियम्। तच्च शरीव्यापि विद्यते। तत्सत्वे एव विषयग्रहणं भवति इति एकेन्द्रियवादः। अस्य वादस्य अन्धेषु व्यभिचारमापाद्य दृष्टता न्यायवार्तिके वर्णिता। प्रमेय- रत्नमालायां परीक्षामुखसूत्रवृत्तौ जैनाः इन्द्रियं द्रव्येन्द्रियभावेन्द्रियभेदाद् द्वि- विधम्। चक्षुरादि द्रव्येन्द्रियं भावेन्द्रियं मनः इति वर्णयन्ति चक्षुश्श्रोत्र-घ्राण-जिह्वा-काय-मनो-भेदेन षडिन्द्रियाणीति बौद्धाः। सांख्ये-योगे-व्याकरणदर्शने च घ्राण-रसनचक्षु-स्पर्शन-श्रवणभेदेन पञ्च ज्ञानेन्द्रियाणि वाक्-पाणि-पाद-पायूपस्थ-भेदेन कर्मेन्द्रियाणि पञ्च, उभयात्मकमिन्द्रियं मन इति इन्द्रियाणि एकादश स्वीकृतानि।स्फुटार्थसिद्धौ विशुद्धिमार्गे च बौद्धाः द्वाविंशतीन्द्रियाणि स्वीकुर्वन्ति-चक्षुस्-श्रोत्र-घ्राण-जिह्वा-काय-मनस्-स्त्री-पुरुष-जीवित-सुख-दुःख-सौमनस्य दौर्मनस्य। उपेक्षा-श्रद्धा-वीर्य-स्मृति-समाधि-प्रज्ञा-अनाज्ञातमाज्ञास्यानि-आज्ञा-आज्ञातावीन्द्रियमिति च तेषां नाम। जिह्वेन्द्रियमित्यनेन रसनेन्द्रियं वागिन्द्रियञ्चेत्युभयमपि गृह्यते। कायेन्द्रियमिति सकलशरीरव्यापि त्वगिन्द्रियमुच्यते।

उपस्थेन्द्रियेणैव गतार्थतया स्त्रीन्द्रियपुरुषेन्द्रियविभागः, प्राणेनैव जीवि- तेन्द्रियस्य गतार्थताम्, सुख–दुःख-सौमनस्य-दौर्मनस्य-उपेक्षा श्रद्धेन्द्रियाणां मनसा गतार्थताम्, वीर्येन्द्रियस्य कर्मेन्द्रियैः गतार्थताम्, स्मृतीन्द्रियादारभ्य अनाज्ञातमाज्ञास्यामीति इन्द्रियाणां मनसा गतार्थताम्, आज्ञेन्द्रिय-आज्ञातावीन्द्रिययोर्वागिन्द्रियेण गतार्थतां स्वीकृत्य पश्चात्तनैर्बौद्धैः जिह्वा-घ्राण-चक्षुश्श्रोत्र-काय-मनो-भेदेन षडिन्द्रियाण्येव स्वीकृतानि। मीमांसकास्तु बाह्यान्तरभेदेन द्विविधानि इन्द्रियाणि। तेषु घ्राण-रसन-चक्षुस्त्वक्-श्रोत्राणि बाह्येन्द्रियाणि, मनस्तु आन्तरम् इन्द्रियं यतः मनः आत्मतद्गुणेष्वेव स्वतन्त्रं प्रवर्तते न बाह्येषु रूपादिषु इति आन्तरमित्युच्यते इति वदन्ति। प्रतिपादितञ्चैतत् शास्त्रदीपिकायां प्रकरणपञ्चिकायाः प्रमाणपारायणे च। अद्वैतवेदान्ते तु इन्द्रियाणि भौतिकानि मध्यमपरिमाणानि ज्ञानेन्द्रियकर्मेन्द्रियभेदेन-भिन्नानि श्रोत्र-त्वक्-चक्षुस्-रसन-घ्राणानि ज्ञानेन्द्रियाणि वाक्पाणिपाद-पायूपस्थाख्यानि मनस्तु न इन्द्रियमिति स्वीक्रियते स्पष्टञ्चेदं वेदान्त-परिभाषादिषु। विशिष्टाद्वैतिनस्तु कर्मेन्द्रिय- ज्ञानेन्द्रियभेदेन द्विविधमिन्द्रियम्, ज्ञानप्रसरण-शक्तं ज्ञानेन्द्रियं मनस्-श्रोत्र-चक्षुस्-घ्राण-रसन-त्वग्भेदेन षडिवधम्, उच्चारणादिषु अन्यतमक्रियाशक्तं कर्मेन्द्रियं वाक्-पाणि-पादपायु-उपस्थभेदेन पञ्चविधमिति स्वीकुर्वन्ति। स्पष्टञ्चेदं यतीन्द्र-मतदीपिकायाम्। द्वैतिनस्तु प्रमातृ प्राकृतभेदेन इन्द्रियं द्विविधम्। प्रमात्रिन्द्रियस्यैव प्रकृतिपरिणामाहङ्कार-पञ्चभूतांशै रूपचितं साक्षीति नामान्तरम्। आत्मस्वरूपम्, तद्धर्माः सुखादयः, भावरूपाज्ञानम्, मनः मनोवृत्तयः बाह्येन्द्रियज्ञानसुखादयः, कालः, दिक्, आकाशः, सुखाद्यभावः, प्रामाण्यादयश्च प्रमात्रिन्द्रियस्य विषयाः। घ्राण-रसन-चक्षुस्-त्वक्-श्रोत्र-मनोरूपं प्राकृतमिन्द्रियमित्युच्यते। काचकामलादयः इन्द्रियनिष्ठसमीचीनज्ञानानुकूलशक्तिविघटकाः प्राकृते- न्द्रियाणां दोषाः।

तच्च प्राकृतेन्द्रियं दैवासुरमध्यमभेदेन त्रिविधम्। तेषु यथार्थज्ञानजनकं दैवमिन्द्रियम्, अयथार्थ-ज्ञानजनकमासुरमिन्द्रियम्। यथार्थायथार्थज्ञानजनकं मध्यममिति वदन्ति। स्पष्टञ्चेदं प्रमाणपद्धत्यां प्रमाणचन्द्रिकायाञ्च। न्यायवैशेषिकदर्शने तु कर्मेन्द्रिय-ज्ञानेन्द्रियभेदेन इन्द्रियाणि द्विधा विभक्तानि। परन्तु कर्मेन्द्रियाणां परिगणनं प्रचीनग्रन्थेषु न दृश्यते। न्यायसूत्रे प्रशस्तपादभाष्ये न्यायवार्तिके वादिविनोदे न्यायमञ्जर्यादौ च ग्रन्थे घ्राण-रसन-चक्षु-स्त्वक्-श्रोत्र-मनांसि षडिन्द्रियाण्येव स्वीकृतानि। वैशेषिकैः साधितं मनस इन्द्रियत्वं नैयायिकैस्स्वीकृतम्। ततश्च-न्यायवैशेषिकदर्शने घ्राण-रसन-चक्षु-स्त्वक्-श्रोत्र-मनांसि इति षट् ज्ञानेन्द्रियाण्येव स्वीकृतमिति वक्तव्यम्।

परन्तु सांख्यसूत्रे "उभयमिन्द्रियमिति"१२ कर्मेन्द्रियाणां स्वीकारात् न्यायसुत्रेषु तीर्थान्तरकथित-कर्मेन्द्रियाणामनिषेधात् पश्चात्तनैस्तेषां स्वीकारोऽपि दृश्यते। कर्मेन्द्रियाणां शरीरावयवत्वेन ग्रहणात् नैयायिकैः पृथक् परिगणनं न कृतमिति वा वक्तव्यम्। ततश्च वाक्-पाणि-पाद-पायूपस्थाख्यानि पञ्चकर्मेन्द्रियाणि, वचन-

आदान-विहरण-उत्सर्ग–आनन्दात्मक-पञ्चविधकार्यसाधनात् तत्कार्यस्य अनितरेतरसाध्यत्वाच्च इन्द्रियत्वमिति वक्तव्यम्।

इन्द्रियाणि प्राप्यकारीणि अप्राप्यकारीणि च द्वेधा विभक्तुं शक्यन्ते। दर्शनेषु इन्द्रियाणां विषयैस्सह संनिकर्षः प्रत्यक्षज्ञानोत्पत्तौ हेतुतया वर्णितः। तत्र इन्द्रियं विषयदेशं गत्वा विषयेण संयुज्य तं प्रकाशयति अथवा विषयस्यैव इन्द्रियदेशे आगमने सति तेन संयुज्य तं प्रकाशयति वा इति जिज्ञासाविषयेऽस्मिन् दर्शनकाराणां विभिन्ना आशायाः दृश्यन्ते। अत्र स्फोटवादिनो वैयाकरणाः वदन्ति-तेजोरूपं चक्षुरिन्द्रियं विषयदेशं गत्वैव विषयेण संयुज्य तं प्रकाशयति। अत्र तेजसा दीपादिना चक्षुषः संस्कारे प्राप्यकारिता कारणम् उक्तम्। यतो हि सन्तमसे स्थितोऽपि पुरुषः आलोकानुगृहीतेन चक्षुषा घटादिविषयं पश्यति। यदि चक्षुरिन्द्रियं प्राप्यकारि न स्यात् तर्हि तस्य दृष्टपुरुषनयनगोलकस्थतया कथं बाह्यं विषयं पश्येत्१३ ? इति वाक्यपदीये ब्रह्मकाण्डे प्रतिपादितम्। परन्तु लघुमञ्जूषायां शक्त्याश्रयशब्दनिरूपणावसरे सर्वेषामिन्द्रियाणां प्राप्यकारित्वमुपवर्णितम्।

तत्र आकाशाधिष्ठानक - आहङ्कारिको धर्मविशेषः श्रोत्रेन्द्रियमिति१४ सांख्योक्तं पक्षं आदृत्य प्रत्यक्षक्रमो वर्णितः तदैकरूप्याय घ्राणादीनीन्द्रियाण्यपि पृथिवीजलतेजोवाय्वधिष्ठानकानि आहङ्कारिकाण्येव स्वीकृतानि। आहङ्कारिकस्यान्तःकरणपरिणामत्वात् अन्तःकरणस्य बहुदूरदेशगमनानुभवेन तद्विकाराहङ्कारविशेषाणां सर्वेषामिन्द्रियाणां तत्सम्भवेन प्राप्यकारित्वं अभ्युपगतम्। परन्तु श्रोत्रेन्द्रियं न प्राप्यकारीति वैयाकरणानामाशयः। तेषां मते श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः, एकं च पुनराकाशमिति स्वीक्रियते। ततश्च शब्दस्य आकाशदेशत्वं स्वीकृतम् ततश्च कर्णशष्कुल्यवच्छिन्ननभःप्रदेशस्यैव श्रोत्रेन्द्रियत्वं सिद्धम्। तच्च स्वदेशे समुत्पन्नं शब्दं ध्वन्यात्मकं गृह्णातीति श्रोत्रेन्द्रियस्य अप्राप्य- कारित्वं लघुमञ्जूषायां शक्त्याश्रयनिरूपणावसरे प्रतिपादितम्। धर्मविशेषविशिष्टस्य कर्णशष्कुल्यवच्छिन्नाकाशस्य श्रोत्रत्वस्वीकारात् बाधिर्याद्युपपत्तिरिति चोक्तम्।

एवञ्च चक्षुरिन्द्रियं विहाय अन्यानि ज्ञानेन्द्रियाणि श्रोत्रवत् अप्राप्यकारीणि एवेति स्वीकर्तव्यम्। इन्द्रियाणां प्राप्यकारित्वमेव न्यायदर्शने स्वीकृतम्। तत्र प्राप्यविषयेण संयुज्य इन्द्रियेण क्रियते ज्ञानमित्येव तात्पर्यम्। न तु विषय देशगमने। चक्षुषस्तैजसत्वेन तस्यैव तत्र सामर्थ्यम्१५। प्रतिपादितञ्चेदं इन्द्रियपरीक्षाप्रकरणे न्यायसूत्रेषु न्यायवार्तिके एवं न्ययमञ्जार्यां अष्टमाह्निके च।योगदर्शने अपि सांख्यदर्शनवत् विषयदेशं प्राप्यैव तज्ज्ञापकतेति सिद्धान्तः व्यासभाष्ये वर्णितः। पूर्वोत्तरमीमांसयोश्च इन्द्रियाणां प्राप्यकारित्वमेव स्वी- कृतम् १६। उक्तञ्चेदं शाबरभाष्ये एवं वेदान्तपरिभाषायाः प्रत्यक्षप्रकरणे च।

विशिष्टाद्वैतदर्शने द्वैतदर्शने च इन्द्रियाणां प्राप्यप्रकाशकारित्वमेव सिद्धान्तितम् (यतीन्द्रमतदीपिकायां प्रमाणचन्द्रिकायाञ्च)। जैनदर्शने चक्षुरति- रिक्तानि चत्वारि घ्राणरसन-त्वक् श्रोत्राणि बाह्येन्द्रियाणि, प्राप्यकारीणि मन- स्त्वप्राप्यकारि१७ इति पक्षः तत्त्वार्थसूत्रे स्वीकृतः। बौद्धदर्शने तु अभिधर्मकोशे घ्राण-रसन-त्वगिन्द्रियाणि त्रीणि प्राप्यकारीणि, चक्षुः-श्रोत्र-मनांसि अप्राप्यकारीणि इति स्वीकृतम्। प्रमाणसमुच्चये चक्षुः श्रोत्रे यदि विषयं प्राप्य गृह्णीतः तदा यदिदं दूरे शब्दः, दूरे अर्थ इति व्यवहितग्रहणं न स्यात्, न स्याच्च अधिकपरिमाणानां पर्वतादीनां ग्रहणम्, प्राप्यकारिषु त्वक् रसनादिषु अस्य नियमस्यादर्शनादिति चक्षुःश्रोत्रयोः अप्राप्यकारित्वं समर्थितम्। ततश्च न्यायमते चक्षुरिन्द्रियस्य प्राप्यकारित्वमन्येषामप्राप्यकारित्वम्। अन्यमते श्रोत्रेन्द्रियं विहाय अन्यानि इन्द्रियाणि प्राप्यकारीणि।

वेदान्तिनां मते सर्वाणीन्द्रियाण्यप्राप्यकारीणि इति सिध्यति। तेषु गन्धज्ञान- जनकत्वे सति अतीन्द्रियगन्धवत्वम्, गन्धोपलब्धिसाधनम्, गन्धमात्रग्रहणशक्तमिन्द्रियम् इति लक्षणानि घ्राणस्य यतीन्द्रमतदीपिकादिषु ग्रन्थेषु निरूपितानि। घ्राणञ्च नासाग्रवर्ति पार्थिवमिति दर्शनसिद्धान्तः। घ्राणं पार्थितं गुणेषु गन्धस्यैव ग्राहकत्वात् यदेवं तदेवं विततचम्पाकवत् इत्यनुमानं घ्राणस्य पार्थिवत्वे प्रमाणम्।

गन्धग्राहकं अश्विदेवताकं घ्राणेन्द्रियमिति१८ वल्लभदर्शनम् । रसोपलब्धिसाधनम्, रसज्ञानजनकत्वे सति अतीन्द्रियत्वम्, रसमात्रग्रहणशक्तम् इन्द्रियम् इति रसनेन्द्रियलक्षणानि दृश्यन्ते। रसनेन्द्रियमाप्यं वरुणदेवताकमिति ज्ञेयम्। रूपमात्रग्रहणशक्तम्, रूपोपलब्धिसाधनम्, रूपज्ञानसाधारणत्वे सति इन्द्रियरूपवत्वं चक्षुरिति चक्षुषो लक्षणानि प्रसिद्धानि। तच्च सूर्यदेवताकं तैजसमिति स्थितिः। चक्षुः तैजसं तेजोविशेषगुणेषु रूपमात्रग्राहकत्वात् यद्यत् रूपमात्रतेजोविशेषगुणग्राहकं तत्तत्तैजसम्, यथा प्रभा तेजस्त्वव्याप्यरूपमात्रतेजोविशेषगुणग्राहकवच्चैतत् तस्मात् तथा इति अनुमानं चक्षुषस्त्वैजसत्वे प्रमाणमिति वादिविनोदे।

शरीरव्यापकं स्पर्शग्राहकम् स्पर्शोपलब्धिसाधनम्, स्पर्शज्ञानजनकत्वे सतीन्द्रियस्पर्शवत्वम्, स्पर्शमात्रग्राहकशक्तमिन्द्रियं त्वगिति लक्षणानि तच्च वायुदेवताकं वायवीयमिति, नखदन्तकेशादिषु प्राणमान्द्यतारतम्यात् स्पर्श- अनुपलम्भ इति च ज्ञायते। शब्दोपलब्धिसाधनम्, शब्दज्ञानजनकत्वे सति शब्दवत्वम्, कर्णशष्कुल्यवच्छिन्नदिग्भागः न तु आकाशः, इति श्रोत्रस्य लक्षणानि। इदञ्च दिग्देवताकमिति ज्ञायते। शब्दादिपञ्चके शब्दमात्रग्रहणशक्तं श्रोत्रं तत् मनुष्यादीनां कर्णशष्कुल्यवच्छिन्नप्रदेशवृत्ति द्विजिह्वादीनां नयनवृत्ति इति यतीन्द्रमतदीपिकायाम्। आकाशस्येव श्रोत्रस्यापि नित्यत्वमिति न्यायशास्त्र- विश्वासः। एतेषां इन्द्रियाणां विषयैस्सम्बन्धः क्वचित् संयोगः क्वचित् संयुक्ताश्रयणमिति विवेकः। व्यवहारजनकं वह्निदेवताकमिन्द्रियं वाक्, शिल्पजनकमिन्द्रदेवताकमिन्द्रियं पाणिः, गतिजनकं विष्णुदेवताकमिन्द्रियं पादः, विसर्गजनकं मित्रदेवताकमिन्द्रियं पायुः आनन्दजनकं प्रजापतिदेवताकमिन्द्रियं उपस्थमिति कर्मेन्द्रियाणां लक्षणानि बोध्यानि।

## पादटिप्पणी-

१. प्रमेयरत्नमालायाम्, २-५ । २. प्रमेयकमलमार्ताण्डे प्रमाणपरिच्छेदे, २-५ । ३. १-१-२३, सां. कारिका, २६ ४. पा. सू., ५-२-९३ । ५. न्या. वा., १-१-१२ । ६. प. च.। ७. न्या. क. पृ. ८. त. कौ., पृ. ९. त. चि., पृ. ५८७, तिरुपति । १०. सांख्यसूत्रम्, २/२० । ११. न्या. वा., ३-१-३१ ।१२. सा. सू., १/६१ । १३. वाक्यपदीयम्, ब्र. का. । १४. सां. का., ३६-३७, सांख्यतत्त्वकौमुदी। १५. न्या. सू., ३-१-३३-५३, न्या. वा., १-१-४। १६. शाबरभाष्ये, १-१-१३। १७. तत्त्वार्थसूत्रे, १-१९ । १८. प्रस्थानरत्नाकरे, पृ. २१६ ।

## अधारग्रन्थाः

१. प्रमेयरत्नमाला २. प्रमेयकमलमार्तण्डः ३. सांखकारिका ४. न्यायवार्तिकम् ५. पदार्थचन्द्रिका ६. न्यायकन्दली ७. तर्ककौमुदी ८. तर्ककौमुदी ९. तत्वचिन्तामणिः १०. शाबरभाष्यम्

**डा. भास्कर भट्टः जोशि (बेङ्गळूरु)**

विभागाध्यक्षः, न्याय-वैशेषिकविभागः
कर्नाटक संस्कृत विश्वविद्यालयः
चामराज पेटे-५६००१८
बेङ्गळूरु, कर्नाटक
Mobile No. : 9742269403
E-mail : joshi.bhat@gmail.com

********

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# स्कन्धत्रयोपेतं ज्योतिषम्

**डा. कुमारसुब्रहमण्य भट्ट ए.**
सहायकप्राध्यापकः
संस्कृतविभागः
युनिवर्सिटि कालेज, मंगळूरु

अपरिमिते गगनमण्डले यानि हिः तेजोमयानि बिम्बानि दृश्यन्ते तानि सर्वाण्येव समष्ट्या ज्योतिःशब्देनोच्यन्ते । तेष्वपि यानि हि सदैकरूपगतीनि तानि नक्षत्रशब्देन ज्ञायन्ते, प्रतिदिनं भिन्नभिन्नगतीनि तु ग्रहशब्देन । तेष्वपि पुनः केचिदमृतमयकिरणाः, केचिद्विषमयकिरणाः, केचिदुभयमिश्रकिरणाः, केचित्तूभयधर्म-हीनरश्मयश्च स्मृताः । एवंविधनक्षत्रग्रहतारकादि-ज्योतिःपिण्डानां स्थितिगति- प्रभावादिवर्णनपरं शास्त्रमेव ज्योतिषपदेनाभिधीयते । शास्त्रमिदं ज्योतिषं ज्योति- र्विषयकम् । न केवलमिदं व्युत्पत्यैव अपितु लगधमारभ्य कमलाकरभट्टपर्यन्तं ये खल्वाकरग्रन्थाः प्रणीतास्तत्र शास्त्रमिदं ज्योतिषशब्देनैव व्यवहृतं दृश्यते ।

कथ्यते हि वैदिकसंहितासु तत्र तत्रोपवर्णितम् ज्योतिषविषयमादाय लगधनाम्ना मुनिना प्रणीतो वेदाङ्गज्योतिषाख्यो ग्रन्थ एव विषयेऽस्मिन् प्रथम इति । ज्योतिषशास्त्रप्रवर्तकत्वेन तत्र तत्र सूर्यादयोऽष्टादश ऋषयः स्मर्यन्ते । ग्रन्थकर्तृषु शास्त्रेऽस्मिन् लगधात्परम् आर्यभट-लल्ल-ब्रहमगुप्तवराहमिहिर-श्रीपति-भास्कराचार्य-मुनीश्वर-ज्ञानराज-कमलाकरभट्टाः प्राधान्येन गण्यंते । नवीनेषु नीलाम्बर-बापूदेव-सुधाकर-शङ्करबालकृष्ण-योगेशचन्द्र-केतकर-आप्टे प्रभृतयो विद्वांसः गणकत्वेन परिगण्यन्ते ।

शास्त्रमिदं सिद्धान्त-संहिता-होराभेदेन त्रिषु स्कन्धेषु विभक्तमिति ज्ञायते । तत्राद्यो गणितशब्देनाप्य-भिधीयते । स्कन्धोऽयमपि ग्रहगणित-पाटी गणित-बीजगणित भेदेन विविधः । ब्रहमा, वसिष्ठः, सोमः, सूर्यश्चेत्यस्य प्रवर्तकत्वेन स्मृता आचार्याः, अनन्तरम् आर्यभट-ब्रहमगुप्त-वराहमिहिर-भास्कराचार्य-कमलाकरप्रभृतयः । आर्षः सूर्यसिद्धान्तः आर्यभटस्य आर्यभटीयम्, ब्रहमगुप्तस्य ब्राहमस्फुटसिद्धान्तः, वराहमिहिरस्य पञ्चसिद्धान्तिका, भास्कराचार्यस्य सिद्धान्तशिरोमणिः, कमलाकरस्य सिद्धान्ततत्त्वविवेकश्च स्कन्धस्यास्य मान्या ग्रन्थाः । संहिता-स्कन्धः मुहूर्तादि कालचक्रम् विवृणोति । आर्षत्वेन बार्हस्पत्य-काश्यप-नारदसंहिताः संप्रति दृश्यन्ते, यद्यपि बहव ऋषयः संहितायाः कर्तृत्वेन स्मृता दृश्यन्ते तत्र तत्र । वराहमिहिरस्य बृहत्संहिता विषयेऽस्मिन् प्रामाणिको ग्रन्थः । होरास्कन्धस्तु जातक-ताजिकभेदेन द्विधा विभक्तोऽस्ति । अयमेव फलज्योतिषनाम्नाऽपि व्यवह्रियते । वराहमिहिरस्य बृहज्जातकम् नीलकण्ठस्य ताजिकनीलकण्ठी च विषयेऽस्मिन् प्रामाणिकौ ग्रन्थौ ।

शास्त्रमिदं व्यवहारशास्त्रत्वेन समाद्रियते जनैः । व्यवहारेऽस्योपयोगः बहुमुखः । ग्रहाणां कालावस्थागत्यादिनिर्देशेन कर्मसम्पादकनिमित्तकमुहूर्तादि कथनेन शुभाशुभ-फलकथनेन चेदं शास्त्रं जनान् प्रत्यक्षमेवोपकरोति । शास्त्रदृष्या व्यवहारदृष्ट्या चोपयोगित्वेनेदं वेदाङ्गेषु मूर्धन्यत्वेन स्मर्यते । ग्रहणविषये ग्रहस्थितिविषये पृथ्वीस्वरूप-गतिविषये चास्य मौलिका अपि सिद्धान्ताः । मुहूर्तज्ञानं दिग्ज्ञानं तिथिवारादिज्ञानञ्च ज्योतिषशास्त्रादेव येन विना व्यवहार एव न सिध्यतीति स्पष्टमेवापरिहार्यताऽस्य व्यवहारे ।

ब्रहमा हि जगतः यज्ञसाधननिमित्तं चतुरः वेदान् प्रावोचत् । तेन हि वेदानाम् यज्ञात्मकत्वम् । ते च यज्ञाः कालाश्रयेणैव सिध्यन्तीति ब्रहमा कालावबोधकं ज्योतिषशास्त्रम् विनिर्माय नारदाय प्रोवाच । अस्य महत्त्वमङ्गीकृत्य नारदस्य शास्त्रमिदं लोके प्रवर्तयामास । अन्यच्च शास्त्रं प्रथमं सूर्येण मयासुराय प्रोक्तम् । ततश्च जगति प्रवर्तितम् । ज्योतिषस्य ग्रहगतियुत्यादिविचारको भागः सिद्धान्तपदेनोच्यते । मध्यमाधिकारः, स्पष्टाधिकारः, दिग्देशकालेति त्रिप्रश्नाधिकारः, ग्रहणाधिकारः, छेद्यकाधिकारः, ग्रहयुत्यधिकारः, भग्रहयुत्याधिकारः, उदयास्ताधिकारः, चन्द्रश्रृङ्गोन्नत्यधिकारः, पाताधिकारः, भूगोलाध्यायः मानाध्यायश्चेति संक्षेपेणास्य विवेच्यविषयाः। अयञ्च स्कन्धः संपूर्णं गणितमयः ।

अत्र गणितागतो ग्रहः नभसि दृक्तुल्यताम् समेतीत्यनेन अस्य सिद्धान्तस्कन्धस्य विज्ञानमूलत्वम् सुस्पष्टम् । अत्रैव च अयनांशसाधनम् वर्णितम्, यथा -

"त्रिंशत्कृत्यो युगे भानां चक्र प्राक् परिलम्बते । तद्गुणाद् भूदिनैर्भक्ताद् द्युगणाद्यदवाप्यते ।

तद्दोस्त्रिघ्ना दशाप्रंशा विज्ञेया अयनाभिधाः । तत्संस्कृताद् ग्रहात् क्रान्तिच्छायाचरदलादिकम् ॥"

-श्लोकसंख्ये १, ३०, त्रिप्रश्नाधिकारः सूर्यसिद्धान्तः

सृष्ट्यादौ नाडीक्रान्तिवलययोः सम्पातो यत्रासीत् स निरयणमेषादिः । तदानीमयनांशाभावात् । अयं मेषादिः अत्यल्पगत्या पूर्वाभिमुखं सप्तविंशति भागान् गत्वा, ततः परावृतः सः तयैव गत्या प्रत्यङ्मुखं चलन् स्वस्थानमागत्य ततोऽपि पश्चिमं सप्तविंशतिभागान् याति ततः पुनरपि परावृतः तत्तुल्ययैव प्राग्गत्या स्वस्थानं यदाऽयाति तावदष्टोत्तरशतांश चलनं भवति, तच्चैक परिलम्बनमेको भगणो वा तत्सम्पातबिन्दोः भवति । वेधेन तच्चलनं विज्ञाय एकस्मिन् महायुगे तद्गतिः षट्शततुल्या इति उाखिता । अतोऽनुपातेन इष्टाहर्गणे अयनभगणादिः । एवमभीष्टाहेऽयनचलनांशाः । एतेऽयनांशाः क्रान्तिच्छायाचरदलातिसाधनेऽत्यन्तं मुख्यतया गण्यन्ते । ग्रहक्रान्तिचरादीनाम् सायनमेषादितः प्रवृत्तिः । यथा निरक्षस्थाने भचक्रस्य सममण्डलगत्या भ्रमणाच्चराभावः । दिनरात्रिमानं त्रिंशन्नाडीसमम् । साध्ये देशे चरादिकान्युत्पद्यन्ते । चरति गच्छति उत्तरगोले दिनं, दक्षिणगोले रात्रिमयं कालः इति चरम् । तस्य पूर्वापरविभागेन दलमर्धं चरदलमित्यर्थः । यत्र बिन्दौ परमां काष्ठां गतोऽर्कस्ततः प्रतिकूलदिशि परावर्तितो भवतिस एवायनादिबिन्दुस्तत्र रवेः परमगमनत्वात् तत् क्रान्तेरपि परमत्वं भवति । क्रान्तेः प्रवृत्तिस्तु नाडीक्रान्तिवृत्तयोः सम्पातबिन्दुतो भवति । स च सम्पातोऽ- धुना निरयणमेषादितः अयनांशतुल्यमन्तरितो वर्ततेऽतो वर्तमानसम्पाते क्रान्ते- रभावस्ततः क्रमोपचयात् त्रिभान्तरेऽर्थात् सायनमकरादौ सायनकर्कादौ च क्रान्तेः परमत्वं तदेवायनादिस्थानम् । तथा च क्रान्तेरभावस्थाने रवैर्विषुवद्वृत्ते भ्रमणत्वान्मेषादौ तुलादौ च विषुवद्दिनमिति परिभाषा । अतः सायनविषुवदिने सायनायनारम्भदिने च साधिता क्रान्तिः क्रमेण शून्यसमा परमा च यदि भवेत्तदा सायननिरयणार्कयोरन्तररूपमयनचकलं स्फुटं दृक्तुल्य भवतीति अयनांशसंस्कारः युक्तियुक्त एवेति निष्कर्षः ।

पुराकाले ज्योतिषी एतच्छास्त्राध्ययनं मुख्यत उद्देश्यद्वयेनाकार्षीत् । एकतस्तु एतदचिन्तयत् यत् संपूर्णकृष्याधारभूतं ऋतुपरिवर्तनं सम्यग्ज्ञानं भवेत् । कृषकाय चायं परामर्शः प्रदत्तो भवेत् यत् स कस्मिन् समये किं कार्यं कुर्यात् । द्वितीयमुद्देश्यं दानादिपुण्यकर्मणो यज्ञविशेषानुष्ठानाय, धार्मिकविधिभ्यश्च शास्त्रोक्तकालनिर्णयः । ग्रहणानां शुद्धसमयसूचनं गणितज्ञस्य योग्यताया महान् निकष आसीत् । तदनन्तरं योरोपीयप्रशासनैरेतत् शास्त्रम् अनेन हेतुना समाश्रितं यद् बहुसहस्रक्रोशदीर्घां समुद्रयात्रां कुर्वाणस्तेषां पोता उपयुक्तकाले स्वप्राप्यस्थानानि प्राप्नुयुः । झंझादिमहावातानां मध्ये स्थिता अपि ते एतद् निश्चयं कर्तुं समर्था भवेयुः यत् ते कस्मिन् स्थाने सन्ति ज्योतिषशास्त्रमद्यापि एताः सेवाः समर्पयति । विज्ञानम् अनुभवश्च कदाचन भिद्यते । यथा भूमिः सूर्यं परितः भ्रमति इति विज्ञानम् । किन्तु सूर्य एव भ्रमतीत्यनुभवः ग्रहणां प्रत्यग्गतिरित्यनुभवः । परन्तु ग्रहाणाम् प्राग्गतित्वम् प्रतिपादितं तज्ज्ञैः । किन्तु भूमिसूर्ययोः गतिविषये याथार्थ्यम् अन्यदेवास्ति ।

वस्तुतस्तु न सूर्यः पृथिवीं परिक्राम्यति, न च पृथ्वी सूर्यं परिक्राम्यति । द्वावपि स्वगुरुत्वकेन्द्रं परिक्राम्यतः । एकेनोदाहरणेनेदं स्पष्टीभविष्यति, समानमानौ द्वौ कन्तुकारेकस्य सरलकाष्ठस्योभयोः प्रान्तयोः लम्बमानौ क्रियेते । यदि तस्य दण्डकाष्ठस्य मध्यभागे आश्रयः क्रियते चेत्तदा तत्समं भविष्यति, अन्यथैकेन प्रान्तेन नतं भविष्यति । एवं प्रतीयते यदुभयोः कन्तुकयोः सकलो भारः काष्ठदण्डस्य मध्यबिंदुमाश्रितोऽस्ति । अयं बिन्दुः गुरुत्वकेन्द्रमित्युच्यते । अनेनैवाधारेण तुला निर्मियते । परन्तु यद्येको गोलो गुरुर्भवत्यपरो लघुश्चेत् गुरुत्वकेन्द्रं मध्यभागं विहाय गुरुतरगोलनिकटस्थं भविष्यति । अत्रायं नियमो वर्तते यदेकप्रान्तस्थगोलस्य मानं

केन्द्रात् तस्य दूरताया गुणनफलं अन्यगोलस्य मानेन दूरताया गुणनफलस्य च समानं भवति । एको गोलोऽन्यस्माद् गोलात् यावान् गुरुतरो भविष्यति तावदेव गुरुत्वकेन्द्रं तन्निकटस्थं भविष्यति । एको गोलो यदि अन्यस्माद् शतगुणा- धिकगुरुश्चेत् द्वयोर्गोलयोः गुरुत्वकेन्द्रं महागोलस्याभ्यन्तरे एव भवेत् । अस्यां दशायां मध्यदण्डस्य समत्वरक्षायै महागोले एव कुत्रचित्स्थाने अवलंबो दातव्यो भवेत् । एवं पृथ्वीसूर्ययोरप्यस्ति । अनयोः पिण्डयोर्मध्ये कश्चित् भौतिको दण्डो नास्ति । अनयोः परस्पराकर्षणम् अदृश्यदण्ड श्व एतौ अन्योन्यं बध्नाति । सूर्यः पृथ्वीतः अनेकलक्षगुणो महानस्ति । अतः अनयोः गुरुत्वकेन्द्रं सूर्यकलेवरान्तस्थं वर्तते । उभावपि तं बिन्दुं परिक्राम्यतः । परन्तु तस्याः पृथिव्याः सूर्यान्तःस्थिततत्वात् एवं दृश्यते यत् पृथ्वी सूर्यं परितः भ्राम्यति । एतदेव अन्येषां ग्रहाणाम् विषयेप्यस्ति । अनेनैव नियमेन अस्माकमुपग्रहः चन्द्रमाः पृथ्वीं परिक्राम्यति । कुजगुरुशनिग्रहैः सह ये उपग्रहाः सन्ति तेऽपि अनुमेव नियममनुसरन्ति ।

विज्ञानस्य यावन्तोऽपि भेदाःसन्ति त अन्ततः काञ्चित् शक्तिं प्रतिपादयन्ति । मनोविज्ञानम्, ज्योतिषम्, भौतिकविज्ञानम्, रसायनविज्ञानम्, जीवविज्ञानं- सर्वे यत्किञ्चित्प्रकारां शक्तिं प्रतिपादयन्तो विश्राम्यन्ति । इयं सर्वा शक्तिः एका अस्ति अनेका वा ? किं एकैव शक्तिरनेक भेदा अनेकपक्षान्विता वास्ति ?सा शक्तिः जडरूपा चेतनरूपा वा ? स्वतन्त्रा अथवा कुत्रचिद् आधारितास्तीति प्रश्ना शास्त्राणां सदैषां विषयभूताः सन्ति । अस्मिन् सिद्धान्तस्कन्धे चक्षुषा अथवा दूरवीक्षणयन्त्रेण यादृशी अनुभूति र्जायते तामनुभूतिमन्तरा तत्र किमपि पुष्टप्रमाणं नास्ति । विज्ञानस्य समस्तनियमानां सत्ता इयमेवास्ति यद् वयं स्वानुभूतिषु सम्बन्धस्थापनाय प्रयत्नशीला भवामः येन अस्माकं तुष्टिर्जायेत । संहिताभागः सिद्धान्तभागादपि प्राचीनतरः । अस्य पर्याप्ता सामग्री वैदिकसंहितायां वैदिकसाहित्ये च समुपलभ्यते । वस्तुतस्तु वेदा हि यज्ञप्रयोजकाः तेन वेदेषु यत्किञ्चिदपि प्रोक्तं तत्सर्वं यज्ञार्थमेव । अतो यज्ञनिमित्तकोपयुक्तकाल ज्ञानायैव तत्र ज्योतिषं हि प्रवर्तितम् । रिषयोऽयं संहितासाध्यः ।

तेन प्रथमं संहिता एवं प्रचाताऽसीत् । पश्चाच्च विशिष्टज्ञानाय संहितातः सिद्धान्तभागः पृथक्कृतः । होराभागस्तु सर्वेष्ववर्वाचीनः तत्र संहिताभागः प्राणिमात्रे ग्रहप्रभावं कालास्थितिञ्च निरूपयति, यदा होराभागो व्यक्तिविशेषे एव । तेन हि संहिताभागः सार्वभौमविषयकः ।

अत्र हि सिद्धान्तफातयोरुभवोरेव समन्वयो दृश्यते । सामान्यतः संहिताशास्त्रे सूर्यादीनां विशेषेण नक्षत्रेण सहोदयेन प्राणिषु सम्भवी प्रभावो ग्रहकृतपरिवर्तनं वर्षादियोगाश्च निरूपणीयविषयेष्वन्यतमाः मुहूर्तज्ञानमस्य मुख्यो विषयः । पृथक्शास्त्रत्वेन संहिताभागस्य कदोदयो जात इति तु न शक्यत इदमित्त्थन्तया वक्तुम् । बृहत्संहिताकृत् वराहमिहिराचार्यो हि स्वपूर्ववर्तित्वेन गर्ग-पराशर-असित-देवल-कश्यप-भृतु-वसिष्ठ-बृहस्पति-मन्यु-मय-सारस्वत-ऋषिपुत्रा-दीन्स्मरति तत्र तत्र । तेषां हि ग्रन्थाः संप्रति नैवोपलभ्यन्ते । संप्रति नारदसंहिता पराशरसंहिता गर्गसंहिता भृगु संहिता काश्यपसंहिता वसिष्ठसंहिता च ज्ञायन्ते समुपलभ्यग्रन्थत्वेन ।

बृहत्संहिता वाराहीसंहितेत्युच्यते । वराहमिहिरा चार्योऽस्य प्रणेता । एषा हि तस्य चरमा कृतिः । अत्र च षडधिकशताध्यायाः सन्ति । बहवः वैज्ञानि- कविषया निरूपिताः । तेषु भूकम्पः, उल्कापरिवेषलक्षणम्, नक्षत्राणां व्यूहः, शशिराहुभौमबुधगुरुसितमन्दशिखिग्रहाणां चारः, उदकार्गलम्, ग्रहाणां गोचरः, सस्यविज्ञानम्, प्राणिविज्ञानम् इत्यादयः प्रमुखा विचाराः ।

दकार्गलाध्याये जलोपलब्धिविचारः विस्तरेण कथ्यते । कुत्र वा जलस्य निक्षेपः ?तल्लक्षणोपेता भूमिः कीदृशी वर्तते ? इत्यादिविचारा इत्त्थं निरूपिताः -

"जम्बूवृक्षस्य प्राग्वल्मीको यदि भवेत् समीपस्थः । तस्माद्दक्षिणपार्श्वे सालं पुरुषद्वये स्वादु ॥ ९ ॥

बल्मीकोपचितायां निर्गुण्ड्या दक्षिणेन कथितकरैः । पुरुषद्वये सपादे स्वादु जलं भवति चाशोष्यम् ॥" १४ ॥

बृहत्संहिता ५४ अध्याय

बहुकालपर्यन्तं जलं कुत्र वा स्यादित्युच्यते -

"अर्धपुरुषे च मत्स्यः पारावतसन्निभश्च पाषाणः । मृद्भवति चात्र नीला दीर्घं कालञ्च बहुतोयम् ॥" १० ॥ -

बृहत्संहिता

जलाभावलक्षणञ्चोक्तं यथा -

"सूर्याग्निभस्मोष्ट्रखरानुवर्णा या निर्जला सा वसुधा प्रदिष्टा ॥" १०६ ॥ - बृहत्संहिता

वराहमिहिरानन्तरं संहितैव लुप्तप्राया इतिवद्धाति । संहिताविषयेषु केवलं मुहूर्तखण्डमेव संप्रति सजीवम् । मुहूर्तो नाम कृत्यनिमित्तनिश्चितसमयः कृत्यविशेषनिमित्त ग्राह्याग्राह्यतिथिवारनक्षत्रादि विचारणैव मुहूर्तग्रन्थस्य प्रयोजनम् । सामान्यतो मुहूर्तस्य व्यवहारेण सहाऽपरिहार्यः सम्बन्धः । निषेकादि- श्मशानान्ता ये संस्काराः, कर्षणादारम्भ कुसूलपूरणपर्यन्तः यत्कृषिकर्म, चुटिकानिर्माणादिकं यत् गृहकर्म, यात्रारम्भः, शिलान्यासादारभ्य गृहप्रवेशपर्यन्तं यन्निर्माणकर्म ते सर्वेऽपि शुभमुहूर्ते एव भवन्ति । सामान्यतो यत्र ग्रहस्थितितिथिनक्षत्रादिद्वारा मनुष्यस्य सुखदुःखाद्यावाप्तिः निर्णीयते तदेव होराशास्त्रम् इत्युच्यते । होराशब्दो हि अहोरात्रशब्दस्य आद्यन्ताक्षरविलोपेन निष्पन्न इति केचिद्वदन्ति । वराहमिहिराचार्यो यथाह -

"होरेत्यहोरात्रविकल्पमेके वाञ्चन्ति पूर्वापरवर्णलोपात्" - बृहत्संहिता

लग्नेऽर्थे होराशब्दः सर्वत्रैव प्रयुक्तः । होराशास्त्रविषयो हि मनुष्यस्य प्राग्जन्मोपार्जितकर्म सदसत्फल-कथनमेव । यथोक्तं बृहज्जातके - "कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति ॥" - I-३

यथा वा प्रश्नमार्गे - "यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् ।
व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ॥" - I-३

ग्रहाणां साक्षात् फलदातृत्वं न विद्यते । ते तावत् शुभाशुभफलानि सूचयन्ति स्वस्थितिगत्यादिभिः । ननु शुभस्य अशुभस्य वा अवश्यंभाविनः किं व्यनक्तीत्यपेक्षायाम् उच्यते - द्विविधं शुभाशुभम् । दृढकर्मोपार्जितम्, अदृढकर्मोपार्जितम् च । तत्र दृढकर्मोपार्जितस्य दशाफलं पाकक्रमेण व्यनक्ति । अशुभं दशाफलं ज्ञात्वा यात्रादेः परिहारः कर्तव्यः शुभं ज्ञात्वा प्रवृत्तिः ।

अदृढकर्मोपार्जितस्य अष्टकवर्गेण फलव्यक्तिः । तच्चाशुभं ज्ञात्वा शान्तिः कार्या ।

यदि हि दृढकर्मार्जितमशुभं तदा तस्य परिहारं कुर्यात् । यदा त्वदृढकर्मार्जिताशुभं तदा पौरुषेण तद्धन्यादिति फलादेशस्य प्रयोजनम् । ग्रहा हि पूर्वजन्म कर्मार्जितं शुभाशुभफलं व्यञ्जयतीत्येतस्य कथनस्यायमेवाशयो यद्यस्य यादृक् सञ्चितं कर्म स तदनुकूले समये जन्म लभत इति । ग्रहनक्षत्राण्यपि तथैव यथायोग मनुकूलाः प्रतिकूला वा भूत्वा शुभमशुभं वा प्रकटयन्ति च । शुभाशुभज्ञानानन्तरं मनुष्यः शान्त्यादि विविधोपायेनाशुभं परिहर्तुं प्रभवेदिति फलादेशस्य महत्त्वम् । यस्य जन्मनि यस्य यस्य ग्रहादेः प्राबल्यं स तत्समानप्राकृतिक एव भवतीति मेलापका दावस्य सुमहत्प्रयोजनम् । अत एवोक्तं त्रिस्कन्ध ज्ञो नावसीदतीति ।

ज्योतिर्विद्भिः होराशास्त्रं हि पञ्चधा विभक्तमस्ति जातकम्, ताजिकम्, रमलम्, प्रश्नः स्वप्नश्चेति । तेष्वपि सर्वातिशयित्वेन जातकस्यैव प्राधान्याद् यदा कदा होराशास्त्रमेव जातकशब्देनाप्यभिधीयते ।

यत्र तत्र जन्मकालग्रहनक्षत्रतिथिराश्यादीनामाधारीकृत्य फलादेशः क्रियते तज्जातकम् । जातकसंबद्धग्रन्थाश्च बृहज्जातकजातकपारिजातादयः यत्र च गोचरमाधारीकृत्य फलादेशः क्रियते तत् ताजिकम् । ताजिकग्रन्थाश्च ताजिक- नीलकण्ठीप्रभृतयः । यत्र च प्रस्तारद्वारा शुभाशुभफलं कथ्यते तद्रमलशास्त्रम् । रमलग्रन्थाश्च रमलनवरत्नादयः । यत्र च प्रश्नलग्नमाश्रित्य फलादेशः क्रियते, तत्प्रश्नशास्त्रम् । प्रश्नग्रन्थाश्य प्रश्नमार्ग प्रश्नसारादयः । यत्र हि जन्म- कालिकग्रहाद्यवस्थितिमाधारीकृत्य जनस्य भूतवर्तमानभाविशुभाशुभ फलादेशः क्रियते तज्जातकशास्त्रम् । स्वस्थानां पिण्डानां भूस्थितैर्जनैः सह सम्बन्धः सहसा न प्रतीतिमायाति । किन्तु तयोः अविच्छेद्यः सम्बन्धोऽस्त्येव यथार्थतः ।

सूक्ष्मावलोकनेन एतत्स्पष्टमेव ज्ञायते यद्यत्प्रकृतिको यस्य जन्मनक्षत्रतत्स्वामि, राशितत्पति, लग्नतत्प, मासतत्पतिवासरतिथितत्पतीत्यादिः तत्प्राकृतिक एव जनो भवतीति । यथा हि मेषराशौ जातः जनः जलात्विभेति।

मेषराशेः स्वामी कुजः स च वह्निप्रकृत्को जलविमुखः । एवमेव सिंहस्य स्वामी रविः । तद्राशौ जातो निश्चयमेव पित्तप्रकृति-कोऽल्पवाचश्च भवति । यदि योगान्तरवशात् कस्मिंश्चिन्नापि सर्वाणि लक्षणानि घटेरंस्तथापि स्वल्पमपि जन्मराशिप्रभाव देहे दृश्यत एव । एवमेव नक्षत्रादीनामपि । तेन जातकफलादेशात् पूर्वं स्वस्थपिण्डज्ञानं आवश्यकमेव ।

गगने या हि तारका दृश्यन्ते दूरतो दर्शनेन समप्रकृतिवत् भासमानास्वपि तासु आभ्यन्तरं महदन्तरं विद्यते । तत्र काश्चन अतिस्थूलाः कतिपयास्तु नितान्तकृशाः काश्चि ज्जोतिर्मया अपरा ज्योतिर्हीना वा स्वल्पज्योतिष्काः । काश्चिच्चलनशीला अपरास्तु सदा स्थिराः । गतिमतीस्वपि काश्चिच्छीघ्रगतिका अपरास्तु मन्दगतिका अपि ।

जातकस्य हि जन्मकाले यो राशीःक्षितिजस्य पूर्वभागे भवति स एव तस्य लग्न-राशीः । तदारभ्य परिगण्यन्ते द्वादश भावाः । एते भावाः कपिताः फलादेशाय । अत्र फलचिन्तनस्य मूलस्त्रोतः लग्नमेव । एतल्लग्नम् गणितागतमिति होराशास्त्रस्य आदिमं सोपानम् सुभद्रम् ।

जात एव जातकः तमधिकृत्य कृतं तन्त्रं जातकमिति जातकपद- निष्पत्तिः । अस्यैव जातकस्य कुण्डलीति पर्यायम् नाम विद्यते । न केवलं ग्रहा नरस्य जातकोक्तविषये शुभाशुभफलं वा स्थितिं निर्दिशन्ति, अपि तु स्वयमेव नरो ग्रहमयः । यथोक्तम् -

"कालात्मा दिनकृन्मनस्तुहिनगुः सत्वं कुजो ज्ञो वचो जीवो ज्ञानसुखे सितश्च मदनो दुःखं दिनेशात्मजः ॥" इति ॥

बृहज्जातकम् ३-२

सिद्धान्तस्कन्ध एव ज्योतिषस्य जातकस्कन्धोऽपि मौिक एवास्माकम् । तत्र तत्र प्राचीनग्रन्थेषु शुभमुहूर्त प्रभृतिविषयस्योल्लेखो दृश्यते फलादेशप्रक्रियाश्च । स्मर्यन्ते बहवो जातकग्रन्थाः प्राचीनाः बृहज्जातकादौ येषां विषये न विद्यतेऽ- स्माकं ज्ञानं पर्याप्तम् । कथ्यते हि नारदकश्यपवसिष्ठपराशर भृगुप्रभृतिभिः मुनिभिः जातकशास्त्राणि प्रोक्तानि प्रणीतानि वाऽसन् । संप्रत्यपि पराशरभृगुजैमिनि प्रणीतत्वेन केचन फलतज्योतिषग्रन्थाः लभ्यन्ते कामं तेषां रचनाशैली विषयाश्चार्वाचीनाः प्रतिभान्ति । पौरुषेय ग्रन्थेषु बृहज्जातकम्, सारावली, जातकपारिजातः, जातकालङ्कारः, जातकाभरणं, होरारत्नञ्च प्रसिद्धाः ।

एतच्च होराशास्त्रम् शिशोः यावज्जीवम् प्राक्तनसदसन्मिश्रकर्मज- शुभाशुभमिश्रफलनिरूपकम् विद्यते । तच्च शुभाशुभविवेकाय जीवस्यावश्य- मपेक्षितम् । जीवः चतुर्विधः । जरायुजः, स्वेदजः, अण्डजः, उद्भिदिति ।

एवं मनुजपशुविहंगतरूणां चतुर्विधानि जातकानि होराशास्त्रे प्रथितानि । तत्र मानवपशुवत् पक्षिवृक्षयोः उत्पत्तिकालः सुखेन बोद्धुं न शक्यः । मानुषवत् पशोः हिताहितादिज्ञानाऽसंभवात् तमुपेक्ष्य नरजातकमेव जातकशास्त्रे बहुधा प्रपञ्चितम् । तच्च फलकथनम् इष्टकालसापेक्षम् ।

स च चतुर्विधः - अधानकालः, शीर्षोदयकालः, जलोदयकालः, भूपतन- कालश्चेति । शिशोः भूपतनादेव जन्मलग्नस्य निर्णय इति विदुषांमतम् । अयञ्च भूपतनकालः स्फुटैः छायादियन्त्रैः अवगम्यः । सिद्धान्तपारदृश्वना निरुढ- होरातन्त्रतत्वज्ञेन दैवविदा प्रोच्यमानं सर्वमपि शुभाशुभं फलं न कदापि व्यभि-चरति । अमुमर्थं व्याचष्टे वराहमिहिरः -

"तन्त्रे सुपरिज्ञाते लग्ने छायाम्बुयन्त्रसंविदिते । होरार्थे च सुरूढे नादेष्टुः भारती वन्ध्या ॥" इति शम् ॥

**Dr. Kumarasubrahmanya Bhat A**
Associate Professor, Dept. of Sanskrit
University College, Mangalore-575001
Dakshinakannada, Karnataka
Mobile No. : 9448869289, E-mail : ksbamai@gmail.com

**********

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# अलङ्कारस्य काव्यशास्त्रीयसमीक्षा तस्य सन्निवेशश्च

**रमेशचन्द्र बरमोला**
अतिथि-व्याख्याता
मुम्बादेवी आदर्शसंस्कृतमहाविद्यालयः, मुम्बई

अलङ्क्रियते अनेनेत्यलङ्कारः । एष अलङ्कारशब्दः अलमिति शब्दे उपपदे डुकृञ् करणे इति धातोः `अकर्तरि च कारके संज्ञायाम्'१ इत्यनेन सूत्रेण घञि प्रत्यये सति शोभासाधनार्थे निष्पद्यते । मण्डनम्, आभरणम्, विभूषणञ्च इति अलङ्कारशब्दस्य नामान्तराणि, यथा अमरकोषे - 'अलङ्कारस्त्वाभरणं परिष्कारो विभूषणं मण्डनं चेति२।

अलङ्कारतत्त्वज्ञ आचार्यो दण्डी काव्यादर्शे अलङ्कारं लक्षयति - 'काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते'३।। ये धर्माः काव्यस्य शोभां कुर्वन्ति ते अलङ्कारा इत्याशयः। अत्र आचार्येण दण्डिना अलङ्कारेषु काव्यशोभायाः साक्षात् कर्तृत्वं दर्शितं वर्तते ।

आचार्यवामनस्तु तन्निरस्यति कथयति च - काव्यशोभायाः कर्तारो धर्मा गुणाः'४ 'तदतिशयहेतवस्त्वलङ्काराः'५ ।। ये धर्माः काव्यस्य शोभां कुर्वन्ति ते माधुर्यौजःप्रसादादयो गुणाः, ये पुनः तस्या अतिशये हेतुभूताः ते उपमानुप्रासादयः अलङ्कारा भवन्तीति अस्याभिप्रायः । ततश्च वामनस्य मतेन अलङ्काराः साक्षात् काव्यशोभायाः कर्तारो न भवन्ति किन्तु तस्या अतिशये हेतुभूताः भवन्ति । गुणाः तावत् साक्षादेव शोभां जनयन्ति, काव्यत्वं चानयन्तीति वैलक्षण्यं सिध्यतीति विभावनीयम् ।

पुनश्च 'सौन्दर्यमलङ्कारः'६ इत्यभिदधत् स एव काव्यगतं सर्वमपि सौन्दर्यम् अलङ्कारशब्देन परिगृह्णाति । सौन्दर्यरूपश्च तदलङ्कारः 'दोषगुणालङ्कारहानादानाभ्याम्'७ इति सूत्रोक्तप्रकारेण दोषाणां परित्यागाद् गुणानाम् अलङ्काराणां चोपादानात् जायते इति मनुते । अलङ्कारश्चायम् अलङ्कार्यस्य उत्कर्षाधायकं तत्त्वं केवलं भवितुमर्हति, न तु जीवनाधायकं स्वरूपाधायकं च । यतोहि आभूषणानि विना स्त्री काचित् सुन्दरी उत्कृष्टा वा न प्रतीयेत, स्यान्नाम, जीविता तु अवश्यं भवति । एतेन काव्येष्वलङ्काराः सन्ति चेत् उत्कर्षः, अथ न सन्ति काव्यस्य न काऽपि हानिः । तस्मादेव काव्येषु अलङ्कारा अस्थिरा धर्माः कथ्यन्ते ।

किञ्च एतदेव गुणालङ्कारयोः भेदकतत्त्वं वर्तते । गुणास्तावत् काव्येषु स्थिराः अपरिहार्याश्च, उक्तञ्च काव्यलक्षणे मम्मटेन - "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि"८ ।। अत्र अनङ्कृती पुनः क्वापीत्यनेन सूच्यते यद् अलङ्काराभावेऽपि काव्ये न कापि क्षतिरिति । आचार्यमम्मटभट्टः अलङ्कारमित्थं लक्षयति

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचिद् । हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः९ ॥

उपमानुप्रासादयश्चेमे अलङ्काराः कण्ठहस्तादिशोभाजननद्वारा आत्मानं शोभयन्तो हारादय इव शब्दार्थयुगलसौन्दर्यजननद्वारा प्रधानभूतं रसं उपकुर्वन्ति । अत्र जातुचिदित्यनेन अलङ्काराः कदाचिदेव रसम् अलङ्कुर्वन्ति न तु सर्वदा । अतोऽलङ्काराणां काव्ये अस्थिरत्वमेव सिद्धं भवति । साहित्यदर्पणे आचार्यो विश्वनाथोऽपि अलङ्काराणाम् अस्थिरत्वमिति मतं दृढीकरोति- शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।

रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्१०॥

अलङ्कारा अङ्गादादिवत् शब्दार्थयोः शोभावर्धकाः, रसादीनां चोपकर्तारः । प्रसादादिगुणवत् अलङ्कारा न अपरीहार्याः, अत एवैते अस्थिरा धर्मा उच्यन्ते इत्यस्याशयः ।

काव्ये अलङ्काराणां सन्निवेशः - अलङ्काराः सौन्दर्याधायका इति सत्यमेव तथापि तेषामुपनिबन्धने कविभिः सातिशयं सावधानैः भाव्यम् । प्रतिभाशालिनः कवयो न कदापि प्रयत्नपूर्वकम् अलङ्कारसंयोजनम् इच्छन्ति । तत् सहजतयैव सिद्ध्यति तेषाम् । काव्यप्रतिपाद्यानां रसभावानाम् उपस्कारकतया अलङ्कारा यदा निवेश्यन्ते तदैव काव्यस्य शोभातिशयः सम्भवति । सन्निवेशस्य अनुगुणतया प्रयुक्ताः शब्दालङ्कारा अपि सौन्दर्यपोषका जायन्ते । अप्रसङ्गे प्रयुक्ताः अनुचिततया वा प्रयुक्ता अलङ्काराः पाण्डित्यविशेषस्य प्रकाशकाः

भवन्तोऽपि आत्मभूतस्य ध्वनेः पोषका न भवन्ति, प्रत्युत भञ्जकाः, काव्यस्य कृत्रिमतां चापादयन्ति । तादृशालङ्कारसम्पन्नानि काव्यानि चित्रकाव्यानीति व्यपदिश्यन्ते । एतद्विषये आचार्य आनन्दवर्धनः काव्येऽलङ्कारप्रयोगप्रसङ्गे कविना पालनीयान् नियमान् समीक्षाप्रकारांश्च इत्थं बोधयामास -

रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत् । अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः ११ ॥

विवक्षा तत्परत्वेन नाङ्गित्वेन कदाचन। काले च ग्रहणत्यागौ नातिनिर्बर्हणैषिता १२ ॥

निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम्। रूपकादेरलङ्कारवर्गस्याङ्गत्वसाधनम् १३ ॥

अलङ्कारास्तावत् उत्तमकाव्ये रसपरतन्त्रतया विन्यसनीयाः । ते च अप्रयत्नसिद्धा भवेयुः । प्रधानभूतस्य रसस्य परतया अलङ्कारविवक्षा भवेद् । अलङ्काराः सर्वदाऽङ्गभूता भवेयुः । समुचिते काले अलङ्काराः स्वीकरणीयाः । अलङ्कारैः आदितोऽन्तं यावत् पोषणं कर्तव्यमिति अभिनिवेशः त्याज्यः । प्रतिभावतां कवीनां काव्येषु अलङ्कारा अपृथग्यत्ना निर्वर्तन्ते इति हेतोः अहमहमिकया परापतन्ति । हृदयतोषकाणां वाक्प्रकाराणाम् अनल्पतया तद्रूपा अलङ्कारा अपि अनल्पाः भवेयुः।

आनन्दजनका भावरामणीयकचमत्कारा एव मूलमलङ्काराणाम् । यद्यप्यलङ्काराः समग्रलक्षणलक्षिता भवन्ति तथापि रसध्वन्युपस्कारकाणाम् अलङ्कारता सिद्ध्यति । केचित् रसमप्यलङ्कारं मन्यन्ते-तन्न युक्तम् । यतोहि रसो न कमप्यलङ्करोति । अपितु स्वयमलङ्कार्यो भवति । यो हि अप्रधानः सन् जायमानः अन्यमलङ्करोति स एवालङ्कारशब्देन व्यपदेश्यो भवति । अतो रसः केवलमलङ्कार्यो भवति, न त्वलङ्कारः ।

अलङ्काराणाम् अभावेऽपि कवेः चातुर्यवशात् रसाः प्रतीयेरन् । केषुचित् स्थलेष्वेव रसानां पुष्टिं सम्पादयन्त्यलङ्काराः । कदाचित् शब्दालङ्कारा रसभञ्जका अपि भवेयुः । अतः तेषां प्रयोगे कविभिः सावधानैः भवितव्यम् । यदि तत्र रसो न भवेत्तदाऽलङ्काराः केवलं शब्दार्थयोः वैचित्र्यमात्रम् ।

यथालङ्कारा अङ्गभूतानां कण्ठादीनां शोभां जनयन्तोऽन्ततः अङ्गिन आत्मनः शोभां सम्पादयन्ति तथा उपमानुप्रासादयोऽपि शब्दार्थानां वैचित्र्यं जनयन्तः पर्यवसानेऽङ्गिभूतस्य रसस्य सौन्दर्यसम्पादकाः भवन्तीति शम् ।

**पादटिप्पणी-**

१. अष्टाध्यायी, ३-३-१९ । २. अमरकोषः, २-१०१ । ३. काव्यालङ्कारः, २-१ । ४. काव्यालङ्कारसूत्रम्, ३-१-१ । ५. काव्यालङ्कारसूत्रम्, ३-१-२ । ६. काव्यालङ्कारसूत्रम्, १-२ । ७. काव्यालङ्कारसूत्रम्, १-६ । ८. काव्यप्रकाशः, १-४ । ९. काव्यप्रकाशः, ८-८८ १०. साहित्यदर्पणः, १०-१ । ११. ध्वन्यालोकः, २-१६ । १२. ध्वन्यालोकः, २-१८ । १३. ध्वन्यालोकः, २-१९

**रमेशचन्द्र बरमोला**
अतिथि-व्याख्याता
मुम्बादेवी आदर्शसंस्कृतमहाविद्यालयः,
केन्द्रीयविश्वविद्यालयेन सम्बद्धः
भारतीयविद्याभवनम्, मुम्बई,
महाराष्ट्रम् - 400007
Mob. 9449899733
Email- rameshcbarmola111@gmail.com

*********

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# हस्तलेखशास्त्रपरिचयः

**डा. रामकृष्ण भट्टः. के**
सहायकप्राध्यापकः, हस्तप्रतिशास्त्रविभागः
कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु

भारतवर्षमिदं ज्ञानसम्पदा शोभितं सर्वत्र गुरुत्वेन च राराजते । तद्धेतुश्च अत्रत्य ज्ञानसम्पत् लौकिकश्च सम्पत् । अत्र च विद्या चतुःषष्ठिभेदात्मिका कला अपि तावत्य एव आसन् । एतासां सर्वासाम् अध्यापनं विना ग्रन्थं श्रवणेनैव माध्यमेन बहुकालपर्यन्तमप्यभूत् । सर्वासां विद्यानां संरक्षणं केवलं श्रवणादिना नैव शक्या इति तेषां संरक्षणाय ब्रह्मा सृष्टेरादावेव लिपिं ससर्ज१ । अथ च वेदे गायत्रिया परिलिखतीतिर२लेखनकलाया उल्लेखो दरीदृश्यते । स्मृतिषु३ पुराणेषु तन्त्रग्रन्थेषु४ काव्येषु५ च लेखन कलाविचारः उल्लिखितो वर्तते । अपि च श्रूयते अग्रहारेषु गुरुकुलेषु चैत्य विहारेषु मन्दिरेषु प्रासादेषु ज्ञानसम्पदायुताः तालभूर्जादिषु लिखिता हस्तप्रतयोऽ भूवन्निति । तैर्विना अग्रहाराणि आश्रमाणि च देवेनरहितदेवालयवत् परिगण्यते स्म । विद्वांसः स्वलिखितान् लेखितान् वा हस्तप्रतिविशेषान् शिष्यैः लिपिकारैर्वा प्रतिलिपिं कारयित्वा विद्वदन्तरं प्रेष्यते स्म । स च विद्वान् तं ग्रन्थं पठित्वा तदुपरि टीकां व्याख्यानं खण्डनं वा विधाय प्रतिलिपिं कारयित्वा प्रेषयति स्म इति । एताश्चैवंविधा हस्तप्रतयः भूर्जपत्रेण तालपत्रेण वा युता भवन्ति । आबहोः कालीनं पुरातनश्चेदमिति कृत्वा अस्याः संरक्षणं अवश्यमेव कर्तव्यम् । यदग्रेपि ज्ञानस्य प्रसारणमिष्यते तर्हितच्च संरक्षणं कथं विधेयमिति प्रश्ने अस्माकं प्राञ्च एवाहुः -

तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबन्धनात् । मूर्खहस्ते न दातव्यमेवं वदति पुस्तकम्६ इति।

ततश्च कश्चन लिपिकारोप्येवं जगाद - भग्नपृष्ठकटिग्रीवा बद्धदृष्टिरधोमुखम् । कष्टेन लिखितं ग्रन्थं यत्नेन परिपालयेत्७ ॥ इति ।तदारभ्य अद्यावधि यथा प्रकाशनसौलभ्यं वर्तते न तथा तदानीं काले अरर्तिष्ट । तदा लिखितं यद्वर्तते तस्य अनेका हस्तप्रतयः अक्षरशः कर्तव्या आसन् । तदर्थमेव राजभिः विद्वद्भिः लिपिकारा नियुक्ता भवन्ति स्म । तैश्च कष्टेन प्रतिलिपिः श्रद्धया अलिखि । तस्य च संरक्षणमस्माकं परमं कर्तव्यम् ।

तत्रादौ हस्तप्रतयः जलात् तैलात् आतपात् वायोश्च परिरक्षणीयः । यतः हस्तप्रतयः तालपत्रे भूर्जपत्रे वा सामान्येनोपलभ्यन्ते । पत्राणि च जले क्वथयित्वा शुष्कीकृत्य निर्मितानि भवन्ति । पुरातनानीत्यतः सूक्ष्माणि भवन्ति । जलेन यदि निहिताः स्युः तदा अक्षराणां नाशेन सह पत्रमपि मृदु जायते येन छिन्नं खण्डखण्डश्च स्यात् । तैले पतितश्च विविधान् कीटान् आकर्षयति । अधिकमप्यातपात् न सहते पत्रम् । तस्मात् तीव्रात् आतपात् वायोश्च पत्राणि संरक्षणीयानि । पत्रेभ्यः एभ्यः कीटानां बाधा महती भवति । तत्रादौ पापटकः अयश्च अत्युष्णे प्रदेशे अधिकं वर्धते । पुस्तके एव जन्म प्राप्नोति तस्य निरोधाय हस्तप्रतयः वातानुकूलितप्रदेशे संरक्षणीयाः । अन्यथा इमे कीटाः ग्रन्थकीटा इत्यपरनामा हस्तप्रतौ रन्ध्रं कुर्वन् सम्पूर्णं नाशयति । धूलिः वायोः प्रवेशः अवरोद्धव्यः । वयुरेव धूलिं वहति धूलिश्च पुस्तकेषु कीटानां प्रवेशाय सहकारि भवति । म्यास्ट्रलस् इति कश्चन कीटविशेषः धूल्यैव पुस्तकं प्रविशति । पुस्तकस्य कोणेषु अण्डान् स्थापयति । ते च अण्डाः शीघ्रमेव कीटा भवन्ति पुनश्च पञ्चदशेषु दिनेषु अण्डान् स्थापयति । कश्चन विशिष्टं द्रवं पुस्तकेषु त्यजन्ति । तेन मातृकाः नश्यन्ति । अतः तेभ्यः संरक्षणं मुख्यं कर्म भवति ।

मातृका इति पदस्य पाण्डुलिपिः, पाण्डुपत्रम्, हस्तलेखः, तालकोशः, ताडकोशः इत्यादीनि पर्यायपदान्युपलभ्यन्ते । मातृका नाम अक्षरम् अथवा वर्णः इत्यर्थः । अक्षराणि वर्णाः वा यत्र लिख्यन्ते सापि मातृका इत्यभिधीयते । पाण्डुवर्णकं पत्रं पाण्डुपत्रम् । पाण्डुवर्णयुते पत्रे या लिपिः सा पाण्डुलिपिः । भूर्जपत्रमपि पाण्डुपत्रत्वेन उल्लिख्यते । दक्षिणदेशे उपयुज्यमानं श्रीतालं तालपत्रमपि पाण्डुलिपिपदेनाभिधीयते । पाण्डुलिपिम् अर्थात् पाण्डुपत्रे लिखिता या लिपिः यश्च विषयः वा तदधिकृत्य वा यत्र विचारः भवति तत् शास्त्रं पाण्डुलिपिशास्त्रमित्यभिधीयते ।

मनुष्यलेखमधिकृत्य यत् चिन्तयति शास्त्रं तत् मातृकाशास्त्रं, पाण्डुलिपिशास्त्रं, हस्तलेखशास्त्रं, हस्तलिपिशास्त्रम् इत्यादि पदैरभिधीयते ।मातृका नाम हस्तेन लिखितः कोऽपि ग्रन्थो यत्र साहित्यं वा शास्त्रं वा विषयः । यद्यपि देयकानि स्वीकृतिपत्राणि, गणनालेख्यानि, अधिकृतानि पत्राणि च हस्तेनैव लिखितानि समुपलभ्यन्ते तथापि तेषां मातृकात्वरूपो धर्मो नास्ति । हस्तेन लिखितानां साहित्यानां शास्त्राणां वाऽध्ययनं ग्रन्थसम्पादन- शास्त्रस्य विषयः । प्राचीनान्यधिकृतानि पत्राणि नात्रान्तर्भवन्ति तेषां पत्रागार (Archives) विभागेऽ- न्तर्भूतत्त्वात् । अधिकृतानां व्यावहारिकाणां वा विषयाणां पंजीकृतिः कार्पासेन शणेन निर्मिते दीर्घे पटे समुपलभ्यते यस्याः पटः, कार्पा- सिकपटः, पटी, पटिका इति चत्वारि नामधेयानि । शणेनापि पटोऽयं वैरल्येन नि- र्मीयते। कन्नडभाषायां 'कडित' अथवा 'कडत' इति संज्ञाऽस्य पटस्य । शिलायन्त्रेण कागदेषु मुद्रितानां तथा दारुफलकेषु मुद्रितानां मातृकात्वमस्तीति केचन आकारसादृश्येन भ्राम्यन्ति। परन्तु तेषामपि नास्ति मातृकात्वम्। शिलासु स्तम्भेषु प्राचीनवास्तुगतकुड्येषु भाजनेषु, अस्थिषु लोहशरावेषु च टङ्कितानि शासनानि शासनशास्त्रस्य विषयः। स्तोत्राणि प्रशस्तयश्च कदाचिदल्पया मात्रया शिलाशासनेषु ताम्रपत्रेषु चोपलभ्ये- रन् । अत्यन्तमवधेयाः साहित्यरचनाः कदाचिदासु सामग्रीषु दृश्येरन् । लेखनमिति शब्दो तालपत्रादिषु लेख्यसामग्रीषु लेखनमित्यर्थेन सार्धं, शिलासु उट्टङ्कनं, भूमौ लिखितमित्यन्यस्मिन्नर्थद्वये प्रयुज्यते।

मातृका नाम वर्णमालिका । मातृकेति शब्दस्य 'हस्तलेखनयुक्ता पत्रिका' इत्यर्थः कस्मिन्नपि कोशग्रन्थे न दृश्यत इत्येतदाश्चर्याय नः। मातृकायस्यां लेख्यसामग्र्यां लिख्यन्ते साऽपि मातृका । पूर्वस्मिन् काले मातृकेति शब्दः मूलप्रतिरथवा आदर्शप्रतिरित्यर्थे प्रयुज्यते स्म । इदमर्थे दक्षिणभारते प्रायिकोऽस्य प्रयोगः। आदर्श इति शब्दोऽप्यमुमेवार्थं वक्ति। 'पुस्तकम् इति शब्दः प्राचीने काले हस्तप्रतिरित्यर्थे प्रयुज्यते स्म । “दोर्भिर्युक्ता चतुर्भिः' ८ इत्यादिपद्ये तथा “पुस्तकस्था तु या विद्या” ९ इत्यादिश्लोके पुस्तकशब्दस्य प्रतिरित्येवार्थो न पुनर्मूलग्रन्थ इति । मूल-ग्रन्थ इत्यर्थेऽस्य प्रयोगो कल्याणचालुक्यवंश्येन तृतीयसोमेश्वरेण विरचिते राज-मानसोल्लासे 'जगदाचार्यपुस्तकम्' इत्यत्र उक्तः पुस्तकमितिशब्दः योऽत्यन्तं विरल आसीत् प्राचीनकाले। परन्त्वद्यत्वे पुस्तकमिति शब्दस्य मूलग्रन्थ इत्यर्थः सार्वत्रिको दृश्यते। 'कोश' इति 'कोष' इति वा शब्दः सूत्रबद्धपत्रः कोश इत्यर्थे प्रयुज्यते। 'हस्तप्रति'रिति शब्दस्त्वाधुनिकः । प्रायशः 'प्रतिकृति'रिति शब्दस्याहोस्वित् 'प्रतिनिधि'रिति शब्दस्याथवा 'प्रतिमे'ति शब्दस्यैकदेशः प्रतिः। नामैकदेशग्रहणेन नामग्रहणमिति न्यायोऽत्रान्वेति । अथवा वर्णविपर्ययेण पत्री (=पत्रिका )इति शब्दस्यैव प्रतिरित्यन्यदुच्चारणम्। अस्य तु द्वितीयस्यार्थस्य व्याप्तौ भूर्जत्वक्षु कागदेषु च लिखिता हस्तप्रतयो नान्तर्भवन्ति । हस्ताक्षरमित्यस्यैकदेशत्वेन हस्त इति प्रयोगः यथा “स्वहस्तोऽयं महाराजाधिराजस्य श्रीहर्षस्य” इत्यादिषु हर्षवर्धनादिशासनान्तिमवाक्येषु दृष्टचरः । 'पुत्रिका' इति शब्दोऽपि हस्तप्रतिरिति शब्दस्य स्थाने कदाचिद् दृश्यते।औत्तराहैस्तत्प्रान्तभाषासु व्याहरद्भिः पाण्डुलिपिरिति शब्दो यत् प्रयुज्यते तस्य मातृका इत्यर्थो न पुनः पाण्डुलिप्याख्यो लिपिविशेष इति । तालपत्राणां भूर्जत्वचां च पाण्डुवर्णत्वात् तत्र लिख्यमाना लिपिरित्यर्थे तस्य प्रयोगः ।

**पादटिप्पणी-**

१. नाकरिष्यद्यदि ब्रह्मा लिखितं चक्षुरुत्तमम् ।
तत्रेयमस्य लोकस्य नाभविष्यच्छुभागतिः ॥ नारदस्मृतिः - ४.७० ।

२. कृष्णयजुर्वेदे -पञ्चमकाण्डप्रथमप्रश्ने तृतीयानुवाके

३. लिपिसिचिह्वश्च - अष्टाध्यायी - ३-१-५३

४. मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवाः ।
गुण्डिकाघुणसम्भूता लिपयः पञ्चधा स्मृताः ॥ वाराहीतन्त्रम् ।

५. अयं दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम्।
मृषां न चक्रेऽल्पितकल्पपादपः प्रणीयदारिद्रदरिद्रतां नलः॥ नैषधीयचरितम्१-१५॥

६. ग्रन्थसम्पादनशास्त्रम् - पृ.सं-२९५ ।
७. ग्रन्थसम्पादनशास्त्रम् - पृ.सं-२९४ ।
८. स्तोत्रमञ्जरी - पृ.सं - २५ ।
९. सुभाषितमञ्जरी - पृ.सं - ४४१ ।

## सन्दर्भग्रन्थाः


१. ग्रन्थसम्पादनशास्त्रम् - एस्.जगन्नाथः, पूर्णप्रज्ञसंशोधनमन्दिरम्, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - २८ - २०१४
२. तैत्तिरीयकृष्णयजुर्वेदः - भाग-२ - रामकृष्णमठः,बसवनगुडि, बेङ्गलूरु - १९९३
३. भारतीयग्रन्थसम्पादनशास्त्रप्रवेशिनी - राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, २००२
४. Introduction to Manuscriptology – R.S.Shivaganeshamurthy, Sharada Publishing House, Delhi – 35 – 1996
५. हस्तप्रति अध्ययनशास्त्र (कन्नड)- डा.ना.गीताचार्यः, बि.एम्.श्रीस्मारकप्रतिष्ठान, एन्.आर्.कालोनी, बेङ्गलूरु - १९ - २००९



**Dr. Ramakrishna Bhat K**
Assistant Professor
Department of Manuscriptology
Karnataka Samskrit University
PMK Road, Chamarajpet-560018
Bangalore, Karnataka
Mobile : 9844741855
E-mail : kootelubhat@gmail.com


*********

Journal of Veda Samskrita Academy, ISSN 2250-1711
Volume XVIII : July to December – 2021

# क्रियायाः स्वरूपविमर्शः

**डा. पि. आर्. अर्चना कारन्त्**
अतिथि-उपन्यासिका, व्याकरणविभागः,
कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु

शब्दसाधुत्वप्रतिपादनपराणामाकरग्रन्थानां समीक्ष्यमाणे सति श्रेष्ठस्य मुख्यवेदाङ्गत्वेन प्राप्तप्रतिष्ठस्य शब्दानुशासनस्य प्रमुखतः स्वरूपद्वयं समुपलभ्यते । एकं लौकिक-वैदिकोभयविधशब्दव्युत्पादकं प्रक्रियात्मकम्, अपरं परमार्थवस्तुप्रतिपादकं प्रमेयात्मकम् । नैतादृशी गतिर्भवति शास्त्रान्तरस्य पक्षद्वयाश्रयात्मिका । एतद्धाराद्वयमपि निर्बाधगत्या प्रवहमाणं दृश्यते । तत्र प्रमेयाख्यं पन्थानं समाश्रित्येयं विचारसरणिः प्रवर्त्स्यते ।

"वाक्यस्फोट एव मुख्यः, अतिनिष्कर्षः, लोके अर्थबोधकः, तेनैवार्थ- समाप्तिश्च । किन्तु प्रतिवाक्यं सङ्केतग्रहासम्भवात् वाक्यान्वाख्यानस्य लघुनोपायेन कर्तुमशक्यत्वाच्च कल्पनया पदानि प्रविभज्य पदे प्रकृतिप्रत्ययभागान् प्रविभज्य कल्पिताभ्यामन्वय-व्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं कुर्वन्ति स्म आचार्याः" इति परमलघुमञ्जूषायां नागेशभट्टाः । शास्त्रप्रक्रियानिर्वाहाय कल्पिता या प्रकृतिः सा द्विविधा - धातुः, प्रातिपदिकञ्चेति ।

धातुश्च भूवादिः शुद्धः, प्रत्ययान्तश्चेति सङ्कीर्णः । शुद्धस्य "भूवादयो धातवः" इत्यनेन धातुरिति संज्ञा, सङ्कीर्णस्य तु "सनाद्यन्ता धातवः" इत्यनेन । सनादयश्च सन्-क्यच्-काम्यच्-क्यङ् क्यष् प्रभृतयः द्वादश । उभयविधस्यास्य धातोः फलं-व्यापारश्चेति अर्थः । तयोरुभयोरपि क्रियेति व्यपदेशः । तत्र व्यापारे, कारणं क्रियेति "कृञः श च" इति भावे शः, फले तु क्रियते निष्पाद्यते इति कर्मणीति विशेषः।

**'सर्वकारकान्वयितावच्छेदकधर्मवती-क्रिया'१** इति क्रियालक्षण- मवादि धीमता नागेशेन परमलघुमञ्जूषाख्ये ग्रन्थे । निखिलैः कर्तृ-कर्म-करण-संप्रदान-अपादान-अधिकरणादिभिः कारकैः सह या अन्वयिता, तया अवच्छिन्नो यो धर्मः तद्वती या, सा क्रियेति लक्षणसमन्वयः । लक्षणेऽस्मिन्, सर्वेषामेव कारकाणां क्रियायामेवान्वयः इति स्फुटं बोधयितुं सर्वपदोपादानम् । अधिकरणस्यापि स्वाश्रयद्वारा क्रियान्वयः अस्त्येव । कारकत्वस्य क्रियाजनकत्वरूपतया जन्य-जनकयोः परस्परसाकांक्षत्वेन कारक-क्रिययोः परस्परान्वयः । कारकान्वयि-तावच्छेदकधर्मः फलत्वव्यापारत्वान्यतररूपः, तद्वतीयं क्रिया । अत्र क्रिया फल-व्यापारोभयात्मिका इति न व्यापारलक्षणेनास्य गतार्थत्वम् ।

**'कारकाणां प्रवृत्तिविशेषः क्रिया'२** इति क्रियायाः स्वरूपं प्राह भाष्यकारः । एषा प्रवृत्तिविशेषरूपा क्रिया सकलधात्वर्थनिष्ठा । यथा- 'पर्वतः अस्ति' इत्यत्र धातोः आत्मोपग्रहणरूपः प्रवृत्तिविशेषः अर्थः । 'देवदत्तः म्रियते' इत्यत्र आत्मपरित्यागरूपः प्रवृत्तिविशेषः । 'बालस्तिष्ठति' इत्यत्र गमननिरोधः प्रवृत्तिविशेषः । सर्वापि प्रवृत्तिः प्रवृत्त्यन्तरात् भिद्यत इति अस्त्येव सर्वस्याः क्रियात्वम् ।

तान्त्रिकास्तु क्रियायाः लक्षणमित्थमवादिषुः यत्-

**क्रियामन्ये तु मन्यन्ते क्वचिदप्यनपाश्रिताम् । साधनैकार्थकारित्वे प्रवृत्तिमनपायिनीम् ॥३**

साधनैः फलोत्पन्नरूपप्रयोजनकारित्वे, या अनपायिनी (नित्या) प्रवृत्तिः ईश्वरशक्तिः सा एव क्रिया । एवं च आत्मनः प्रवृत्तिरेव क्रिया । इयं क्रिया आत्ममात्रनिष्ठा, आत्मेतरद्रव्येषु तस्याः असम्भवात् । ननु साध्यत्वेन प्रतीयमानत्वं क्रियात्वमिति अग्रे वक्ष्यते । यदीयं क्रिया नित्या तदा सा, साध्यस्वभावयुक्ता कथं भवेदिति चेदाह-

**सामान्यभूता सा पूर्वं भागशः प्रविभज्यते । ततो व्यापाररूपेण साध्येव व्यवतिष्ठते ॥४**

आत्मनः प्रवृत्तिरूपा इयं क्रिया आदौ सामान्यरूपेण अवतिष्ठते । तदुत्तरं यदा साधनद्रव्याणि फलार्थोन्मुखानि भवन्ति तदेयं साधनरूपोपाधिभिः व्यापाररूपेण विपरिणम्य साध्यत्वरूपेण प्रतीयते । अतो नोक्तदोषः । सेयं क्रिया सर्वदापि साध्यस्वभावा । तदुक्तं वाक्यपदीये-

**यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते । आश्रितक्रमरूपत्वात् सा क्रियेऽत्यभिधीयते ॥५**

सिद्धं-परिनिष्पन्नं, भूतम् (अपाक्षीत् इत्यादौ), असिद्धम्-अनिष्पन्नं (पचति-पक्ष्यतीत्यादौ) वा यावत् साध्यत्वेनाभिधीयते-साध्यम् इति प्रतीयते, सा-साध्यत्वेन प्रतीयमाना, आश्रितक्रमरूपत्वात्-गृहीतपौर्वापर्यत्वात् क्रिया इति निगद्यते । सर्वा अपि क्रिया लोके व्यापाराणां समुदायरूपेण प्रसिद्धा । यथा-आरोहणम्, अवरोहणम्, गमनागमनम्, पाकः इत्यादि। एवञ्च कर्त्रा क्रमेण क्रियमाणा एव क्रिया ।

सिद्धोऽप्यसिद्धोऽपि भावः यदा साध्यरूपेण कथ्यते तदा सा क्रियेति पूर्वमुक्तम् । तस्य हि भावस्य साध्यत्वेन, तत्र अवान्तरव्यापाराणां भवति कश्चन विशेषः क्रमः । यथा- पचतीत्यादौ अग्निप्रज्वालनादारभ्य अधिःश्रयणपर्यन्तः । यत्र तु नास्ति पौर्वापर्यक्रमः यथा- अस्तीत्यादौ तत्रापि अवयवभूत-व्यापारक्रमः आरोपणीयः । नन्वेवं सति पच् धातोः अनेकव्यापारसत्वे नानार्थतापत्तिः स्यादिति चेन्न त्यदादिन्यायेन बुद्धिविशेषादेः शक्यतावच्छेदकानामनुगमकस्य सत्वात् । यथा- त्यदादिशब्दानां घटत्व-पटत्वादिरूपेण नानार्थशक्ततया, तद्वारणाय स्वीयविषयतावच्छेदकसम्बन्धेन, वक्तृबुद्धिविशेषोपलक्षिताः ये घटत्व-पटत्वादयः धर्माः तदवच्छिन्ने त्यदादीनां शक्तिः स्वीक्रियते तद्वत् प्रकृतेऽपि विषयतावच्छेदकसम्बन्धेन वक्तृबुद्धिविशेषोपलक्षितेषु फूत्कारादिषु शक्तिः स्वीक्रियते । अतो नास्ति दोषः ।

नन्वेवमपि अवान्तरव्यापाराणां समुदाय एव क्रियेति स्वीकारे **'आख्यातेन एका क्रिया प्रत्याय्यते'** ६ इति प्रशंसायाम् इति सूत्रस्थभाष्यासङ्गतिः, **'न वै तिङन्तानि एकशेषारम्भं प्रयोजयन्ति'**७इति सरूपसूत्रस्थभाष्यासङ्गतिश्च इति चेदत्रोच्यते- धातौ क्रियैकत्वव्यवस्था च शक्यतावच्छेदकानां यः एकफलोत्पत्ति-रूपबुद्धिविशेषः, तस्य ऐक्यमादाय साध्यते । सा च बुद्धिः फूत्कारादिविषयक-समूहालम्बनरूपा एकैव । तदाह हरिः-

**गुणभूतैरवयवैः समूहः क्रमजन्मनाम् । बुद्ध्या प्रकल्पिताऽभेदः क्रियेति व्यपदिश्यते ॥८**

गुणभूतैः स्वसमूहं प्रति गुणत्वमापन्नैः, अवयवैः समूहारम्भकैः फूत्कारत्वादिरूपेण भासमानवस्तुविशेषैः, क्रमजन्मनां-क्रमोत्पत्तिमतां, बुद्ध्या-सङ्कलनात्मकान्तःकरणवृत्त्या, प्रकल्पिताऽभेदः प्रतीतिविषयीकृतः अभेदः क्रियेति आचार्यैः व्यवह्रियते इति कारिकायाः संक्षेपार्थः । अत्र अवयवाश्रयं व्यापाराणां पौर्वापर्यम्, समुदायाश्रयं च एकत्वम् । व्यापारा हि क्षणनश्वरा इति तेषां वास्तविकसमुदायासम्भवात् अभेदरूपसमूहस्य बुद्धिप्रकल्पितत्वमुक्तम् । एषः बुद्धिप्रकल्पितसमूहो हि प्रधानः व्यापारः । तस्य अवयवभूताः अवान्तर- व्यापाराः गुणभूताः । अवयवानां क्रमेणोत्पत्त्या क्रियायाः आश्रितक्रमरूपत्वम् । तत्र एकैकावयवेऽपि समूहस्यारोपात् अधिःश्रयणकालेऽपि पचतीति व्यवहारः । तदुक्तं-

**एकदेशे समूहे वा व्यापाराणां पचादयः । स्वभावतः प्रवर्तन्ते तुल्यरूपं समाश्रिताः ॥९**

फलस्यापि स्वजनकव्यापारगत-पौर्वापर्यारोपेण क्रियात्वेनैव भानम् । अत एव कर्मकर्तरि 'पच्यते तण्डुलः स्वयमेव' इत्यादौ पच्यादेः फलमात्रार्थकत्वे धातुसंज्ञासिद्धिः, कारकाणां क्रियायामन्वयः इति नियमश्च संगच्छते । अन्यथा कर्मकारकस्य फलेनैवान्वयात् तदसङ्गतिः स्पष्टैव ।

साध्यत्वेनाभिधीयमानं क्रियेत्युक्तम् । तत्र साध्यत्वं किं स्वरूपमिति जिज्ञासायामाह **क्रियान्तराकांक्षाऽनुत्थापकतावच्छेदकरूपं-साध्यत्वम्१०** । अन्या क्रिया क्रियान्तरा । क्रियान्तरस्य आकाङ्क्षा क्रियान्तराकाङ्क्षा, अस्याः अन्वयिनी का क्रिया इत्येवं रूपा आकाङ्क्षेत्यर्थः । तस्याः अनुत्थापकत्वम्-अनुत्पादकत्वम्, एतादृशधर्मविशिष्टत्वं साध्यत्वम् । यथा-पचति, करोति इत्यादि तिङन्तस्थले किम्? कः? क्व? इत्यादि साधनाकाङ्क्षासत्वेऽपि अन्यक्रियाविषयिका आकाङ्क्षा नोदेति । पाकः-कृतिः इत्यादौ तु अस्ति-भविष्यति-नङ्क्ष्यति इत्यादि क्रियान्तरस्य आकाङ्क्षा जागर्ति । साध्यस्य हि स्वयमेव क्रियात्वम् । अतो न तस्याः क्रियान्तरापेक्षा जायते, कारकं हि तया सह अन्वेति । साध्यस्वभाव एव असत्त्वभूतमिति पदेन कथ्यते । सत्त्वं नाम द्रव्यम्, न सत्त्वम् असत्त्वम् । असत्त्वभूतत्वं नाम लिङ्गसंख्यान्वय-अयोगित्वम् । एतदेवादाय हरिराह-

**'असत्त्वभूतो भावः तिङ्पदैरभिधीयते'११**इति ।

ननु हिरूगाद्यर्थस्य क्रियान्तराकांक्षादर्शनेन साध्यत्वाभावेऽपि साध्या- त्मकक्रियावाचकत्वव्यवहारः अनुपपन्नः खलु इति चेदाह- हिरूगाद्यव्ययानां क्रिया- वाचकत्वव्यवहारस्तु क्रियामात्रविशेषणत्वात् । अत एव

हिरुगाद्यर्थे न कारकाणामन्वयः । एवमेव 'हरिं नमेत् चेत् सुखं यायात्' इत्यत्रापि चेत् शब्दसमभिव्याहारेण क्रियाकांक्षा, न तु स्वतः ।

वस्तुतस्तु पूर्वोक्तसाध्यलक्षणे अतिव्याप्तेः सम्भवात् **साध्यत्वं-निष्पाद्यत्वमेव१२**इत्यभिप्रैति नागेशभट्टः । साध्यत्वं यदि क्रियान्तराकाङ्क्षाऽ- नुत्थापकतावच्छेदकं तर्हि 'पचति भवति' इत्यादि भाष्योक्तवाक्ये१३, 'भुक्त्वा गच्छति' इत्यादौ च भवति-भुक्त्वेत्यादीनां क्रियान्तराकाङ्क्षादर्शनेन कारका- न्वयानापत्तिः धातुत्वानापत्तिश्च स्यात् । अतः साध्यत्वं-निष्पाद्यत्वमिति स्वीकार्यम् । ध्वनितं चेदं- "उपपदमतिङ्",१४ "सुट्कात् पूर्वः"१५ इत्यादौ भाष्ये । तत्र हि-'पूर्वं धातुः साधनेन युज्यते, पश्चादुपसर्गेण । साधनं हि क्रियां निर्वर्तयति, तामुपसर्गो विशिनष्टि । अभिनिर्वृत्तस्य च अर्थस्य उपसर्गेण विशेषः शक्यो वक्तुम्' इत्युक्तम् । तत्र 'साधनं हि क्रियां निर्वर्तयति' इत्यनेन धातुवाच्यक्रियायाः निष्पाद्यत्वरूपसाध्यत्वेन भानमिति स्पष्टमेवाभिहितम् । नन्वेवं साध्यत्वं निष्पाद्यत्वमिति स्वीकारे 'घटं करोति' इत्यादौ सिद्धस्यापि घटस्य साध्यत्वेन प्रतीतिः स्यादिति चेन्न- घटस्य साध्यत्वेन प्रतीतिस्तु करोति पदसान्निध्येन, न तु स्वतः । स्वतस्तु द्रव्यं सिद्धमेव भवति । इतः परं सिद्धक्रिया परिचाय्यते । असत्त्वभूतायाः क्रियायाः धात्वर्थत्वे 'पाकः' इत्यत्रापि तत्प्रत्ययापत्तिः स्यात् । न च इष्टापत्तिः, **'कृदाभिहितो भावः द्रव्यवत्प्रकाशते'१६** इति भाष्यविरोधापत्तेः । अतः पाकः इत्यादि कृदन्तस्थले प्रत्ययस्य सिद्धक्रियावाचकत्वमभ्युपेयम् । किं तस्य स्वरूपमिति जिज्ञासायामुच्यते-

"**क्रियान्तराकांक्षोत्थापकतावच्छेदकवैजात्यवत्वे सति कारकत्वेन क्रियान्वयत्वे सति कारकान्तरान्वयायोग्यत्वम्"** सिद्धत्वम् १७ । तच्च सिद्धत्वं पाकः इत्यादौ घञादि वाच्यम् । तदुक्तं हरिणा-

'**आख्यातशब्दे भागाभ्यां साध्य-साधनरूपता । प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः ॥ १८**

आख्याते इत्येव वक्तव्ये शब्दग्रहणं बहुव्रीहिलाभार्थम् । आख्यातं च आख्यातं च-आख्याते। आख्याते शब्दौ यस्मिन् तत्- आख्यातशब्दम् । तिङन्तशब्दद्वयघटितवाक्यमिति यावत् । यथा- 'पश्य मृगो धावति', 'पचति भवति' इत्यादयः । लोके यथा 'पश्य मृगोधावति' इत्यादौ भागाभ्यां साध्य-साधनवर्तिता प्रकल्पिता तथा इह शास्त्रेऽपि स क्रमः पाकः इत्यादि घञादिभावार्थकप्रत्ययस्थले प्रकल्पनीया इति कारिकायाः आशयः । अर्थात् प्रकृत्या क्रियायाः साध्यस्वभावः, प्रत्ययेन च सिद्धस्वभावः प्रतिपाद्यते इत्यर्थः । तथाहि- 'पश्य' इति तिङ्प्रकृत्यर्थदर्शनस्य साध्यरूपता । 'धावति' इत्यत्र प्रकृत्यर्थधावनस्य दर्शने कर्मत्वेनान्वयात् साधनरूपता । एवं पचति भवतीत्यत्रापि पचि क्रिया भवनक्रियायाः कर्त्री । उक्तं च भाष्ये- **'पच्यादयः क्रिया भवति क्रियायाः कर्त्र्यो भवन्ति'१९** इति । तद्वत् प्रकृतेऽपि ।

पाकः इत्यत्र पच् धातुना साध्यावस्था, घञ्प्रत्ययेन लिङ्गसंख्या- न्वयत्वसाधनरूपता च उपस्थाप्यते । परं दृष्टान्त-दार्ष्टान्तिकयोः इयान् विशेषः यत्घञुपस्थाप्या क्रिया लिङ्गसंख्यान्वयिनी, कारकान्वयिनी च । आख्यातेनोपात्ता क्रिया तु नैवमुभयधर्मवती । तथापि कारकत्वेनान्वयित्वमात्रेण दृष्टान्त-दार्ष्टान्तिकभावः । तथा च पाकः इत्यत्र घञ्प्रत्ययवाच्या क्रिया सिद्धावस्थापन्ना । तस्याः लिङ्गसंख्यान्वयत्वं, कारकान्वयत्वं च वर्तते । यथा पाकः, पाकौ, पाकाः इत्यादौ एकत्वादिसंख्यान्वयस्य, पाकं पश्य, पाकेन कृतम्, पाकात् बिभेति इत्यादौ कर्मत्वादिकारकान्वयस्य च भानम् ।

ननु कारिकायामुपात्तस्य भागाभ्यामित्यस्य प्रकृति-प्रत्ययाभ्यामित्यर्थः । तथा च पचतीत्यादौ पच् रूपप्रकृत्या, तिप् प्रत्ययेनेति भागद्वयेन यथा साध्य-साधनरूपता प्रतीयते तद्वत् पाकादिष्वपीति समन्वयः अभिप्रेत इति चेन्न, स घञादिष्वपीति उपमेयानुरोधात् क्रियायाः एव भागाभ्यां यथाक्रमं साध्यत्वेन-साधनत्वेन च भानमित्यर्थस्य विवक्षणात् ।

न च घञन्ते धातुनोपस्थाप्यमाना साध्यक्रियैवेत्यत्र मानाभाव इति वाच्यम्, 'ओदनस्य पाकः' इति कर्मषष्ठ्याः मानत्वात् । तथा हि 'पाकः' इति कृद्योगे ओदनरूपकर्मणः षष्ठी विधीयते "कर्तृकर्मणोः कृति"२० इति सूत्रेण । साध्यक्रियायामेव कारकाणामन्वय इति सिद्धान्तः । ततश्च ओदनरूपकर्मणः अन्वयाय कृत्प्रकृतिभूतधातोः साध्यक्रियावाचकत्वं अभ्युपेयमेव । यदि साध्यक्रिया न स्यात् तर्हि कर्मत्वादिकमप्यनुपपन्नं स्यात्, कर्मणि षष्ठी

च न सिध्येत् । इत्थं च ओदनस्य पाकः इत्यादौ कर्मणि षष्ठ्याः विधानमेव घञन्ते धातोः साध्यस्वभावक्रियार्थकत्वे मानम् । ननु ओदनस्य पाकः इत्यादौ न धात्वर्थे कारकान्वयः, किन्तु भवतीति तिङन्तमध्याहृत्य तत्र ओदनादेरन्वयः क्रियते इति वाच्यम्, **कर्तृकर्मणोः कृतीति** कृद्योगे एव षष्ठ्याः विधानात् । किं च यदि तिङन्तस्याध्याहारः क्रियते तर्हि **न लोकाव्ययनिष्ठाखलर्थतृनाम्** **२१** इति सूत्रेण लादेशयोगे षष्ठीनिषेधप्रसङ्गश्च । ननु तत्र मा भूत् कृद्योगषष्ठी, शेषषष्ठ्यैव निर्वाहो अस्तु इति चेत् तदपि न, सर्वत्र सम्बन्धषष्ठ्यैव निर्वाहे कर्तृकर्मणोरिति विधिवैय्यर्थ्यापत्तेः । तस्मात् घञन्तस्थले धातुनोपस्थाप्या क्रिया साध्यक्रिया एवेति अभ्युपगन्तव्यम् । पूर्वोक्तविषयमेव स्पष्टयति-

**साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना । सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः ॥२२**

पाकादिशब्दे साध्यत्वेन प्रतीयमाना क्रिया धातुरूपनिमित्तिका । तस्याः क्रियायाः यः सिद्धस्वभावः सः घञादिनिमित्तकः इति । न च घञादिभिः सत्त्वभूतक्रियायाः अभिधाने मानाभाव इति वाच्यम्, पाकः भवति, पाकः अभवत्, पाकः भविष्यति, पाकः जायते, पाको नष्टः इत्यादि क्रियान्तरस्य आकाङ्क्षायाः दर्शनस्यैव मानत्वात् । धातूपस्थाप्यक्रियायां तु अन्यस्याः क्रियायाः आकाङ्क्षा-अदर्शनात् तत्र सिद्धक्रियात्वमसम्भव एव । 'स्तोकः पाकः' इत्यनापत्तिश्च । यदा प्रत्ययेन सिद्धक्रिया उच्यते तदैव 'स्तोकः' इत्यत्र प्रथमा सिध्यति । अन्यथा फलानां, फलविशेषणानां वा धातुप्रतिपाद्यक्रियाया-मेवान्वये' स्तोकादिभ्यः द्वितीयैव स्यात् **'क्रियाविशेषणानां कर्मत्वं क्लीबता च'**२३ इति वचनात् । घञुपस्थाप्यसिद्धक्रियायामन्वये तु प्रत्ययानुसारं 'स्तोकः' इत्यत्र प्रथमाविभक्तिः पुल्लिङ्गता च सिध्यति ।

यद्वा एवमपि वक्तुं शक्यते यत्-पाकः इत्यत्र एका एव क्रिया प्रतीयते । परं प्रकृतिप्रत्यययोः पार्थक्यात् एकस्यां धर्मिणि धर्मद्वयं भासते । यथा पश्य मृगो धावतीत्यत्र धावनक्रिया मृगरूपसाधनापेक्षया साध्यस्वरूपा, दर्शनापेक्षया सिद्धस्वरूपा भवति तद्वत् पाकः इत्यत्रापि पाकक्रिया पच्धात्वपेक्षया साध्यतया, घञ्प्रत्ययापेक्षया साधनतया च प्रतीयते । न च एकस्यां धर्मिणि विरुद्धधर्मद्वयकथनमसङ्गतमिति वाच्यम्, निरूपकभेदाभ्युपगमात् । यथा "राज्ञः पुत्रस्य नप्ता विजयताम्" इत्यत्र पुत्रस्य राजापेक्षया प्राधान्यम्, नप्त्रपेक्षया अप्राधान्यम् । एवमेकस्मिन्नेव पुत्रे यथा राजन् शब्दार्थनिरूपितप्राधान्यं नप्तृशब्दार्थ-निरूपितमप्राधान्यमिति विरुद्धौ द्वौ धर्मौ निरूपकभेदात् भासेते तद्वत् पाकः इत्यत्रापि एकस्यामेव पाकक्रियायां साध्यत्व-सिद्धत्वेति विरुद्धधर्मौ विषयभेदात् (धातु-प्रत्ययेति) प्रतीयेते, अतो नास्ति दोषः इति शम् ।

## पादटिप्पणी-

१) परमलघुमञ्जूषा, धात्वर्थप्रकरणम्
२) महाभाष्यम् १-३-१ ।
३) वाक्यपदीयम्, क्रियासमुद्देशः श्लो.सं. ३६
४) वाक्यपदीयम्, क्रियासमुद्देशः, श्लो.सं. ३७
५) वाक्यपदीयम्, क्रियासमुद्देशः श्लो. सं. १
६) अष्टाध्यायी सूत्रम् ५-३-६६
७) अष्टाध्यायी सूत्रम् १-२-६४
८) वाक्यपदीयम्, श्लो. सं. ४
९) वाक्यपदीयम्, साधनसमुद्देशः, श्लो. सं.५८
१०) भूषणसारः, धात्वर्थप्रकरणम्
११) अष्टाध्यायी सूत्रम् ३-१-६७
१२) परमलघुमञ्जूषा, धात्वर्थप्रकरणम्
१३) महाभाष्यम् १-३-१ ।
१४) अष्टाध्यायी सूत्रम् २-२-१९

१५) अष्टाध्यायी सूत्रम् ६-१-१३५
१६) अष्टाध्यायी सूत्रम् ३-१-६७ ।
१७) परमलघुमञ्जूषा, धात्वर्थप्रकरणम् ।
१८) वाक्यपदीयम्, क्रियासमुद्देशः, ४६ ।
१९) अष्टाध्यायी सूत्रम् १-३-१
२०) अष्टाध्यायी सूत्रम् २-३-६५ । २१) अष्टाध्यायी सूत्रम् २-३-६९
२२) वाक्यपदीयम्, क्रियासमुद्देशः, श्लो. सं. ४७
२३) सिद्धान्तकौमुदी, कारकप्रकरणम्

**सन्दर्भग्रन्थाः**

१. पाणिनीयः अष्टाध्यायी सूत्रपाठः, पूर्वपीठिका-सूत्रविवरणात्मक 'प्रह्लाद' टिप्पणीसहितः, चौखम्बा कृष्णदास अकाडमी ।
२. महामहोपाध्यायनागेशभट्टविरचितः परमलघुमञ्जूषा, किरणावलीव्याख्यो- पेता, चौखम्बा संस्कृत प्रतिष्ठानम् ।
३. श्रीमन्महर्षिपतञ्जलिविनिर्मितं व्याकरणमहाभाष्यम्, भाष्यप्रदीपोद्योतसमुलसितम्, चौखम्बासंस्कृत प्रतिष्ठानम्।
४. श्रीमत्कौण्डभट्टविरचितः वैयाकरणभूषणसारः, प्रभा-दर्पणव्याख्याद्वयोपेतः, चौखम्बा संस्कृत प्रतिष्ठानम् ।
५. भट्टोजिदीक्षितविरचिता सिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनी व्याख्याभ्यां समन्विता) मोतीलाल् बनारसीदास ।
६. नागेशभावप्रकाशसहिता लघुमञ्जूषा, व्याख्या-पेरी सूर्यनारायणशास्त्री ।
७. महामहोपाध्यायनागेशभट्टविरचितः लघुशब्देन्दुशेखरः, चौखम्बा संस्कृत प्रतिष्ठानम् ।
८. आचार्यभर्तृहरिप्रणीतम् वाक्यपदीयम्, व्याख्याद्वयोपेतम्, सम्पूर्णानन्द- संस्कृत-विश्वविद्यालयः ।

**Dr. P. R. Archana Karanth**
Guest Lecturer, Dept. Of Vyakarana
Karnataka Sanskrit University
Chamaraja Pete-560018,
Bengaluru, Karnataka
Ph no. – 9481904228
e-mail – archanakaranth6@gmail.com

***********

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# ‘कुरुभुङ्क्ष्व’ - तत्ववाद-भगवद्गीतयोः कर्मजिज्ञासा [1]

***‘kuru bhuṅkṣva’** - tatvavāda-bhagavadgītayoḥkarmajijñāsā*

‘reap thy action’ - Karma theory in Tatvavada and Bhagavadgita

**गौतम् आर्** 2,
**श्रीनिवास वरखेडी** 3,
**श्रीनिवासकुमार एन् आचार्य** 4

**विषयसारांशः**

“कुर्वन्नेवेह कर्माणि...” इति याज्ञीयमन्त्रोपनिषत् कर्मकरणेनैव मुक्तिरित्यभि- प्रैति। तदुक्तं कृष्णगीतायां “न च सन्यसनादेव सिद्धिं समधिगच्छाति”। परन्तु क्वचित्कर्म तु संसारिणां, ज्ञानं तु यतीनामिति। “आरुरुक्षोर्मुनेर्योगम्” इत्यस्य व्याख्यावसरे ज्ञानिनां तु कर्मनिवृत्तिरिति निरूप्यते। वस्तुतः तत्ववाद- दर्शनाचार्यः मध्वाचार्यस्तु नैते कर्म,ज्ञानं,भक्तिश्च पृथक्पन्थानः इति। अपि च ज्ञानिनामपि कर्मणः कर्तव्यत्वं निरूपितं तन्मते। एतस्मिन्विषये,मध्वकृत-भक्तिसाहित्यस्य ‘आनन्दगीतायाः (द्वादशस्तोत्रस्य’) हरिस्तुतेः ‘कुरु भुङ्क्ष्व’ इत्यादिनः वीक्षाशोधपत्रेऽस्मिन्चर्च्यते।

**मुख्यशब्दाः**- द्वादशस्तोत्रम्, तत्ववादः, द्वैतमतम्, वेदान्तः, महाभारतम्, मोक्षसाधनम्, कर्म, भक्तिसाहित्यम्, जनसेवा ।

## कर्म-ज्ञान-भक्त्यादीनि मोक्षसाधनानि

भारतदेशेऽस्मिन्विद्यमानायां विविधदार्शनिकपरम्परायां चतुर्विधपुमर्थेषु अनिष्ट-निवृत्तिरूपः इष्ट-प्राप्तिरूपो वा अन्यस्वरूपो वा मोक्ष एव दर्शनस्य तत्प्रति- पादितस्य तत्वज्ञानस्य प्रयोजनत्वेनाङ्गीक्रियते। विशेषतः वेदान्तदर्शने बन्धा- पगमे मोक्षोपगमे च कर्म-ज्ञान-भक्त्यादीनि साधनानीत्यङ्गीकृतानि। तत्र श्रुत्यादिसदागमः उपाश्रितः।तदत्र श्वेताश्वतरोपनिषदेवं वदति - “तमेवं विदित्वाऽ -तिमृत्युमेति नाऽन्यः पन्था विद्यतेऽयनाय”५ इति। वाक्येऽस्मिन् ‘विदित्वा’ इत्युक्ते ‘ज्ञात्वा’इत्यर्थः। अत्र विदित्वाशब्दनिहितस्य ज्ञानस्य परोक्षज्ञानं नाम विद्या इत्यर्थः। तेन विद्यैव तादृशमोक्षस्यावाप्तेः साधनमित्युक्तं भवति। तत्तु ब्रह्मसूत्रेऽपि निरूपितम्। “विद्यैवतु निर्धारणात्”६ इति बादरायणोक्ते ब्रह्मसूत्रे परोक्षज्ञानमेव मोक्षं प्रति कारणमित्युपपादितम्७; श्वेताश्वतरोपनिषदुक्तेश्च। परन्तु न केवलं वेदादिजन्यं परोक्षज्ञानं मोक्षसाधनम्। तदनु एव “दर्शनाच्च८” इतिसूत्रेऽस्मिन् अपरोक्षज्ञानाच्च मोक्ष इति स्पष्टीकृतम्। तादृशापरोक्षज्ञानार्थं साधनानि कानीत्युक्ते, ब्रह्मसूत्रानुसारेण मध्वाचार्यस्य ब्रह्मसूत्रभाष्य- स्यानुबन्धाधिकरणे साधनानि निरूपितानि९। तत्र प्रधानं साधनं हरिभक्तिरिति निरूपितम्।” न केवलं श्रवणादिभिर्गुरुप्रसादेन च ब्रह्मदर्शनम्। किन्तु? भक्त्यादिभिश्च” इत्यादि। हरिभक्त्यर्थं हरेर्माहात्म्यज्ञानं सम्पादनीयम्। यथा हि तत्ववादप्रतिपादकेन आचार्यमध्व इति नाम्ना प्रथितेन आनन्दतीर्थभगवत्पादेन स्वग्रन्थे महाभारत-तात्पर्यनिर्णये भक्तिलक्षणम् एवमुक्तम्- “माहात्म्यज्ञानपूर्वस्तु सुदृढः

---

1. This research article is a research outcome of the study of Karma in Tattvavada and Bhagavadgita as part of the ongoing project MAHE Mahabharata Subject Indexing being conducted by the Department of Philosophy (DoP), Manipal Academy of Higher Education (MAHE); see- www.mahabharata.manipal.edu.

2. Gowtham R [first author], Research Coordinator, DoP, MAHE, Mamipal
(e: gow.gowthamr@gmail.com)

3. ShrinivasaVarakhedi [second author], Vice Chancellor, CSU, New Delhi
(e: shrivara@gmail.com)

4. Srinivasa Kumar N Acharya [corresponding author], Assistant Professor and Coordinator, DoP, MAHE, Manipal, (e: acharya.srinivasan@gmail.com)

सर्वतोऽधिकः। स्नेहो भक्तिरिति प्रोक्तः...॥१०” तथा च भक्तिः माहात्म्यज्ञानपूर्विका इति ज्ञायते। तद्धरेर्माहात्म्यज्ञानं तावच्छास्त्राध्ययनेन कर्मणा च लभ्यते। परन्तु शास्त्राध्ययनं न सर्वेषां सुकरमिति शास्त्राध्ययनात् दूरे स्थितानामपि मोक्षार्थं वेदान्तविचारान् सुबोधयन्ति सरळरूपाणि भक्तिप्रचुराणि गीतानि दार्शनिकाचार्याः शङ्कर-रामानुज-मध्वादयः व्यरचयन्।

**आनन्दगीतानि द्वादशस्तोत्राणि**

तत्र मध्वाचार्यरचिता विशिष्ठा काचित्गीततततिः भक्तिप्रधाना सुप्रसिद्धा ,बहुभिः जनसामान्यैरपि नित्यं गेया। सा द्वादशस्तोत्रमित्येव प्रसिद्धा “आनन्दगीता”। विभिन्नेषु स्थलेषु प्रसङ्गेषु मध्वकृतानि द्वादशस्तोत्राण्यध्यायत्वेन सङ्गृह्य द्वादशस्तोत्रमिति गीयते। विदुषा बन्नञ्जे गोविन्दाचार्येण मध्वाचार्यस्य साक्षाच्छिष्येण हृषीकेशतीर्थेन सङ्गृहीतस्य सर्वमूलमूलकोशस्य परिशोधन- द्वारा तत्पाठानुसारेणैतानि स्तोत्राणि सम्पादितानि । तदनुसारं न तान्यध्याय- रूपाणीति परिगृह्यन्ते। यथा मूलकोशे निर्दिष्टं, तथा ‘हरिस्तुतिः’ इति नाम्ना स्तोत्राणीमानि प्रत्येकमित्येव तेन निरूप्यते। तच्च यत्सामान्यतया सर्वैः माध्वैः श्लोकनवकात्मं हर्यष्टकमिति प्रथितं तृतीयाध्यायं, श्लोकनवकात्मकं हरिस्तवनं चतुर्थाध्यायं च समाहृत्य – हरिस्तुतिरिति “कुरु भुङ्क्ष्व” इत्यादि पञ्चदशश्लोकात्मकं पञ्चमं स्तोत्रमिति मूलकोशे पठ्यते। तत्र स्तोत्रक्रम- व्यत्यासोऽपि वर्तत इति११।

**कर्मलक्षणम् प्रभेदश्च**

मध्वकृतेषु द्वादशस्तोत्रेषु, विशिष्यगीतेऽस्मिन्कर्म, ज्ञानं, प्रधानतया भक्तिश्च प्रतिपाद्यते। अपि चात्र तत्ववादस्य समग्राण्यपि तत्वानि भगवत्पारम्यं तज्ज्ञानं तद्भक्तिः तत्सेवादिकर्माणि युक्तियुक्तानि प्रतिपादितानि। तत्र तावत् कर्मणः विषये केचन प्रश्ना उद्भाव्यन्ते- किं कर्म? कर्म कर्तव्यम् वा न वा? किं कर्म कर्तव्यम्, किं न कर्तव्यम्? इत्यादि।” यत्क्रियते तत् कर्म इति प्रसिद्धम् “इति कर्मणः सामान्यस्वरूपमुक्तं शब्दकल्पद्रुमे १२। वेदगर्भपद्मनाभ-सूरिणा १३ पदार्थसङ्ग्रहे “साक्षात्परम्परया वा पुण्यपापासाधारणकारणं कर्म” इति कर्म- सामान्यलक्षणं निरूपितम्। काचन क्रिया पुण्यं प्रति वा, पापं प्रति वा कारणं भवत्येव। सा क्रिया कर्म इत्यभिधीयते।

कृष्णस्तु भगवद्गीतायां “न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।१४” इति कश्चिदपि पुरुषः१५ नाम जीवः कर्म अकृत्वा स्थातुं न शक्नोत्येव इति न्यरूरुपत्। तस्मात्सर्वे सर्वदा कर्म कुर्वन्त एव भवन्ति। तत्र यत्साधु कर्म तद्विहितकर्म पुण्यप्रदमिति, यच्च निषिद्धं कर्म तत्पापप्रदम्। तत्कथं ज्ञायते विहितत्वं निषिद्धत्त्वं वा कर्मणामिति चेत्, कृष्ण एव भगवद्गीतायामाह- “शास्त्रमेवाभिदधाति एतत्कर्म साधु विहितमिति-” ”तस्माच्छास्त्रं प्रमाणंते”...॥१६ तस्मादेव पदार्थसङ्ग्रहकारः कर्म- प्रभेदमाह “विहित-निषिद्ध-उदासीनभेदेन त्रिविधं कर्म” १७ इति।

**कर्मणः कर्तव्यत्वम्**

सर्वैरपि जीवैः यत्किमपि फलकारणीभूतं कर्म क्रियत एव। परन्तु सर्वेषां कर्मणामपरोक्षज्ञानं प्रति न कारणत्वम्। ईशावास्योपनिषदा च ज्ञायते- “कुर्वन् एवेह कर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यतेनरे ॥१८” इति। कर्माणि कुर्वन्नेव जिजीविषेत्, अन्यथा बन्धान्मुक्तेः उपायः नास्ति। एवं कृते तु लेपः न भवति। अत्र “अकुर्वतः कर्म न लिप्यते इति नास्ति१९” इति शेषपूरणं मध्वभाष्येणावगम्यते। तेन यत्कर्मकरणे कर्मलेपः -पुण्यपापलेपः न भवति, तादृशं स्वोचितं कर्मकर्तव्यं तदपरोक्षज्ञानाय कारणं भवति। कियत्कालपर्यन्तं कर्तव्यं कर्म इत्यस्य उत्तरं तु शतं समा इति । नाम वर्षशतम्। मरणपर्यन्तं कर्तव्यम् इति२०। तादृशस्य कर्मकरणस्य प्रयोजनं तावत्, अन्तःकरणशुद्धिद्वारा अपरोक्ष- ज्ञानावाप्तिः, तेन च मोक्षप्राप्तिः भवति। तदेवोक्तं मध्वाचार्येण द्वादशस्तोत्रे “कुरु भुङ्क्ष्व च कर्मनिजं नियतम्” ततः “सुखरूपममुष्यपदं परमं स्मरतस्तु भविष्यति तत्सततम्“ २१ इति।

**पूर्वपक्ष-सिद्धान्तौ**

नन्वादिशङ्करभगवत्पादेन भगवद्गीताभाष्ये तृतीयाध्याये “ङ्ख्यानां पृथक् करणात् अज्ञानामेव हि कर्मयोगः। न ज्ञानिनाम्। ज्ञानिनां तु, गुणैरचाल्य- मानानांस्वतः चलनाभावात्,कर्मयोगो नोपपद्यते”२२। इति ज्ञानिनां कर्म एव

नास्ति। तेषां तु कर्मनिवृत्तिरेव। तदेवाह मधुसूदनसरस्वतिरपि। परन्तु जयतीर्थः "न ह्यत्र ज्ञानस्यावश्यकत्वे किञ्चिदुच्यते। नापि यज्ञादि कर्माकरणस्य असम्भवोऽभिधीयते येन प्रकृतसङ्गतिः स्यात्किन्तु शरीरयात्राद्यर्थानां कर्मणामपरिहार्यत्वम्। अतो नेदं व्याख्यानम्। अपि तर्हि 'कर्मणा बध्यते जन्तुः२३" इत्येवं सर्वस्य जन्तोः ज्ञानिन अज्ञानिनश्च कर्मबद्धत्वं दर्शयित्वा, गीताश्लोकेऽस्मिन्ज्ञानिने तदन्यायचाकर्मकृत्त्वं नास्तीत्युच्यत इति निरूपितम्। इदमेवोपपादितं श्रीधरस्वामिनाऽपि स्वभाष्ये– "जातु कस्याञ्चिदवस्थायां क्षण- मात्रमपि कश्चिदपि ज्ञानी वाऽज्ञो वा अकर्मकृत्कर्माण्यकुर्वाणो न तिष्ठति २४।" नन्वपरत्र भगवता कृष्णेनैव ज्ञानिनाम- परोक्षज्ञानावाप्तेः कर्मणः कारणत्वम् उपात्तम्। परन्त्वपरोक्षज्ञाना नन्तरं कर्मनिवृत्तिः साधनमिति गीताभाष्ये शङ्कराचार्येण निरूप्यते। "आरुरुक्षोः आरोढुमिच्छतः अनारूढस्य ध्यानयोगे अवस्थातुमशक्तस्यैवेत्यर्थः। कस्य? तस्य आरुरुक्षोः मुनेः कर्मफलसंन्यासिन इत्यर्थः। किमारुरुक्षोः योगम्। कर्मकारणं साधनम् उच्यते। योगारूढस्य पुनः तस्यैव शमः उपशमः सर्वकर्मभ्यो निवृत्तिः कारणं योगारूढस्य साधनम् उच्यते इत्यर्थः" ।२५ तदेवोक्तं रामानुजाचार्येणापि "योगम् आत्मावलोकनं प्राप्तुम् इच्छोः मुमुक्षोः कर्मयोग एव कारणम् उच्यते तस्य एव योगारूढस्य प्रतिष्ठितयोगस्य एव शमः कर्मनिवृत्तिः कारणम् उच्यते। यावदात्मा- वलोकनरूपमोक्षप्राप्ति तावत् कर्म कार्यम् इत्यर्थः२६ । "आनन्दगिरिरपि" सर्वव्यापारोपरमरूपोपशमस्य योगारूढत्वे कारणत्वं विवृणोति" २७ । परन्तु "आरुरुक्षोर्मुनेर्योगः कर्मकारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते२८॥" इत्यत्र नापरोक्षज्ञानिनां सर्वव्यापारोपरम उक्तं युक्तम्। अपरोक्षज्ञानावाप्त्यनन्तरं कर्मनिवृत्तिरित्यस्य गीतायामेव वक्ष्यमाणवचनैर्विरोधो दृश्यते। यथाहि गीतायां तृतीयाध्याये- "कर्मणैव हि संसिद्धिमास्थिता" इत्यारभ्य "सक्ताः कर्मण्यविद्वांसो" .. इति श्लोकषट्के जनकादयः कर्मयोगिनोऽ- पि दिव्यचेतांसि नियतकर्मकरणेनैव संसिद्धिमास्थिता इत्युपपादितम्। स्वयं कृष्णोऽप्यस्मिन्तृतीयाध्याये कर्मयोगे- 'यद्यहं न वर्तेयं कर्मणि, मनुष्याः सर्वे मम वर्त्माऽनुवर्तन्ते, तेऽपि कर्म न कुर्युः, उपहन्यां तान्, इत्युक्त्वा 'विद्वानपि सततं कर्म कुर्यात् – लोकसङ्ग्रहं चिकीर्षुः। बुद्धिभेदमपि न जनयेत्, किन्तु सर्वकर्माणि युक्तः स्थितप्रज्ञः समाचरन्जोषयेत्' इति समुदघोषयत्। न तु कर्मफलासक्त्या, किन्तु "आसक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः" इति२९। तस्मादाह वेदान्तदर्शनाचार्यः मध्वाचार्य इतिप्रथित आनन्दतीर्थः- "आरुरुक्षोः उपायसम्पूर्तिमिच्छोः, योगारूढस्य सम्पूर्णोपायस्य च अपरोक्षज्ञानिनः योगं कर्म परमसुखस्य समाध्यादिफलकारणम्"। उभययोरपि "कर्म ज्यायोह्य कर्मणः"। यथा हि "ये त्वां पश्यन्ति भगवंस्त एव सुखिनः परम्। तेषामेव तु सम्यक्समाधिर्जायते नृणाम्। भोक्तव्यकर्मण्यक्षीणे जपेन कथयाऽपि वा। वर्तयन्ति महात्मा- नस्त्वद्भक्तास्त्वत्परायणाः३० इत्यादौ भाष्योदाहरणे महात्मानः अपरोक्षज्ञानिनः समाधावपि भगवत्परायणाः तन्नाम जपेन तत्कथयावावर्तन्ते सर्वदा इत्युक्तम्। श्रीधरभाष्यमपि संवदत्येतत्" ज्ञानयोगमारोढुं प्राप्तुमिच्छोः पुंसः तदारोहे कारणं कर्मोच्यते, चित्तशुद्धिकरत्वात्। ज्ञानयोगमारूढस्य तु तस्यैव ज्ञाननिष्ठस्य शमः समाधिश्चित्तविक्षेपकर्मोपरमोज्ञानपरिपाके कारण-मुच्यते३१। "अत्र तु चित्तविक्षेप- कारिकर्मणः उपरमः पक्वे ज्ञाने भवतीति"। न तु सर्वस्य कर्मणः'। अत एव "आरुरुक्षोर्मुनेर्योगं" इत्यस्मिन्श्लोके शम इत्युक्ते कर्मनिवृत्तिरिति न, समाधिरित्यर्थः युक्तः भवति - "शमो मन्निष्ठता बुद्धिः, दम इन्द्रियनिग्रहः।३२' शमस्य भगवति बुद्धिरिति भागवते। तेन कर्मकरणं तु साधारणं, तत्रारुरुक्षोः यौगिकं कर्म, योगारूढस्य समाधिः कारणमिति मध्वाचार्यस्य समाधानं, साधु दृश्यते। तदेव द्वादशस्तोत्रस्य आद्यपद्ये 'सततम्' इत्यनेन सूचितम्। इदं स्पष्टं हरिस्तुतौ अष्टमे दशमे च श्लोके - "चतुराननपूर्वविमुक्तगणा हरिमेत्यतु पूर्ववदेव सदा। "'विमलैः श्रुतिशाण- निशाततमैः सुमनोऽसिभिराशुबलिनं निजवैरिणं निहत्य, आत्मतमोभिधमीशमनन्तं हरिं दृढमुपेत। 'अनुश्लोकेऽपि "स्वधिया प्रणतान्स अवति"३३ इति तत्फलमपि।

**महाभारतादिसंवादः**

तस्मादेव गाङ्गेयः शान्तनवः सन्त्रस्तो शरशय्यायां स्थितस्सन्, भगवन्तं मनसि तुष्टाव "एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः। यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा" ३४ इति सर्वदा उपायसम्पूर्तिमिच्छुः सम्पूर्णोपायश्च तमुपेतेति। अपि चान्यत्र भीष्मः स्तौति -"सोऽयं नारायणः श्रीमान्दीप्त्यापरमयायुतः।

व्रतं यथावत्तच्चीर्त्वाद्वारकां पुनरागमत्३५॥ ... अनादिनिधनोऽव्यक्तो महात्मा मधुसूदनः। अयं जातो महातेजाः सुराणामर्थसिद्धये३६॥ "अत्रोभयत्रापि कृष्णस्य गीताप्रतिज्ञार्थः दृश्यते - भगवान्नारायणः व्रतानि करोति, अनादिरपि सुराणा- मर्थसिद्धये जातः । यथाहि "धर्मसंस्थापनार्थाय सम्भवामि पुनः पुनः"। कुत एवं ? "न मे किमपि कर्तव्यमस्ति। न अनवाप्तं वा अवाप्तव्यं, कर्मणि वर्ते एव ३७।" "यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः। सयत्प्रमाणं कुरुते लोकस्तदनुवर्तते ३८॥" इति उपायसम्पूर्तिमिच्छोः सम्पूर्णोपायस्य च मुक्तये लोकस्य सङ्ग्रहार्थम्वाकर्मणः कर्तव्यत्वं सेत्स्यति। तदस्य संवादित्वं उद्धवगीतादिषु भागवते च दरीदृश्यते। तदेवोक्तं गीतायां" सर्वं कर्माखिलं ज्ञाने परिसमाप्यते। "एवं भगवद्गीता-महाभारतेऽन्यत्र बहुषु स्थलेषु कर्मयोगस्य सातत्यं समर्थितम्।

**ज्ञानिनां कर्मकरणे प्रयोजनम्**

वस्तुतस्तु "प्रयोजनं संप्रवृत्तेः कारणं फललक्षणम्। प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते३९"॥ इत्यपरोक्षज्ञानस्य प्राप्त्यनन्तरं किमपि प्रयोजनं नास्ति ज्ञानिनां, अतः किमर्थं कर्मयोगारूढस्य? इति प्रश्नः स्वाभाविकः। तस्य समाधानं मध्वचार्यस्य ईशावास्योपनिषद्भाष्ये नारदीयवाक्योदाहरणे न दत्तं भवति। तथाहि-"अज्ञस्य कर्म लिप्येत कृष्णोपास्तिम् अकुर्वतः। ज्ञानिनोऽपि यतो ह्रासः आनन्दस्य भवेद्ध्रुवम्। अतोऽलेपोऽपि लेपः स्यादतः कार्यैव सा सदा ४०॥" इति। इहलोके विद्यमानं सामान्यसुखं मुक्तावेव परमसुखम्। तस्य परमसुखस्य वृद्धि-ह्रासरूपं कर्मप्रयोजनं ज्ञानिनामस्त्येव। अत अपरोक्षज्ञानिना- मपि कर्म करणीयमेव इति ज्ञायते।

यथोक्तं गीतायां शास्त्रविहितस्यैव कर्मणः कर्तव्यत्वम्। तदस्मिन्स्तोत्रस्या- द्यपद्येऽनूदितम्। "निजं नियतं कर्म कुरु।" इति। तत्रोक्तं विहितकर्म एव कर्तव्यमिति नियतपदेनोक्तम्। यद्यत् 'नियतं'तत्सर्वं कर्तुमर्हति वा इति चोदिते, कष्टसाध्यमित्येवोत्तरम्। तदर्थं 'निजम्'इति स्वोचितं स्वभावानुसारं कर्म कुरु इत्युक्तम्। तदेव कृष्णः "नियतं कुरु कर्मत्वम्"४१ इति गीतायां समवदत्। तस्मात्स्वोचितं -निजं, विहितं-नियतं च कर्म सततं कुरु-तदर्थः कर्तव्यमिति ज्ञायते।

**जनसेवा हि जनार्दनसेवा**

किन्नाम विहितं कर्म ?केवलं जपतपाद्यलौकिकं कर्म वा ?नेत्याह मध्वाचार्यः।

तदिदं मध्वस्य कृपापूर्णं लोकमुखं चिन्तनं स्तोत्रेऽस्मिन्, आरुरुक्षोर्मुनेर्योगमिति गीताश्लोकस्य व्याख्यानावसरे गीतातात्पर्यनिर्णये च चकास्ति। "बहुचित्रजग- द्बहुधाकरणात्परशक्तिरनन्तगुणः परमः" तादृशस्य भगवतः सृष्टिरिदं विश्वं, तस्मै विश्वाय लोकाय यत्कर्म क्रियते- "तत्कर्म हरितोषं यत्"। तस्य कर्मणः" यततोऽपि हरेः ... सकलं हि अघमाशु लयं व्रजति" इति यततः अपि महत्फलमुच्यते। तदेव गीतातात्पर्ये "नानाजनस्य शुश्रूषाकर्माख्याकरवन्मितेः। योगार्थिना तु साकार्या योगस्थेन...। तस्य प्राण्युपकारेण सन्तुष्टो भवतीश्वरः।" विविधाः जनाः समुदायाश्च जगति दृश्यन्ते, प्राणिनश्च। तदेतत्सर्वं जीवजातं भगवदधीनम्– "यदि नामनतस्य वशे सकलं, कथमेव तु नित्यसुखं न भवेत्" इति युक्तिं गायति मध्वभगवत्पादः गीतेऽस्मिन्। तस्मादाह श्रीविश्वेशतीर्थः गीतासारोद्धारे- 'न केवलं स्वाध्यायप्रवचनतपाद्यन्यत्कर्म, कर्माख्या नानाजनस्य शुश्रूषापि, तदिदं योगस्थस्य सम्पूर्णोपायस्यापि कार्यम्, यथा करः (tax) समर्प्यते सर्वकाराय, तथा भगवतः सर्वकारेऽस्मिन्जन-प्राणि-विश्व-सेवा। तेन प्रीतो भवति केशवः४२।'

**निगमनम्**

विहितस्य स्वोचितस्य कर्मणः सम्यगनुष्ठाने किं प्रयोजनम्? ब्रह्मसूत्रभाष्यस्य भाक्ताधिकरणे श्रुतिरुदाहृता - ""कर्मणा ज्ञानमातनोति ज्ञानेनामृती भवति अथा- मृतानि कर्माणि यत एनममृतत्वं नयन्ति४३।" तथा च कर्मफलं ज्ञानलाभः। तत्वज्ञानान्मोक्षः इत्युपनिषत् -"विद्ययाऽमृतमश्नुते४४। "भोऽर्जुन" "भक्तिमान्मे प्रिय" इति भगवद्गीतायां स्पष्टमुपात्तस्य, ब्रह्मसूत्रानुबन्धा- धिकरणे च निबद्धानां मोक्षसाधनेषु भक्तिरेव परमसाधनमित्यभिप्रायेण स्तोत्रेऽस्मिन् मध्वाचार्यः 'निजं नियतं कर्म कुरु' 'फलं भुङ्क्ष्व' "परन्तु हरिपादविनम्र-

धिया सततम्” कुरु इति। अपि च “स्मरतस्तु विमुक्तिपदं परमं स्पुटमेष्यति“ इत्यादिना स्पष्टीकृतं मुक्तिमेष्यति नवविधभक्तिं कुर्वाणेन। तदेवतन्त्रसार- सङ्ग्रहेऽपि “परमस्नेहसंयुक्तयथार्थज्ञानतो भवेत्। सा भक्तिरिति विज्ञेया साधनं भोगमोक्षयोः॥ मुख्यमेषैव नान्यत्स्यात्सर्वं व्यर्थं तया विना। सैकाऽप्यभीष्टफलदा मोक्षो दर्शनयुक्तया ॥“ महाभारत-तात्पर्यनिर्णयेऽपि निदर्शितम्” तया मुक्तिर्नचान्यथा“। तस्मात्भक्तिरेव वरीयसी, कर्म तु ज्ञानसम्पादनाय, नित्यानित्यवस्तुतत्वज्ञाने जाते, शमादि सम्पत्त्या, गीतोक्तरीत्या मध्वोक्तदिशा भगवत्यनन्यमनाः श्रवणादिभिः” सततं शास्त्रविमर्शेन भविष्यति साक्षात्कारः”तत अत्युद्रिक्तया भक्त्या भगवत्प्रसादा- दनिष्टनिवृत्तिः स्वरूपा- नान्दस्येष्टस्याविर्भावलक्षणा मुक्तिर्भवतीति मध्वाचार्यस्य वेदान्तमतं स्तोत्रे सरळं निरूपितम्। एतदेव तत्ववादमतं मध्वाचार्यः भगवद्गीताभाष्यस्य उपोद्घातेऽपि– “भक्त्या प्रसन्नः परमो दद्यात्ज्ञानमनाकुलम्। भक्तिं च भूयसीं ताभ्यां प्रसन्नो दर्शनं व्रजेत्।“ ततोऽपि भूयसीं भक्तिं दद्यात्ताभ्यां विमोचयेत्। मुक्तोऽपि तद्वशो नित्यं भूयो भक्तिसमन्वितः। साध्यानन्दस्वरूपैव भक्तिर्नैवात्र साधनम्।“ तस्मादुच्यते, नैते कर्म,ज्ञानं, भक्तिश्च पृथक्पन्थानः इति। अपि च ज्ञानिनामपि कर्मनिवृत्तिः नास्ति। तथा च ते पन्थानः मिलित्वैवैकं फलं प्रापयन्ति - अनुसन्धाने विचारे ,अनुष्ठाने आचारे च। यत्कर्मज्ञानयुक्तया भक्त्या क्रियते, तत्कर्म मोक्षसाधनम्। तदेतस्मिन्मुक्तौ तु भक्तिः न वा कर्मसाधनस्वरूपम्, किन्तु साध्यस्वरूपम्। इति तत्ववादमतम्।

## पादटिप्पणी-

५. श्वेताश्वतरोपनिषत्, ३.८ ।
६. वेदव्यासस्य ब्रह्मसूत्राणि, ३.३.२३.४८, विद्याधिकरणम् ।
७. मध्वाचार्यस्य ब्रह्मसूत्रभाष्यम्,३.३.२३.४८, विद्याधिकरणम् ।
८. वेदव्यासस्य ब्रह्मसूत्राणि, ३.३.२३.४९, विद्याधिकरणम् ।
९. वेदव्यासस्य ब्रह्मसूत्राणि ३.३.२३.५१, अनुबन्धाधिकरणम् ।
१०. माहे महाभारतम्- मध्वाचार्यस्य महाभारततात्पर्यनिर्णयः १.८५ ।
११. आनन्दतीर्थ भक्तिगीतेगळु, उपोद्घातः ।
१२. शब्दकल्पद्रुमः ।
१३. वेदगर्भपद्मनाभसूरिणः, मध्वसिद्धान्तसारः, कर्मप्रकरणम् ।
१४. माहे महाभारतम्, भगवद्गीता, ३.५ ।
१५. पुरुषपदमत्र न लिङ्गवाची, किन्तु जीवात्मवाची ।
१६. माहे महाभारतम्, भगवद्गीता, १६.२४ ।
१७. वेदगर्भ पद्मनाभसूरिणः, पदार्थसङ्ग्रहः, कर्मप्रकरणम् ।
१८. ईशावास्योपनिषत्, २ ।
१९. मध्वाचार्यस्य ईशावास्योपनिषद् भाष्यम्, २ ।
२०. जयतीर्थस्य ईशावास्योपनिषद् भाष्यटीका, २ ।
२१. मध्वाचार्यस्य द्वादशस्तोत्रम्, ३/४ ।
२२. शङ्कराचार्यस्य भगवद्गीता- भाष्यम्, ३.५ ।
२३. माहे महाभारतम्, १२.२३३.७
२४. श्रीधरस्वामिनः भगवद्गीताभाष्यम्, ३.५ ।
२५. शङ्कराचर्यस्य भगवद्गीता-भाष्यम्, ६.३ ।
२६. रामानुजाचार्यस्य भगवद्गीताभाष्यम्, ६.३ ।
२७. आनन्दगिरेः भगवद्गीताभाष्यम्, ६.३।
२८. माहे महाभारतम्, भगवद्गीता, ६.३ ।

२९. माहे महाभारतम्, भगवद्गीता,६.३ ।
३०. मध्वाचार्यस्य भगवद्गीता भाष्यम्,६.३ ।
३१. श्रीधरस्वामिनः भगवद्गीताभाष्यम्, ६.३ ।
३२. वेदस्यासस्य भागवतपुराणम्, ११.१९.३६ ।
३३. मध्वाचार्यस्य द्वादशस्त्रोत्रम्, ३/४ ।
३४. माहे महाभारतम्, अनुशासनपर्व, १३५.८
३५. माहे महाभारतम्, अनुशासनपर्व, २५२.१९ ।
३६. माहे महाभारतम्, अनुशासनपर्व, २५२.२५ ।
३७. माहे महाभारतम्, भगवद्गीता, ३.२२ ।

## REFERENCES

Bhagavadgitabhashya and Bhagavadgitatatparya by Madhvacharya.

IshavasyopanishadbhashyabyAnandatirtha (Madhvacharya).

DvadashaStotra, by Anandatirtha (Madhvacharya).

AnandatirtharaBhaktigitegalu by BannanjeGovindacharya.

BhagavantanaNalnudi by BannanjeGovindacharya.

MAHE Mahabharata- Digital Concordance and Grammatical Analysis by Department of Philosophy (DoP), MAHE. www.mahabharata.manipal.edu.

Tatvaprakashika with Bhashya and Brahmasutra.

SrimadBhagavadgita: Gita Supersite by IIT, Kanpur https://www.gitasupersite.iitk.ac.in.

Madhvasiddhantasara with Padarthasangraha by Padmanabha Suri.

Gita Saroddhara by VishveshaTirtha.

The Path of Proofs- Pramanapaddhati of Sri Jayatirtha by ShrinivasaVarakhedi.

Contact Details,
**Gowtham R,**
Department of Philosophy
Floor VI, ARC, Madhav Nagar, Manipal – 576104,
Udupi, Karnataka.
M: +91-9738201115
E-mail : gow.gowthamr@gmail.com

**********

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# पुराणानि प्रति श्रीमध्वाचार्यस्य योगदानम्

**डा. एस्. आनन्दतीर्थः (मणिपाल)**
संशोधकः, तत्वज्ञानविभागः,
मणिपालविश्वविद्यालयः (MAHE)

इति ह शुश्रुम, यद्द्वापरे युगे मानुषमानसेषु तमः सम्बभूव। तन्निरसनार्थमेव भगवान्बादरायणभास्कर अवततार। उद्दधार नष्टप्रायान्शास्त्रग्रन्थान्। वेदान्त्रेधा विभज्य वेदव्यासो बभूव। तेनैव महाभारतं नाम पञ्चमो वेदः, पुराणसंहिताश्च उज्जग्मुः। एतेषां निर्णयायैव श्रीमन्न्यायसूत्राण्यपि रचयाम्बभूव। एतान्येव ग्रन्थरत्नानि वैदिकविपश्चितां प्रमाणतममिष्यन्ते।

किन्त्वत्र अयं गमनीयांशः, अतीन्द्रियतत्वनिर्णये न प्रत्यक्षं प्रमाणं भवितुमर्हति, नापि च अनुमानम्। अत एव आस्तिकमताचार्याः अतीन्द्रियविषये शब्दप्रमाणस्यैव आधिक्यं समर्थयन्ते। वैदिकमताचार्यैस्तु बह्वत्र स्वग्रन्थेषु वेदोपनिषदादय एव प्रामाण्यतयोल्लिख्यन्ते। अत एव प्रायः सर्वैरपि मताचार्यैः श्रुतिप्रस्थानं (उपनिषत्प्रस्थानम्), सूत्रप्रस्थानम् एवं गीताप्रस्थानञ्च व्याख्यायन्ते। बहुविरलमुपलभ्यन्ते पुराणव्याख्यानानि। वेदोपनिषद्वचनान्येव उद्धृत्य स्वमतं प्रतिपादयन्ति। अतेयं संशीतिर्भवत्येव किमस्ति तत्वनिश्चये पुराणानामावश्यकत्वम् इति। अत एव वैदिकवाङ्मये पुराणानां स्थानं कीदृशमिति न स्फुटीभवति। यदि च वैदिकवाङ्मये पुराणान्यपि प्राधान्यं भजन्ते, तर्हि तेषां प्रामाण्यमपि साधनीयम्। ग्रन्थानां तावत् आप्तवाक्यतयैव प्रामाण्यं वक्तव्यम्। अथ च पुराणानां आप्तवाक्यता कथं सिध्यति इत्यपि अवश्यं प्रतिपादनीयम्। तदत्र श्रीमध्वाचार्यस्योपायनम् अपूर्वम्। अस्य जिज्ञासाद्वयस्य उत्तररूपेण समग्रानां पुराणनां प्रधान्यं प्रादृश्यत। तत्कथमिति सङ्क्षेपेणात्र पश्यामः।

## पुराणानां प्राधान्यम्

श्रीमध्वचार्यः कदाऽपि स्वकपोलकल्पितं, प्रमाणातीतं न ब्रूते। नाऽपि अनुमन्यते। नैव ग्रन्थे ग्रथ्नाति च। शास्त्रवचनानुदाहृत्यैव स्वमतं स्थापयति। अत्र च इदं वैशिष्ट्यं यत्, श्रीमध्वाचार्यस्तु सर्वमूलग्रन्थेषु अत्यधिकतया पुराणवचनान्येव उदलिखत्। **सर्वमूलेषु१८ पुराणानां ९६२वचनानि उल्लिख्यन्ते–**

वैष्णवपुराणानां वचनानि - ४६१

ब्राह्मपुराणानां वचनानि - २८८

शैवपुराणानां वचनानि– १०७

**उपपुराणानि-**

नरसिंहपुराणस्य वचनम् - २

आदित्यपुराणस्य वचनम्– ३

अत्र शिवपुराणस्य लिङ्गपुराणास्य च वचनानि नोद्धृतानि। तथा च अनेन वैदिकप्रपञ्चे पुराणानामपि प्राधान्यं वर्तते एव इति श्रीमध्वचार्येण परोक्षतया सूचितं भवति। न तावदेव, श्रीवेदव्यासवचनमेवोदाहृत्य सोदाहरणं प्रत्यपादयच्च। महाभारतस्यैव वचनमिदम्-

**१इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति।।**

तत्वनिर्धरणे वेदा एव परमप्रमाणानि। किन्तु वेदाः न केवलं मन्दधिषणानाम्, अपि तु प्रज्ञाप्रकाशेन तुलितधिषणानामपि दुरूहा एव। दुरधिगमा एव। अत एवेदं वचनं भगवतः बादरायणस्य 'इतिहासपुराणाभ्यां...' इति। तत्वज्ञानार्थं इतिहासोऽप्या- वश्यकः, पुराणान्यपि। स्वातन्त्र्येण तेषामप्यध्ययनं निष्फलमिव भाति। अत एव इतिहासपुराणाभ्यां वेदं समुबृंहयेत्। तदैव प्रतिभाति अमेयं प्रमेयम्। इति ह भगवतः व्यासमहर्षे आदेशः। केवलेन श्लोकैकेन नेदं स्फुटीभवति। उदाहरणेनैव विमर्शयामः-याज्ञीयमन्त्रोपनिषदि प्राथम्येन पठ्यतेऽयं मन्त्रः-

**२ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्। तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यचिद्धनम्।।**

**स्वायम्भुवो मनुः एतैर्मन्त्रैर्भगवन्तमाकूतिसूनुं यज्ञनामानं विष्णुं तुष्टाव** इति श्रीमध्वचार्य एव ब्रह्माण्डवचनमुद्धृत्य अस्योपनिषदः पौर्वापर्यं न्यरूरुपत्। किन्त्वत्रेयं संशीतिर्जायते, स्वायम्भुवस्तु 'भुञ्जीथा', 'मा गृधः' इत्यादिभिः पदैः कं सम्बोधति? न तावत्भगवन्तमेव सम्बोधनम्। स्तोत्रमध्ये 'भुञ्जीथा' इति आदेशस्याप्रस्तुत्वात्। नान्यो जीवः तत्रासीत्। तत्स्पष्टनार्थं भागवतपुराणमव- लोकनीयम्। भागवते अष्टमस्कन्धे अस्य इतिवृत्तं प्रस्तूयते। तत्र च समानं पद्यं किञ्चिद्विभिन्नतया पठ्यते -

**३आत्मावास्यमिदं विश्वं यज्जगत्यां जगन्मनः। तेनत्यक्तेन भुञ्जीथा मा गृधः कस्यचिद्धनम्।।**

अत्र तु सुविवृतम्। 'यज्जगत्यां जगन्मनः' इति मनः सम्बोध्य आदिशति मनुः। तथा च 'भुञ्जीथा', 'मा गृधः' इत्यादीनि वचनानि तु स्वात्ममेव मनः सम्बुध्य उप- दिष्टानि इति भागवतवचनमनुसृत्य सुस्पष्टं भवति। एवञ्च वेदस्याध्ययनमात्रेण तत्वविद्या न स्फुरति। नाऽपि पुराणेतिहासानामध्ययनमात्रेण। अपि तु सर्वानपि शास्त्रग्रन्थान्वेदेतिहासपुराणादीन्समुपबृंहणं कृत्वा अध्येतव्यम् इति तु अनेन स्पष्टीभवति।

गमनीयमेतत् यत् पूर्वमतर्कितमिदं प्रमेयम् ऐदम्प्राथम्येन श्रीमध्वाचार्यः प्रकट्यक्रियत। स्वग्रन्थेषु च सर्वत्र सयुक्तिकं, सप्रमाणं समार्थयताऽपि। तदिदं पुराणानि प्रतिप्रथममद्वितीयमुपायनम्श्रीमध्वचार्यस्य।

## पुराणानांप्रामाण्यसमर्थनम्

भवतु नाम वैदिकवाङ्मये पुराणानामपि प्राधान्यम्। किन्तु तेषां प्रामाण्यं कथं सिध्यति? वेदानां तावत् अपौरुषेयत्वेन प्रामाण्यं साध्यते। पुराणानाञ्च आप्तवाक्यतया प्रामाण्यं साधयेत्। प्रायः सर्वेऽपि मताचार्याः वेदव्यासं ऋषिम् इति वा भगवदंशभूतं एकं ऋषिमिति आमनन्ति। तादृशेन ऋषिणा प्रणीतत्वादेव आप्तवाक्यरूपेण पुराणानि प्रमाणानि इति सङ्गिरन्ते। किन्तु श्रीमध्वचार्यस्तु वेदव्यासं भगवतः साक्षादवतारमिति प्रत्यपादयत्।

**४नारायणाद्विनिष्पन्नं ज्ञानं कृतयुगे स्थितम्। ...तैर्ज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः ॥**

**अवतीर्णो महायोगी सत्यवत्यां पराशरात् – स्कान्दे**

**५कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम्। को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत्।। (वायुप्रोक्तवचनम्)**

इति वैदव्यासस्य भगवदवतारतां बह्वत्र च सर्वमूलग्रन्थेषु सप्रमाणं समार्थयत।

किन्तु अन्ये च बहवः वेदव्यासं ऋषिसामान्यमित्याहुः। तथा एव पठ्यते च बह्वत्र शास्त्रग्रन्थेषु '**मुनीनामप्यहं व्यासः**' इति गीताचार्यस्यैव वचनम्। भगवद्गीतायां विभूतियोगे मुनिषु वेदव्यासे अहम्(भगवान्) विभूतिरूपेण अस्मि इत्याचष्ट। तथा च व्यासः न भगवदवतारः इति परोक्षेण सिध्यत्येव। भागवतेऽपि एतादृशं वचनमस्ति – ६ **यो ह्यात्मा ...ऋषिणा चक्रे पुनः संहिताम्** इति। अत्रापि ऋषित्वेन व्यासं उल्लिखति। तर्हि कुत्र विश्वसिमः? उभयविधस्यापि वाक्यस्य सद्भावात्। नहि इतिहासो विकल्पमर्हति। इदं वा स्याददो वा। यदि भगवदवतारकथनं तथ्यं स्यादन्यदतथ्यम्। अथवा ऋषिसामान्यपरवचनं तथ्यं चेदन्यदतथ्यम्। अथवा उभयमपि अतथ्यमेव। नोभयमपि तथ्यं भवति। इति वेदव्यासमहर्षेः स्वरूपविषयकी इयं निरुत्तरा समस्या प्रायः पूर्वं अपरिहृतैव। अत्र विरोधं पर्यहरत् श्रीमध्वचार्यः। ऐकार्थ्यं पर्यदर्शयत्।

भागवते द्वितीयस्कन्धे भगवनेव व्यासत्वेन अवततार इति वर्ण्यते।

**७कालेन मीलित दृशामवमृश्य नृणां तोकायुषां स्वनिगमो बत दूरपारः।**
**आविर्हितस्त्वनुयुगं स हि सत्यवत्यां वेदद्रुमं विटपशो विभजिष्यति स्म।।**

तद्व्याख्यानव्याजेन श्रीमध्वचार्यः अस्य विरोधं सप्रमाणं पर्यहरत् –

**८तृतीये सप्तमे चैव षोडशे सप्तविंशके। अष्टाविंशे युगे कृष्णः सत्यवत्यामजायत।।**
**व्यासाचार्यस्तु पूर्वेषु चरमे स्वयमेवतु। विव्यास वेदांश्चक्रे च भारतं वेदसम्मितम्।।**

वैवस्वतमन्वन्तरे पुनः पञ्चवारं व्यासः अवततार। किन्तु न सर्वोऽपि भगवदवतार एव। तृतीये द्वापरे, सप्तमे, षोडशे, सप्तविंशके च द्वापरयुगे अन्ये ऋषयः व्यासत्वेन अवातरन्। चरमे च अष्टाविंशे द्वापरयुगे साक्षात्भगवानेव व्यासत्वेन अवातरत्। इति हि अस्य प्रमाणस्याभिप्रायः। तर्हि सर्वं सुकरम्।

यत्र च व्यासस्य ऋषित्वेन उल्लेखः तत्र अपरव्यासऋषिः प्रतिपाद्यते। यत्र च भगवदवतारत्वेन उल्लेखः तत्र च अष्टाविंशे द्वापरे अवतीर्णो भगवान् व्यास एव प्रतिपाद्यते। एवम् अपरे चत्वारः व्यासाः भगवदंशभूताः। तदेव भगवद्गीतादिषु प्रास्तवीत्। अन्ते च भगवानेव व्यासत्वेन अवतीर्य पुराणानि रचयाम्बभूव। इति धिया सर्वज्ञप्रणीतत्वेन एवं वेदानुसारित्वेनापि पुराणानां प्रामाण्यं सिध्यति। इति एतेषां समन्वितमर्थं प्रदर्श्य पुराणानां प्रामाण्यं समार्थयत श्रीमध्वाचार्यः।

### १. पुराणनां ऐकार्थ्यसमर्थनम्

भवतु वा पुराणानां प्राधान्यम्। अस्तु च तेषां भगवत्प्रणीतत्वेन प्रामाण्यमपि। किन्तु अस्त्येव इतोऽपि संशीतिलेशः। अष्टादशपुराणेषु च बहुधा वैरुध्यं दरीदृश्यते। उदाहरणार्थं एकमेव नरसिंहावतारकथानकं पुराणेषु विभिन्नतया एव पठ्यन्ते। स्कान्दे पुनः नरसिंहः हिरण्यकशिपोः वधार्थमेवावतरति। किन्तु तत्र प्रह्लादस्य नामापि नोल्लिख्यते। देवतानां प्रार्थनामनुसृत्य भगवान् नरसिंहरूपेण अवतीर्य हिरण्यकशिपुं अघ्नन्। विष्णुपुराणे च प्रह्लादानुग्रहार्थमेव नरसिंहस्यावतारः। किन्तु नरसिंहो हिरण्यकशिपुं न जघान। एवं पुराणेषु निरूपितकथानकासु वा प्रमेयेषु बहुधा वैरुध्यं दृश्यते। पूर्वोक्तदिशा नेतिहासे वैकल्प्यं घटते। विरुद्धेषु च प्रमेयेषु, इतिहासेषु वा एकमेव तथ्यं स्यात्। अन्यत्सर्वं अयथार्थमेव भवितव्यम्। तर्हि तादृशानां अयथार्थपराणां पुराणानामपि अयथार्थत्वमेव सिध्यति। कथमत्र विरोधपरिहारः?

श्रीमध्वाचार्यस्तु एषां सन्देहानां परिहारपथं प्रादर्शयत्। पुराणानि च न लोकभाषया न्यरस्यन्त। तत्र च विशिष्टाः भाषाः, निरूपणे विशिष्टाः क्रमादयश्च उपयुक्ताः। तदनुसारमेव पुराणानि अनुसन्धेयानि इति हि श्रीमध्वाचार्यस्य मतम्।

### २. भाषात्रयम्

पुराणेषु उपयुज्यमानं भाषात्रैविध्यं महाभारततात्पर्यनिर्णये एवं निरूप्यते -

**९भाषास्तु त्रिविधास्तत्र मया वै सम्प्रदर्शिताः। उक्तो यो महिमा विष्णोः सतूक्तोहि समाधिना।**
**शैवदर्शनमालम्ब्य क्वचिच्छैवी कथोदिता।। समाधिभाषयोक्तं यत्तत्सर्वं ग्राह्यमेव हि ।**
**अविरुद्धं समाधेस्तु दर्शनोक्तं च गृह्यते ।। आद्यन्तयोर्विरुद्धं यद्दर्शनं तदुदाहृतम् ।**
**दर्शनान्तरसिद्धञ्च गुह्यभाषाऽन्यथा भवेत् ।**

तत्र च स्पष्टं सर्वैर्यथा ज्ञायते तथा कथनं समाधिभाषा । यथा -

'**नास्ति नारायणसमं न भविष्यती**'त्यादिकम्।

शैवादि अवैष्णवं दर्शनमाश्रित्य क्वचित्दुर्गा-शिवादिमहिमावादिनी कथा निरूप्यते। यथा शान्तिपर्वणि रुद्रं प्रति कृष्णस्य तपश्चरणादि कथा। समाधेः विरुद्धं दर्शनोक्तं न याथार्थ्येन ग्राह्यम्। अविरुद्धञ्चेत्ग्राह्यमेव तत्।

अर्थं निगूह्यकथनं गुह्यभाषा। यथा **नदीजलं केशवनारिकेतुर्न गाह्वयो नाम नगारिसूनुः**...इत्यादिकम्। हे नदीज भीष्म, लङ्केशव नस्यारिः- हनूमान्केतौ- यस्य सः- अर्जुनः इत्यादिक्रमेण अत्र अर्थं निगूह्य निरूप्यते।

एवञ्च यः त्रिभाषां न जनाति सः पुरणानामान्तर्यमपि न ज्ञातुं प्रभवति।

### ३. निरूपणे सप्तभेदाः

एवमेव पुराणानि सप्तक्रमेण निरूयन्ति इति सप्रमाणं प्रतिपादितं महाभारत तात्पर्यनिर्णये-

**१०व्यत्यासः-प्रातिलोम्यञ्च-गोमूत्री-प्रघस-स्तथा । उक्षणः-सुधुरः-साधुःस्पतभेदाः प्रकीर्तिताः ।।**

अत्रोक्तदिशा व्यत्यासादि निरूपणाप्रभेदाः पुराणेषु अनुसृताः। ग्रन्थविस्तरभिया एतेषां लक्षणं न प्रत्येकतयात्र निरूप्यते।

### ४. रीतीनां शतम्

एवमेव वैदर्भी, गौडीइत्यादि रीतीनां शतमपि पुराणेषु अन्वसरत्। तथा च अयमत्र श्रीमध्वचार्यस्यवचनम्-

**११त्रिभाषा यो न जानाति रीतीनां शतमेव च। व्यत्यासादीन्सप्तभेदान्वेदाद्यर्थं तथा वदेत्।**

**स याति निरयं घोरमन्यथा ज्ञानसम्भवम्।।**

इति भाषा त्रैविध्यं, रीतीनां शतम् एवं व्यत्यासादि निरूपणाप्रभेदान् अविदित्वा पुराणानां, वेदादिशास्त्राणां वा अभिप्रायः न स्फुटीभवितुमर्हति। अत एतान्विदित्वा पुराणानामध्ययनेन अन्यथा ज्ञानमेव भवति। तत्तु नरकायैव भवततीति हि श्रीध्वाचार्यस्य सप्रमाणं वचनम्। शास्त्राध्ययननिरताः इदमत्रा- वश्यमवधेयम्। प्रथममितिहासानामधीतिः, पुराणानाञ्च। तथा तदवलम्ब्य वेदोपनिषदां च अध्ययनम्। तदैव विजृम्भते तत्वसारः। इति ह माध्वीवाणी। न केवलमिदं श्रीमध्वाचार्यस्य वचनमात्रम्। भागवत-महाभारत-पुराणादीनां परस्परं वैरुध्यं परिहृत्य समस्तवेदशास्त्रारूढतया समन्वित्य निरणय- त्सर्वमूलग्रन्थेषु विशिष्यमहाभारततात्पर्यनिर्णय-भागवततात्पर्यनिर्णयग्रन्थेषु।

**फलितार्थः**

पुराणानि प्रति श्रीमध्वाचार्यस्य योगदानं कीदृशमिति परिमितपदैः, परिमितावकाशे निरूपणं दुष्करमेव। तथापि सङ्गृह्य एवं वक्तुं शक्यते, श्रीमध्वाचार्यस्तु–

१. पुराणानां प्राधान्यं प्रादर्शयत्।

२. पुराणानां प्रामाण्यं समार्थयत।

३. पुराणानां ऐकार्थ्यं प्रकट्यक्रियत।

इति ह पुराणानि प्रति श्रीमध्वाचार्यस्य निरुपमानम् अपूर्वं योगदानम्।

॥ इति शम् ॥

**पादटिप्पणी-**

१. म. भा. आदि प. ०१-२०४ । २. ई. उ. १-१ । ३. भागवतम्, ८-१-१० । ४. ब्र. सू. भा. उपोद्घातम् । ५. म. भा. ता. नि., २-५५ ६. भाग., १०-९४-४९ ७. भाग., २-७-३६ । ८. भाग. ता. नि., २-७-३६ । ९. म. भा. ता. नि., २-१२१-१२३ । १०. म. भा. ता. नि., ९-१३९ । ११. म. भा. ता. नि., ९-१३८/१३९ ।

**REFERENCES**

* Bannanje, Govindacharya, ed. 2009. Sri Mahabharata Tatparyanirnaya of SriAnanda Tirtha Bhagavatpada. Udupi: Tattva SamshodhanaSamsat.
* Krishnacharya, T.R. and T. R. Vyasacharya, 1914. SrimanMahabharatam. Kumbhakonam: Madhva Vilas Book Depot and Nirnayasagar Press.
* Sheshgiri Acharya, P.S. 2004, SrimdBhagavatam of Sri Vedavyasa, Bengaluru: Poornaprajna SamshodhanaMandiram.
* Bannanje, Govindacharya, 2005, Upanishatchandrika, Bengaluru: IshavasyaPratisthanam.
* Sarvamulagranthah: 1969, Bengaluru: Akhilabharatamadhva mahamandalam.
* S. Anandateertha, 2016, TryambakamYajamahe, KukkeSubrahmanya: VedavyasaSamshodhanaKendram.

**डा. एस्. आनन्दतीर्थः**

संशोधकः,

तत्वज्ञानविभागः,

मणिपालविश्वविद्यालयः (MAHE)

मणिपालः, उडुपि, कर्नाटक

Mobile : 9743449915

E-mail : sagriananda@gmail.com

*******

Journal of Veda Samskrita Academy, ISSN 2250-1711
Volume XVIII : July to December – 2021

# व्याप्तिस्वरूपे साध्याभावाधिकरणवृत्तित्वसामान्याभावविचार:

**डा. वि. वि. एस्. आर्. लक्ष्मीः**
सहायकप्राध्यापिका, न्याय-वैशेषिक विभागः
कर्नाटक संस्कृत विश्वविद्यालयः, बेङ्गळूरु

**उपोद्घातः -**

धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु आत्यन्तिकदुःखनिवृत्त्यात्मको मोक्ष एव परमपुरुषार्थः। मोक्षहेतुनिरूपणार्थमेव दर्शनानां प्रादुर्भाव: । दृश्यते अनेन इति दर्शनम्। येन साधनेन इदं विश्वम्, इदं वस्तुजातम्, जीवात्मा, प्रकृतिश्च याथातथ्येन दृश्यते, समीक्ष्यते, तद्दर्शनम्। तच्च दर्शनम् आस्तिकनास्तिकभेदेन द्विविधम् । वेदप्रामाण्यं ये अभ्युपगच्छन्ति ते आस्तिकाः, तेषां दर्शनमास्तिकदर्शनम् इति । ये वेदप्रामाण्यं नाभ्युपगच्छन्ति ते नास्तिकाः, तेषां दर्शनं नास्तिकदर्शनम् इति। आस्तिकदर्शनानि-न्याय, वैशेषिक, सांख्य, योग, पूर्वमीमांसा, उत्तरमीमांसा इति । नास्तिकदर्शनानि-चार्वाकम्, जैनम्, बौद्धम् चेति ।

**न्यायदर्शनम् -**

वेदप्रामाण्यं पुरस्कृत्य प्रवृत्तानि दर्शनानि आस्तिकदर्शनानि । तत्र च अन्यतमं भवति न्यायदर्शनम्। न्यायशास्त्रस्य प्राचीनाभिधानमान्वीक्षिकी वर्तते । तथा हि- "याऽऽन्वीक्षिकी आत्मविषये विचारं कुरुते सा दर्शन"मिति कथ्यते । मनुरपि आन्वीक्षिकीम् आत्मविद्यावदमन्यत, प्रयोगश्च विहितः । तथा हि -

**त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम् । आन्वीक्षिकीञ्चात्मविद्यां वार्तारम्भाश्च लोकतः ।।** १ इति

## न्यायशास्त्रे अनुमानप्रामाण्यस्य वैशिष्ट्यम् -

न्यायदर्शनस्य प्रमाणतन्त्रम्, प्रमाणविद्या इति च प्रसिद्धिः। पदार्थोद्देशसूत्रे प्रमाणमेव प्रथमं सूत्रयता गौतमेन प्रमाणस्यैव स्वशास्त्रप्रधान प्रमेयत्वं समसूचि ।परमकारुणिकेन महर्षिणा गौतमेन षोडशपदार्था: यद्यपि उद्देशलक्षणपरीक्षादिभिः निरूपिता: तथापि सर्वेपदार्था: प्रमाणाधीना: इति। सर्वेषां पदार्थानां तत्त्वनिर्णयाय प्रमाणतत्त्वं सम्यग्विवेचनीयमित्याशयेन नव्यन्यायशास्त्रप्रवर्तकत्वेन गङ्गेशोपा- ध्यायेन "**प्रत्यक्षानुमानोपमानशब्दा: प्रमाणानि**"२ इत्येकमेव सूत्रमवलम्ब्य चिन्तामणिनाम्ना अतिमहान् ग्रन्थः निरमायि । न्यायशास्त्रे तावत् चत्वारि प्रमाणानि अङ्गीकृतानि तद्यथा प्रत्यक्षानुमानोपमानशब्दाः इति प्रमाणचतुष्टयेषु अनुमानस्यैव प्राधान्यं न्यायमते मुख्यतया प्रतिपादयन्ति। ये तावत्तर्करसिका भवन्ति ते प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्त इति प्रसिद्धिरपि वर्तते । तद्यथा- **"प्रत्यक्षपरिकलितमप्यर्थम् अनुमानेन बुभुत्सन्ते तर्करसिका:"** इति वचनमनुमानगतं वैलक्षण्यं विद्योतयति।

न्यायसूत्रेषु अनुमानसम्बन्धि एकमेव सूत्रमुपलभ्यते । तथा हि - **"अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतोदृष्टञ्च"**३ इति। अस्मिन् सूत्रे महर्षिः गौतमोऽनुमानलक्षणं तद्विभागञ्च सहैव करोति । तत्पूर्वकमित्यनेन सपक्षेषु लिङ्गलिङ्गिनो: साहचर्यदर्शनेन व्याप्यव्यापकभावसम्बन्धग्रहो भवति । पक्षे च लिङ्गप्रत्यक्षं गृह्यते । सपक्षे साध्यसाधनयोः सम्बद्धयोरेव प्रत्यक्षं भवतीति, पक्षे साध्यसाधनयोरन्यतरस्य साधनस्य दर्शनाद् एकसम्बन्धिज्ञान- मपरसम्बन्धिस्मारकमित्यनेन न्यायेन साध्यस्मृतिर्जायते । एवञ्च साधनप्रत्यक्षेण साध्यस्मृतिर्भवतीति, दृष्टेन साधनेनाऽप्रत्यक्षस्य साध्यस्य पक्षेऽनुमितिर्भवति । तच्चानुमानं त्रिविधम् (१)पूर्ववत् (२) शेषवत् (३) सामान्यतोदृष्टम् च ।

नवीना: तावत् अनुमानं द्विधा विभक्तं वर्तते । तच्च स्वार्थं-परार्थञ्चेति।

तत्रानुमितिकरणमनुमानमिति अनुमानसामान्यलक्षणमिति तर्कसंग्रहे प्रति- पादितम् । तत: परं का नाम अनुमिति: इति जिज्ञासायां परामर्शजन्यं ज्ञानमनुमिति: इति अनूदितम् । तदनु को नाम परामर्श: इत्याशङ्कायां व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्श: इति भणितम् । तत्र का नाम व्याप्ति: इति जिज्ञासायां व्याप्ते: बहूनि लक्षणानि प्रतिपादितानि वर्तन्ते । व्याप्ते: पूर्वपक्षलक्षणानि अनूद्य केवलान्वयिनि सद् हेतौ अव्याप्तिः भवति

इति सिदान्तव्याप्तिलक्षणम् प्रदर्शितम् गङ्गेशोपाध्याय: अस्मिन् पत्रे पूर्वपक्षव्याप्ते: प्रथमलक्षणे वृत्तित्वसामान्याभावविचार: कृतः -

**साध्याभाववदवृत्तित्वम्४** पूर्वपक्षव्याप्ते: प्रथमलक्षणम्। साध्याभावा- धिकरणनिरूपितवृत्तित्वाभावः व्याप्तिरिति लक्षणार्थ: । एवञ्च साध्यनिष्ठप्रति- योगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः व्याप्ते: स्वरूपलक्षणम् इति फलितम्। **"साध्यनिरूपिता हेतुनिष्ठा व्याप्ति:"** इति नियमानुसारेण हेतौ समन्वयः । तथा हि- पर्वतो वह्निमान् धूमादित्यत्र साध्यो वह्निः, साध्यनिष्ठप्रति -योगितानिरूपकाभावः वह्निनिष्ठप्रतियोगितानिरूपक: वह्निर्नास्तीत्याकारक- प्रतीतिसिद्धाऽभावः, तादृशाभावाधिकरणं जलह्रदः, तन्निरूपितवृत्तित्वं मीन शैवा- लादौ, वृत्तित्वाभावः धूमे वर्तत इति लक्षणसमन्वयः। पर्वतो धूमवान् वह्नेः इत्यत्र धूमनिष्ठप्रतियोगितानिरूपकाभावः धूमो नास्तीत्याकाराकप्रतीतिसिद्धाभावः, तादृशा- भावाधिकरणं तप्ताऽयोगोलकं, तन्निरूपितवृत्तित्वमेव वह्नाविति नातिव्याप्तिः ।

**साध्याभावाधिकरणवृत्तित्वसामान्याभावविचार: -**

साध्याभावाधिकरणवृत्तित्वाभावश्च तादृशवृत्तित्वसामान्याभावो बोध्यः। अन्यथा पर्वतो धूमवान् वह्नेः इत्यत्र धूमाभाववद्ध्रदनिरूपितवृत्तित्वाभावः वह्नौ वर्तत इत्यतिव्याप्तिः । अतः वृत्तित्वाभावः इत्यनेन वृत्तित्वसामान्याभावो ग्राह्यः । तथा च लक्षणमित्थं फलति "साध्याभावाधिकरणनिरूपितवृत्तित्वत्वावच्छि- न्नाभावः" व्याप्तिरिति एवञ्च साध्याभावाधिकरणनिरूपितवृत्तित्वत्वावच्छि- न्नाभावः इत्यनेन धूमाभाववद्ह्रदनिरूपितवृत्तित्वाभावो नैव ग्राह्यः अपि तु धूमाभावाधिकरणवृत्तित्वं नास्ति इत्याकारकाभाव एव ग्राह्यः तथा च धूमाभावाधिकरण अयोगोलकादि (यत्किञ्चित् विशेषव्यक्ति) वृत्तित्वसत्त्वे, धूमाभावाधिकरण- वृत्तित्वत्वावच्छिन्नाभावः वह्नौ नायातीति नातिव्याप्तिः।

अस्मिन् स्थलेऽतिव्याप्तिः न्यूनवारकपर्याप्तिनिवेशनेनैव वारयितुं शक्यते। तथा हि - न्यूनवारकपर्याप्तिनिवेशप्रकारस्तु **"साध्याभावनिष्ठावच्छेदकतानिरूपिकाऽ- धिकरणत्वनिष्ठावच्छेदकतानिरूपिका, याऽधिकरणनिष्ठावच्छेदकता, तन्निरूपिका वृत्तितात्वनिष्ठावच्छेदकतानिरूपिका च या वृत्तित्वनिष्ठा प्रतियोगिता, तन्निरूपकाभावो" व्याप्तिः इति ।**

एवञ्च धूमाभावनिष्ठावच्छेदकतानिरूपिकाऽ- धिकरणत्वनिष्ठावच्छेदकतानिरूपिका याऽधिकरणनिष्ठा अवच्छेदकता ह्रदात्मका- धिकरणनिष्ठावच्छेदकता न भवति, यतः एतादृशी अवच्छेदकता ह्रदत्व- निष्ठावच्छेदकतानिरूपिका एव, न तु अधिकरणत्वनिष्ठावच्छेदकतानिरूपिका इति ह्रदनिरूपित-वृत्तित्वाभावमादाय नातिव्याप्तिरिति वृत्तित्वसामान्याभाव निवेशो व्यर्थ: ।

एवमपि अस्मिन्नेव स्थले धूमाभावाधिकरणह्रदनिरूपितवृत्तित्वाभाव- मादायाऽतिव्याप्तिः भवत्येव। तथा हि-साध्याभावनिष्ठावच्छेदकतानिरूपिका अधिकरणत्वनिष्ठावच्छेदकतानिरूपिका याऽधिकरणनिष्ठा अवच्छेदकता इत्यनेन **"अधिकं तु"** इत्यादि न्यायेन अर्थात् अधिकं तु प्रविष्टं न तद्धान्यै इत्यनेन धूमाभावा- धिकरणह्रदनिष्ठावच्छेदकता ग्राह्या। तादृशाधिकरणनिष्ठा- वच्छेदकता निरूपिका वृत्तितात्वनिष्ठा- वच्छेदकतानिरूपिका या वृत्तित्वनिष्ठा प्रतियोगिता इत्युक्तौ धूमाभावाधिकरणह्रदनिरूपितवृत्तित्वं नास्तीत्याकारकाभावीयवृत्ति- त्वनिष्ठा प्रतियोगिता भवति, तन्निरूपकाभावः वह्नाविति अतिव्याप्तिः। एतादृशातिव्याप्तिस्तु इतरवारकपर्याप्तिनिवेशनेन वारयितुं शक्यते। इतरवा- रकपर्याप्तिनिवेशप्रकारस्तु- **"साध्याभावनिष्ठावाच्छेदकताभिन्नाऽधिकरणत्वनिष्ठा- वच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका, एतादृशावच्छेदकता- द्वयनिरूपिका याऽधिकरणनिष्ठावच्छेदकता तन्निरूपिका या वृत्तित्वनिष्ठा प्रतियोगिता तन्निरूपकाभावो" व्याप्तिः इति।** एवं च धूमाभावाधिकरणह्रद- निष्ठावच्छेदकता, साध्याभावनिष्ठावच्छेदकता- भिन्नाऽधिकरणत्वनिष्ठावच्छेद-कताभिन्ना याऽवच्छेद- कता ह्रदत्वनिष्ठावच्छेदकता, तन्निरूपिका एव भवति, तदनिरूपिका न भवतीति, धूमाभावाधिकरणह्रदनिरूपितवृत्तित्वाभावमादाय नातिव्याप्तिः। अत: अस्मिन् स्थले अतिव्याप्तिवारणार्थम्

**साध्याभावनिष्ठावच्छेदकताभिन्नाऽधिकरणत्वनिष्ठावच्छेदकताभिन्नाऽधिकरणत्वनिष्ठावच्छेदता भिन्ना च या अवच्छेदकता, तदनिरूपिका एतादृशावच्छेदकताद्वयनिरूपिका याऽधिकरणनिष्ठावच्छेदकता, तद्भिन्ना वृत्तिता-त्वनिष्ठावच्छेदकताभिन्ना च याऽवच्छेदकता, तदनिरूपिका एतादृशावच्छेद- कताद्वयनिरूपिका या वृत्तित्व-निष्ठप्रतियोगिता तन्निरूपकाभावः** इत्यर्थकवृत्तित्वसामान्याभावपर्यन्तनिवेशो व्यर्थः ।

यदि एतादृशरीत्या वृत्तित्वसामान्याभावनिवेशो व्यर्थ इत्युच्येत, तर्हि धूमवान् वह्नेः इत्यत्रैव धूमाभाववद्वृत्तित्वजलत्वोभयाभावमादायाऽतिव्याप्तिः, अर्थात् धूमाभावाधिकरणनिरूपितवृत्तित्वजलत्व-उभयनिष्ठप्रतियोगिताका- भावमादायाऽतिव्याप्तिः। तथाहि धूमाभावनिष्ठावच्छेदकताभिन्नाधिकरणत्व-निष्ठावच्छेदकताभिन्ना याऽवच्छेदकता, तदनिरूपिका, एतादृशावच्छेदकता- द्वयनिरूपिका याऽधिकरणनिष्ठा अवच्छेदकता धूमाभाववदयोगोलकात्मका- धिकरणनिष्ठा अवच्छेदकता, तन्निरूपिका या वृत्तित्वनिष्ठा प्रतियोगिता धूमाभाववद्वृत्तित्वनिष्ठा प्रतियोगिता, तादृश प्रतियोगिताकाभावः धूमाभाव- वद्वृत्तित्वजलत्व-उभयाभावः, वह्नौ धूमाभाववद्वृत्तित्वस्य सत्त्वेऽपि, जलत्व -स्याभावात् उभयाभावो वर्तते इत्यतिव्याप्तिः । अतः वृत्तित्वसामान्या- भावपर्यन्तं वक्तव्यमेव । तथाहि-उभयाभावीयप्रतियोगितायाः तादृशाधिकरण- निष्ठा-अवच्छेदकताभिन्ना वृत्तितात्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता जलत्वत्वोभयत्वनिष्ठा अवच्छेदकता, तन्निरूपकत्वेन, तदनिरूपकत्वस्य तादृशप्रतियोगितायामभावेन तादृशोभयाभावमादाय नातिव्याप्तिः ।

नन्वेवं कथने अर्थात् साध्याभावाधिकरणनिरूपितवृत्तितात्वेतरधर्मावच्छिन्नवृत्तितात्वावच्छिन्न-प्रतियोगिताकाभावः इति कथने, वह्निमान् धूमात् इत्यत्राव्याप्तिः। तथाहि, वह्न्यभावाधिकरणनिरूपित-वृत्तित्वाभावीयप्रतियोगितायाः वृत्तितात्वेतरेण निरूपितत्वसम्बन्धेन वह्नयभावाधिकरणेनावच्छिन्नतया वह्न्य-भावाधिकरणनिरूपितवृत्तित्वाभावः तादृशवृत्तितात्वेतरनिरूपितत्वसम्बन्धावच्छिन्नवह्नयभावाधिकरणरूपधर्मा-वच्छिन्नप्रतियोगिताकाभाव एव, न तादृश वृत्तितात्वेतरधर्मानवच्छिन्नवृत्तितात्वावच्छिन्न-प्रतियोगिताकः इति तादृशाभावः लक्षणघटको न भवतीत्यव्याप्तिः । तद्वारणार्थं वृत्तितानिष्ठप्रतियोगितायां वृत्तितात्वनिष्ठा-वच्छेदकताभिन्नत्वे सती साध्याभावाधिकरणनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपकत्वं निवेश्यते । तथाच धूमवान् वह्नेः इत्यत्र नातिव्याप्तिः। तथाहि, वृत्तित्वजलत्वोभयाभावीयप्रतियोगिता धूमाभावा-धिकरणनिष्ठावच्छेदकता भिन्नावच्छेदकतानिरूपिका एव भवति, धूमाभावाधिकरणनिष्ठावच्छेदकताभिन्नोभयत्व-निष्ठावच्छेदकता निरूपकत्वात्। एवं च वृत्तित्वजलत्व-उभयाभवीयप्रतियोगिता वृत्तितात्वनिष्ठावच्छेदकताभिन्ना साध्या-भावाधिकरणनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका न भवतीति तादृशाभावमादाय नातिव्याप्तिः ।

एवं वह्निमान् धूमात् इत्यत्र नाव्याप्तिः। तथा हि, वह्न्य- भावाधिकरणवृत्त्यभावीयप्रतियोगिता, वृत्तितात्वनिष्ठावच्छेदकताभिन्ना वह्न-यभावाधिकरणनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता घटत्वादिनिष्ठा अवच्छे- दकता, तदनिरूपिका भवतीति नाव्याप्तिः।

एवं सति धूमवान् वह्नेः इत्यत्रातिव्याप्तिः धूमाभावाधिकरणत्वेन ह्रदं गृहीत्वा धूमाभावाधिकरणह्रद-निरूपितवृत्तित्वाभावः वह्नौ वर्तते इत्यतिव्याप्तिः। तथा हि, ह्रदनिष्ठावच्छेदकता धूमाभावाधिकरण-निष्ठावच्छेदकताभिन्ना न भवति, एवं च धूमाभावाधिकरणह्रदनिरूपितवृत्त्यभावीयप्रतियोगिता वृत्तितात्व-निष्ठावच्छेदकताभिन्ना ह्रदात्मकसाध्याभावाधिकरणनिष्ठावच्छेदकता भिन्ना याऽवच्छेदकता तदनिरूपिका भवतीति अतिव्याप्तिः, अत्रातिव्याप्तिवारणाय साध्याभावाधिकरणनिष्ठावच्छेदकतायां साध्याभावाधिकरणत्वनिष्ठा-वच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपकत्वं निवेशनीयम्। तथा च धूमवान् वह्नेः इत्यत्र नातिव्याप्तिः। तथा हि, साध्याभावाधिकरणत्वनिष्ठावच्छे- दकताभिन्ना याऽवच्छेदकता ह्रदत्वनिष्ठावच्छेदकता, तन्निरूपिका एव भवति ह्रदात्मक- धूमाभावाधिकरणनिष्ठावच्छेदकता, तदनिरूपिका न भवतीति तादृशाभावमादाय अतिव्याप्तिः न भवति ।

इत्थञ्च साध्याभावाधिकरणत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका साध्याभावाधिकरण-

त्वनिष्ठस्वरूपसम्बन्धावच्छिन्नावच्छेदकतानिरू- पिका, याऽधिकरणनिष्ठावच्छेदकता, तादृशावच्छेदकताभिन्ना वृत्तितात्वनिष्ठा- वच्छेदकताभित्रा याऽवच्छेदकता तदनिरूपिका, वृत्तितात्वनिष्ठावच्छेदकतानिरूपिका, निरूपितत्वसम्बन्धावच्छिन्नाधिकरणनिष्ठावच्छेदकता निरूपिका या वृत्तित्वनिष्ठप्रतियोगिता, तादृशप्रतियोगिताका -भावः व्याप्तिः इति फलति ।

नन्वेवं लक्षणकथनेऽपि धूमवान् वह्नेः इत्यत्रातिव्याप्तिः। तथा हि, साध्याभावाधिकरणत्व-निष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका या साध्याभावाधिकरणनिष्ठनिरूपितत्वसम्बन्धावच्छिन्ना याऽवच्छेदकता तन्निरूपिका वृत्तिता इत्युक्तौ जलवद्ह्रदनिरूपितत्वसम्बन्धेन धूमाभावाधिकरण- विशिष्टवृत्तिता तच्च मीनशैवालादौ, तदभाव: वह्नौ वर्तते इत्यतिव्याप्तिरिरिति चेत्, न। निरूपितत्व(सम्बन्ध) निष्ठप्रतियोगितावच्छेदकतायां निरूपितत्वत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता, तदनिरूपकत्वस्य विवक्षितत्वात् । तेन न पूर्वोक्तातिव्याप्तिः । तथा हि, साध्याभावाधि करणत्वनिष्ठावच्छेदकता-भिन्नावच्छेदकत्वानिरूपिका याऽधिकरणनिष्ठावच्छेदकता, तन्निरूपिका निरूपितत्वत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता ह्रदनिरूपितत्ववैशिष्ट्यनिष्ठा- वच्छेदकता, तन्निरूपिका एव भवति जलवद्ह्रद-निरूपितत्वावच्छिन्नधूमाभावा- धिकरणनिरूपितत्वनिष्ठावच्छेदकता, तदनिरूपिका न भवतीति तादृशवृत्तित्वा-भावमादाय अतिव्याप्तिः न सम्भवति ।

इत्थञ्च साध्याभावाधिकरणत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका याऽधिकरणनिष्ठा-वच्छेदकता, तन्निरूपिका निरूपितत्वत्वनिष्ठा- वच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका निरूपितत्व-निष्ठावच्छेदकता- निरूपिका वृत्तित्वनिष्ठप्रतियोगिताकाभावः व्याप्तिः इति फलति ।

**उपुयक्तग्रन्थसूची-**

१. मनुस्मृतिः (म.स्मृ)- मनुः बालसरस्वती डिपो, मद्रास् ।
२. न्यायभाष्यम् (न्या.भा.)-महर्षि गौतम कृत न्यायसूत्राणां श्रीवात्स्यायनमुनि प्रणीतं, सुधीप्रकाशनम्, वारणासी।
३. न्यायसूत्रम् (न्या.सू.) - महर्षिः गौतमः, भाष्यखद्योतभाष्यचन्द्रयुक्तम्, संस्कृत सीरिइस आफिस, विद्याविलास प्रेस्, वारणासी ।
४. व्याप्तिपञ्चकरहस्यम् (व्या.प.र.)- मथुरानाथतर्कवागीशः गङ्गानिर्झरणी व्याख्यया संकलितम्, चौखम्पा संस्कृत सीरिइस आफिस, विद्याविलास प्रेस्, वारणासी ।

**सङ्केताक्षरसूची-**

१. मनुस्मृतिः (म.स्मृ) - मनुः बालसरस्वती डिपो, मद्रास् ।
२. न्यायभाष्यम् (न्या.भा.)- महर्षि गौतम कृत न्यायसूत्राणां श्रीवात्स्यायनमुनि प्रणीतं, सुधीप्रकाशनम्, वारणासी ।
३. न्यायसूत्रम् (न्या.सू.) – महर्षिः गौतमः, भाष्यखद्योतभाष्यचन्द्रयुक्तम्, संस्कृत सीरिइस आफिस, विद्याविलास प्रेस्, वारणासी ।
४. व्याप्तिपञ्चकरहस्यम् (व्या.प.र.)- मथुरानाथतर्कवागीशः गङ्गानिर्झरणीव्याख्यया संकलितम्, चौखम्पा संस्कृत सीरिइस आफिस, विद्याविलास प्रेस्, वारणासी ।

**Dr. V. V. S. R Lakshmi**
Assistant Professor, Dept. of Nyaya-Vaisheshika
Karnataka Sanskrit University
Chamaraja Pete-560018, Bengaluru, Karnataka
Mobile No. : 9398712450
E-mail : sri.nikhilesh@gmail.com

*******

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# द्वितीयहेत्वाभाससामान्यलक्षणानुगमपरिष्कारः

**डा. का. ई. श्रीवेङ्कटनाथन्**
सहायकप्राध्यापकः
कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु

शोधपत्रेस्मिन् हेत्वाभासद्वितीयलक्षणान्तर्गत विशिष्टान्तराघटितत्व परिष्कारः प्रस्तुतः। अत्र गङ्गाव्याख्याने प्रदर्शितानुगमोऽपि उपपादितः।

**उपोद्घातः -**

तत्र महामहोपाध्यायाः नव्यन्यायप्रवर्तकाः गङ्गेशोपाध्यायवर्याः स्वीय- तत्त्वचिन्तामणिनामकग्रन्थे हेत्वाभासस्य त्रीणि लक्षणानि प्रादर्शी। तद्यथा -

* **अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम् ।**[1]
* **यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वम् तत्त्वम् ।** [2]
* **ज्ञायमानं सत् अनुमितिप्रतिबन्धकं यत् तत्त्वम् । इति** [3]

तत्र द्वितीयलक्षणे "**विशेषणीयञ्चतादृशविशिष्टान्तराघटितत्वेन**" इति दीधितिग्रन्थेन विशिष्टान्तराघटितत्वपरिष्कारः आरब्धः।

**यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वम् तत्त्वम्** इति द्वितीयहेत्वाभासलक्षणम्। ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभाववद्ह्रदरूपबाधे लक्षणसमन्वयः प्रदर्श्यते। तथा हि वह्न्यभाववद्ह्रदविषयकत्वेन ह्रदो वह्न्यभाव- वान् इत्याकारकज्ञानस्य ह्रदो वह्निमानित्याकारकानुमितिप्रतिबन्धकत्वात् तत्त्वं वह्न्यभाववद्ह्रदे अस्तीति लक्षणसमन्वयः।

इतः पूर्वं ग्रन्थे अवच्छेदकत्वस्वरूपं निरूपितं वर्तते। तस्मिन् ग्रन्थे अवच्छेदकत्वं अनतिरिक्त-वृत्तित्वरूपमेवेति समर्थितम्। किन्तु एवम् अनतिरिक्त- वृत्तित्वरूपावच्छेदकत्वनिवेशेपि व्यभिचारादि-घटितपदार्थान्तरे अतिव्याप्तिः। अयमाशयः ह्रदो धूमवान् वह्नेः इत्यत्र धूमाभाववद्वृत्तिर्वह्निः इति व्यभिचार-निश्चयस्य यथा व्याप्तिज्ञानप्रतिबन्धकत्वं तथैव धूमाभाववद् वृत्तिर्वह्निः प्रमेय इति निश्चयस्यापि तत्प्रतिबन्धकत्वमस्ति। तथा सति तत्ज्ञानविषये प्रमेयत्वविशिष्टव्यभिचारे निरुक्तलक्षणस्य समन्वयादतिव्याप्तिः। तद्वारणाय लक्षणे विशिष्टान्तराघटितत्वं निवेशनीयम्। तदुक्तं दीधितिकृता **"विशेषणीयञ्च तादृशविशिष्टान्तराघटितत्वेन"**[4] इति।

अत्र तादृशविशिष्टपदस्य अनुमितिप्रतिबन्धकतायां यद्रूपावच्छिन्नविषयकत्वमवच्छेदकं तद्रूपावच्छिन्नेत्यर्थः। अन्तरपदस्य च स्वावच्छिन्नाविषयकप्रतीति- विषयतावच्छेदकावच्छिन्नम् अर्थः। तथा च निष्कृष्टं लक्षणमेवं पर्यवस्यति- **स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकंयत् प्रकृतानुमितित्वव्यापकप्रतिबध्यता-निरूपित-प्रतिबन्धकतानतिरिक्तवृत्तिविषयतानिरूपकतावच्छेदकं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत् स्वं तदवच्छिन्नविषयताशाल्यनाहार्याप्रामाण्य- ज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्ननिरूपकताक-विषयिताव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपावच्छिन्नत्वम् इति।**

**समन्वयप्रकारः -**

यद्रूपावच्छिन्ने लक्षणं सङ्गमनीयं स्वपदेन तद्रूपं स्वीकरणीयम्। तथा च ह्रदो वह्निमान् धूमादित्यत्र स्वपदेन वह्न्यभाववद्ह्रदत्वस्य स्वीकारे वह्न्यभाववद्ह्रदत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत् ह्रदवृत्तिवह्न्यभावत्वं, तत् प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरू-पकतावच्छेदकं भवति। तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद्रूपं वह्न्यभाववद्ह्रदत्वम्। तदवच्छिन्न-निरूपकताकविषयिताव्यापिका भवति प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता।

तथाहि-प्रकृतानुमितित्वव्यापिका प्रतिबध्यता इत्युक्ते ह्रदो वह्निमान् इति ज्ञाननिष्ठा संयोग-सम्बन्धावच्छिन्नवह्नित्वावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यताशालिबुद्धित्वावच्छिन्ना प्रतिबध्यता, तन्निरूपिता या प्रतिबन्धकता ह्रदः वह्न्यभाववान् इति बाधनिश्चयनिष्ठा संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्न-प्रतियोगिताकाभावत्वावच्छिन्नस्वरूपसम्बन्धावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यता-शालि निश्चयत्वावच्छिन्ना प्रतिबन्धकता। अतः वह्न्यभाववद्ह्रदत्वा- वच्छिन्ननिरूपकताकविषयिताव्यापिका भवति प्रतिबन्धकता। तद्रूपावच्छिन्नत्वं वह्न्यभाववद्ह्रदत्वावच्छिन्नत्वं वह्न्यभाववद्ह्रदे अस्तीति लक्षणसमन्वयः।

एवं मेयत्वविशिष्टव्यभिचारे नातिव्याप्तिः। तथा हि तत्र स्वपदेन मेयत्व- विशिष्टव्यभिचारत्वस्य स्वीकारमेयत्वविशिष्टव्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत् शुद्धव्यभिचारत्वं तत् प्रकृता-नुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकं भवति तादृशव्यभि-चारत्वावच्छिन्नाविषयकप्रतीतिःमेयत्वविशिष्टव्यभिचारविषयकप्रतीतिर्न भवतीति विशेष्यदलघटकयद्रूपपदेन मेयत्व-विशिष्टव्यभिचारत्वस्य स्वीकर्तुमशक्यत्वात् नाति- व्याप्तिः।

**यथाश्रुतविशिष्टान्तराघटितत्वस्यप्रकारविधयानुगमः -**

गङ्गायां यथाश्रुतविशिष्टान्तराघटितत्वपरिष्कारस्य एवं अनुगमः दृश्यते - प्रकृतानुमितित्वव्यापक प्रतिबध्यतानिरूपितप्रतिबन्धकताविशिष्टरूपविशिष्टरूपवत्वम् इति । रूपे प्रतिबन्धकतावैशिष्ट्यं चस्ववृत्तिर्यः किञ्चिद्रूपावच्छिन्नविषयत्वाव्यापकविषयता शून्यकिञ्चद्रूपावच्छिन्नविषयताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेद -कत्वं नास्तीतिप्रतीतिसिद्धोऽभावःतदीयावच्छेदकत्वनिष्ठप्रतियोगितानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपित भेदनिष्ठावच्छेदकतानिरूपितवृत्तित्वनिष्ठाच्छे- दकतानिरूपितनिश्चयनिष्ठावच्छेदकताविशिष्टत्वसम्बन्धेन । रूपे अवच्छेदकतावैशिष्ट्यं च स्वनिरूपित विषयत्वनिष्ठावच्छेदकतानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्ना वच्छेदकतावत्व, स्वनिरूपितशून्यत्वनिष्ठावच्छेदकतानिरूपितविषयत्वनिष्ठावच्छेदकता निरूपतावच्छेदकत्व निष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठाव-च्छेदकतानिरूपितभेदनिष्ठावच्छेदकता निरूपितवृत्तित्वनिष्ठावच्छेद-कता निरूपिताधिकरणनिष्ठावच्छेदकतानिरूपितविषयित्वनिष्ठावच्छेदकतानिरूपतावच्छिन्नत्वसम्ब-न्धावच्छिन्ना-वच्छेदकतावत्वोभयसम्बन्धेन।

रूपे रूपवैशिष्ट्यं च स्वतादात्म्य-स्वकालीनप्रकृतानुमितित्वव्यापक- प्रतिबध्यतानिरूपितप्रतिबन्धकता-वृत्तिर्योऽभावः किञ्चिद्रूपावच्छिन्नविषयताशालि- निश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीतिप्रतीति-सिद्धोऽभावः तदीयावच्छेदकत्वनिष्ठप्रतियोगितानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपितभेदनिष्ठावच्छेदक-तानिरूपितवृत्तित्वनिष्ठावच्छेदकतानिरूपितनिश्चयनिष्ठा वच्छेदकतानिरूपितविषयित्वनिष्ठावच्छेदकता निरूपिता-वच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकताविशिष्टस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्व वद्धर्मावच्छिन्ना-विषयकप्रतीतिविषय-तावच्छेदकत्वोभय सम्बन्धेन' 5।

ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभाववद्ह्रदे एवं लक्षणसमन्वयः। तत्र प्रकृतानुमितिः ह्रदो वह्निमानित्यनुमितिः। तादृशानुमितित्वव्यापिका प्रतिबध्यता इत्युक्ते संयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नप्रकारतानिरूपित-ह्रदत्वावच्छिन्नविशेष्यता-शालिबुद्धित्वावच्छिन्ना प्रतिबध्यता। तन्निरूपिता या प्रतिबन्धकता ह्रदो वह्न्यभाववान् इति निश्चयनिष्ठासंयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नस्वरूपसम्बन्धावच्छिन्न-प्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यता-शालिनिश्चयत्वावच्छिन्नाप्रतिबन्धकता। तादृशप्रतिबन्धकताविशिष्टं रूपं वक्ष्यमाण -सम्बन्धेन वह्न्यभाववद्ह्रदत्वं, तद्विशिष्टं रूपं वक्ष्यमाणसम्बन्धेन वह्न्य- भाववद्ह्रदत्वं, तद्वत्वं वह्न्यभाववद्ह्रदे अस्तीति समन्वयः।

इदानीं ह्रदो वह्न्यभाववानितिनिश्चयनिष्ठप्रतिबन्धकतावैशिष्ट्यं वह्न्यभाववह्रदत्वे स्ववृत्तिर्यः किञ्चिद्रूपावच्छिन्नविषयित्वाव्यापकविषयिताशून्यकिञ्चिद्रूपावच्छिन्नविषयता-शालिनिश्चयवृत्तिभेदप्रतियोगितावच्छे -दकत्वं नास्तीति प्रतीतिसिद्धोऽभावः तदीयावच्छेदकत्वनिष्ठप्रतियोगितानिरूपितप्रतियोगित्वनिष्ठावच्छेदकता-

निरूपितभेदनिष्ठावच्छेदतानिरूपितवृत्तित्वनिष्ठावच्छेदकतानिरूपित-निश्चयनिष्ठावच्छेदकताविशिष्टत्वसम्बन्धेन। तथा हि - स्वपदेन तादृशप्रति-बन्धकतायाः स्वीकारे तस्यां प्रतिबन्धकतायांवह्न्यभाववह्रदत्वावच्छिन्नविषयित्वा-व्यापकविषयिताशून्यवह्न्यभाववद्ह्रदत्वावच्छिन्नविषयताशालिनिश्चयत्वव्यापकत्व-मस्ति ।

निश्चयत्वव्यापकत्वं च तादृशनिश्चयत्वाधिकरणवृत्तिभेदप्रतियोगिताव- च्छेदकत्वाभावः । अयमभावः प्रतिबन्धकतावृत्तिः । तथा च प्रतिबन्धकतावृत्तिर्यः वह्न्यभाववद्ह्रदत्वावच्छिन्नविषयित्वाव्यापकविषयिता-शून्यवह्न्यभाववध्रदत्वावच्छि-न्नविषयताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वाभावः तन्निरूपितावच्छेदकत्व-निष्ठप्रतियोगितानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपितभेदनिष्ठावच्छेद-कतानिरूपितवृत्तित्वनिष्ठावच्छेदकता -निरूपितनिश्चयनिष्ठावच्छेदकताविशिष्टत्वं वह्न्यभाववध्रदत्वे अस्ति।

अवच्छेदकतावैशिष्ट्यं च वह्न्यभाववद्ह्रदत्वे स्वनिरूपितविषयित्वनिष्ठावच्छेदकतानिरूपितावच्छिन्नत्व-सम्बन्धावच्छिन्नावच्छेदकतावत्व,स्वनिरूपितशून्यत्वनिष्ठावच्छेदकता-निरूपितविषयत्वनिष्ठावच्छेदकतानिरूपिता-वच्छेदकत्वनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपितभेदनिष्ठावच्छेदकता-निरूपितवृत्तित्व-निष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपितविषयित्वनिष्ठावच्छेदकतानिरूपितावच्छिन्नत्वसम्बन्धा-वच्छिन्नावच्छेदकतावत्वोभयसम्बन्धेन ।

ह्रदः वह्न्यभाववानिति निश्चये वह्न्यभाववद्ह्रदत्वावच्छिन्नविषयता अस्ति। अतः तादृश-निश्चयनिष्ठावच्छेदकतानिरूपितावच्छेदकतावह्न्यभाववद्ह्रदत्वावच्छिन्नविषयतायां वह्न्यभाववद्ह्रदत्वनिष्ठा-वच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतायां च अस्ति। अतः प्रथमसम्बन्धे स्वपदेन निश्चयनिष्ठावच्छेदकतायाः स्वीकारे तादृशावच्छेदकतानिरूपितविषयित्वनिष्ठावच्छेदकतानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदक-तावत्वम् वहनयभाववध्रदत्वे अस्ति।

एवमेव ह्रदः वह्न्यभाववानिति निश्चये वह्न्यभाववद्ह्रदत्वावच्छिन्नविषयित्वाव्यापक-विषयिताशून्यत्वमस्ति। तादृशविषयित्वाव्यापकविषयिताशून्यत्वं नाम तादृशविषयित्वाधिकरणवृत्तिभेदप्रतियोगिता-वच्छेदकविषयताशून्यत्वम् । इदं च ह्रदः वह्न्यभाववान् इति निश्चये अस्ति। अतः तादृशनिश्चयनिष्ठावच्छेदकता-निरूपितावच्छेदकता परम्परया शून्यत्वविषयित्व-अवच्छेदकत्वादौ भवति । तथा च द्वितीयसम्बन्धे स्वपदेन निश्चयनिष्ठावच्छेदकतायाः स्वीकारे तादृशावच्छेदकतानिरूपितशून्यत्वनिष्ठावच्छेदकतानिरूपितविषयित्व निष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपितभेदनिष्ठावच्छेद-कतानिरूपितवृत्तित्वनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपितविषयित्वनिष्ठावच्छेदकतानिरूपिता-वच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावत्वं वह्न्यभाववद्ह्रदत्वे अस्ति । अतः उक्तोभयसम्बन्धेन अवच्छेदकता वैशिष्ट्यं वह्न्यभाववद्ह्रदत्वे अस्ति।

इदानीं वह्न्यभाववद्ह्रदत्ववैशिष्ट्यं वह्न्यभाववध्रदत्वे-स्वतादात्म्यस्वकालीनप्रकृतानुमितित्वव्यापक प्रतिबध्यतानिरूपितप्रतिबन्धकतावृत्तिर्योऽभावः किञ्चिद्रूपावच्छिन्नविषयताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छे-दकत्वं नास्तीति प्रतीतिसिद्धोऽभावः तदीयावच्छेदकत्वनिष्ठप्रतियोगितानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपित -भेदनिष्ठावच्छेदकतानिरूपितवृत्तित्वनिष्ठावच्छेदकतानिरूपितनिश्चयनिष्ठाच्छेदकतानिरूपितविषयित्वनिष्ठावच्छेद-कता निरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकताविशिष्टस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्व-वद्धर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वोभय-सम्बन्धेन ।

तत्र स्वपदेन वह्न्यभाववद्ह्रद्त्वस्य स्वीकारे वह्न्यभाववद्ह्रदत्वतादात्म्यं वह्न्यभाववद्ह्रदत्वे अस्ति । एवमेव द्वितीयसम्बन्धे स्वपदेनवह्न्यभाववद्ह्रदत्वस्य स्वीकारे वह्न्यभाववद् ह्रदत्वकालीनप्रकृतानुमितित्व-व्यापकप्रतिबध्यता निरूपितप्रतिबन्धकतावृत्तिर्योऽभावः इत्युक्ते धूमाभाववद्ह्रदत्वावच्छिन्नाविषयकप्रतीतिविषयता-वच्छेदकत्वाभावः ।

अयमर्थः- धूमाभाववद्वृत्तिवह्नित्वावच्छिन्नविषयताशालिनिश्चयत्वव्यापकत्वं प्रकृतानुमितिप्रतिबन्धक-तायामस्ति । तादृशनिश्चयत्वव्यापकत्वं च निश्चयत्वाधिकरणवृत्तिभेदप्रतियोगितावच्छेदकत्वाभावः ।

अतः तादृशनिश्चयत्वा- धिकरणवृत्ति-भेदप्रतियोगितावच्छेदकत्वाभावः प्रकृतानुमितिप्रतिबन्धकतावृत्ति-र्भवति। तथा च वह्न्यभाववद्ह्रदत्वकालीनप्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावृत्तिः यः धूमाभाववद्ह्रदत्वावच्छिन्नविषयताशालिनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वाभावः तन्निरूपितावच्छेदकत्वनिष्ठ-प्रतियोगितानिरूपितप्रतियोगित्व निष्ठावच्छेदकतानिरूपितभेदनिष्ठावच्छेदकतानिरूपितवृत्तित्वनिष्ठावच्छेदकता निरूपितनिश्चयनिष्ठावच्छेदकतानिरूपितविषयत्वनिष्ठावच्छेदकतानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकता -विशिष्टस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्ववद्धर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वं वह्न्यभाववध्रदत्वे अस्ति । अतः उक्तोभयसम्बन्धेन वह्न्यभाववद्ह्रदत्वविशिष्टं भवति वह्न्यभाववद्ह्रदत्वं । तद्वत्वं च वह्न्यभाववध्रदत्वे अस्तीति लक्षण- समन्वयः।

**।।इति शम् ।।**

## सङ्केताक्षरसूची

1 सा. नि. त. पृ. सं. 11
2 सा. नि. त. पृ. सं. 87
3 सा. नि. त. पृ. सं. 245
4 सा. नि. दी. पृ .सं.133
5 सा, नि, गं 195

## परिशीलितग्रन्थसूची


- **सामान्यनिरुक्तिप्रकरणम् -** श्रीवामाचरणभट्टाचार्याः - काशीप्रकाशनम्, हरिनामग्रन्थमाला।
- **सामान्यनिरुक्तिगङ्गाव्याख्या** -MITHILA INSTITUTE SERIES. TEXT 21. Published byDr. S. Bagchi, Director Mithila Institute of Post Graduate Studies & Research in Sanskrit learning, Darbanga.



**Dr. K. E. Srivenkatanathan**
Assistant professor
Dept. Of Nyaya and vaisheshika
Karnataka Samskrit University
Chamaraja Pete-560018
Bengaluru , Karnataka
Ph : 9676973444
Email - srinathank.e@gmail.com


********

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# अवधानकलाङ्गभूतायाः निषिद्धाक्षर्याः समग्रं समीक्षणम्

**Dr. Ramakrishna Pejathaya**
Director, Centre for Avadhanam
Associate Professor, School of Linguistics and Literary Studies
Chinmaya Vishwavidyapeeth, Veliyanad, Ernakulam

**Abstract**
अस्त्यवधाननामा आशुकाव्यप्रधानः चेतश्चमत्कारकारी कलाविशेषः कर्णाटान्ध्रयोः चिराल्लब्धप्रतिष्ठः । एतन्निर्वाहे परम्पराप्राप्ता नियमाः अवधानप्रसङ्गेषु तदभिज्ञैः परिचाय्यन्ते अवधानिभिश्च परिपाल्यन्ते । किञ्च तत्सिद्धान्तानां विवरणपरं शास्त्रमेतावता संस्कृते नाविरभूदिति कृत्वा तदावश्यकतां पश्यता प्रकृतलेखकेन अवधानाङ्गेषु प्रधानभूताया निषेधाक्षर्या विधिनिषेधाः तत्सम्बद्धैरावश्यकैर्विवरणैः साकमिह विवृता विद्यन्ते । तदेतद्विधौ परुत्प्राप्तप्रकाशं *फ्ज अय्ळ गफ्छ दच्त्ज्फ्च्ज ब्ङ अश्गछ्णaफ्ग त्फ दग्फ्ल्ध्य्त्ळ*इत्येतमुद्ग्रन्थम् उपजीवता अनेन लेखकेन स्वीया अपि सन्ततावलोकननिष्पन्नाः काश्चिदुपलब्धयो यथास्थानं निहिता विद्यन्ते ।

**Keywords:** Avadhana, Ashtavadhana, Shatavadhana, Nishedhakshari, Nishiddhakshari, Sanskrit

**प्रस्तावना**

अवधानमिति१प्रसिद्धः आशुकाव्यप्रधानः चेतश्चमत्कारकारी कलाविशेषः कर्णाटान्ध्रयोः चिरात्प्रतिष्ठितो विराजते । इयं च कला संख्याभेदेन अष्टावधानं शतावधानं सहस्रावधानं चेत्यादीनि नानानामानि भजते । यत्र केनचिदेककाले अष्टौ विषया अङ्गानि वा निरुह्यन्ते तदष्टावधानम्, यत्र शतं तच्छतावधानम्, यत्र सहस्रं तत्सहस्रावधानं चेति भावः । अत्रत्यान्यङ्गानि निषिद्धाक्षरी समस्या दत्तपदी न्यस्ताक्षरी उद्दिष्टाक्षरी चेत्यादीनि नानाविधानि । एष्वङ्गेषु एकैकस्मिन्नपि किञ्चिन्नियमनिबद्धं पद्यं प्रणेयंभवत्यवधानिना । अवधानसम्बद्धानामंशानांसिद्धान्तरूपेण विवरणपरं शास्त्रमेतावता आङ्ग्ल-कन्नड-तेलुगु- भाषास्वेव लब्धजन्मकमिति कृत्वा तदनभिज्ञानां तद्विषयकं ज्ञानं दुरापमेव । अतस्तादृशीं काञ्चिदावश्यकताम् अवगम्य प्रागभिहितेषु अवधानाङ्गेष्वन्यतमं निषिद्धाक्षरीनामकं परिचाययितुं लेखोऽयं प्रवृत्तो वर्तते । विशिष्य सद्यःप्राप्तप्रकाशः फ्ज अय्ळ गफ्छ दच्त्ज्फ्च्ज ब्ङ अश्गछ्णaफ्ग त्फ दग्फ्ल्ध्य्त्ळ इत्याख्यउद्ग्रन्थःसंस्कृतावधानं सामग्र्येण परिचाययति तत्सम्बद्धानंशान् सोपपत्तिकं सिद्धान्तयति चेति हेतोः तं प्राधान्येनोपजीवति प्रकृतलेखः ।

प्रकृतलेखकस्य चिरादवधानकलायाम् अनुसन्धानरतत्वात् तदीयानि कानिचन अवलोकनान्यपि इह यथास्थानं सन्निवेशितानि ।

अवधानाङ्गेषु प्रधानमल्लतां२ भजति निषिद्धाक्षरी । निषिद्धान्यक्षराण्यस्यामिति व्युत्पत्त्या यत्र कस्यचन वर्णस्य तत्समुदायस्य वा निषेधो भवति तथाभूतं पद्यम् इत्यर्थः अस्य शब्दस्य । अयमत्र भावः – कविस्तादृक् किञ्चन पद्यं प्रबध्नाति यत्र तेन यत्नेन कानिचिदक्षराण्यप्रयुक्तानि भवन्ति । तान्येतानि पद्यानि स्वस्वस्वभावानुसारेण निरोष्ठ्यं निर्दन्त्यं चेत्यादिभिर्नामभिरपि प्रसिद्ध्यन्ति । यदि कस्मिंश्चन पद्ये ओष्ठ्यवर्णाः (उपूपध्मानीयाः) अप्रयुक्ताः स्युः तर्हि तस्य निरोष्ठ्यमिति नाम । यत्र दन्त्यवर्णाः (लृतुलसाः) यत्नान्निवारिताः स्युः तद् भवति निर्दन्त्यनामकम् । एवमन्येऽपि वर्णोत्पत्तिस्थानभेदजन्याः निष्कण्ठ्य-निस्तालव्य-निर्मूर्धन्यरूपाः प्रकारा इह यथायथमूह्याः ।

वस्तुतस्तु चिरान्महाकाव्यादिषु प्रयुज्यमाना एकाक्षरी-द्व्यक्षरी-त्र्यक्षरी-प्रभृतयोऽपि प्रकाराः वर्णनिषेधप्रभवा एव । तत्रापि व्यञ्जनान्तराणां निषेधात् । अनया दृष्ट्या ह्रस्वैकस्वरं३ दीर्घैकस्वरम्४ अवर्गीयम्५ अनवर्गीयम्६ अचलजिह्वं७ चेत्येतेऽपि प्रकाराः अस्मिन्नेव वर्गेऽन्तर्भवन्ति ।

**प्रत्यक्षरनिषेधः**

एवंप्रागभिहिताः सर्वे प्रकारा निषिद्धाक्षरीकुक्षौ साधु निविशन्ते । उक्तेषु कञ्चन प्रकारं समादाय (अभिनवं वा प्रकारं प्रकल्प्य) कविः स्वयमेव पद्यं प्रबन्धुमर्हति । तथाप्यवधानविधौ सेयं केनचिद् विलक्षणेन वर्त्मना प्रवर्तते, यस्य प्रत्यक्षरनिषेध इति प्रसिद्धो व्यवहारः । तद्यथा – कश्चन प्रष्टा किञ्चिद् वस्तु वृत्तं च निर्दिश्य प्रत्यक्षरन्यासम् एकं व्यञ्जनं निषेधति । एवं प्रष्ट्रा यत्प्रसङ्गे यद्व्यञ्जनं निषिद्धं तत्र तद्भिन्नव्यञ्जनं विन्यस्यन्नवधानी पद्यं प्रबध्नीयात् । चतुर्थे पादे निषेधो न क्रियते प्रायेण । तदेतत्स्फुटतरंक्रियतेकेनचिदुदाहरणेन –

विषयः – ग्रीष्मः । वृत्तम् – अनुष्टुप् । अवधानी – श्री. एच्आर्वासुकिः ।

(ग) ता (प) र (ण) का (ल) रू (ण) क्ष (त) वे (ल) षो (य) सौ
(ग) स (र) त्त्व (न) श (र) क्ति (ह) प (र) वि (र) स्स (अ) ताम् ।
(घ) क (र) च्छ (प) क (र) ल्प (न) व (न) श (र) स्वा (अ) र्था
नद्योमन्दंस्रवन्त्यहो ॥८

तथा च सम्पन्नं पद्यम् -
तारकारूक्षवेषोऽसौसत्त्वशक्तिपविस्सताम् । कच्छकल्पवशस्वार्थानद्योमन्दंस्रवन्त्यहो ॥

(The Art and Science of Avadhānam in Sanskrit, 115)

*भावार्थः - असौग्रीष्मःनेत्रयोरहितंवेषंधरति । अयंहिसतांसत्त्वशक्तेःवज्रायुधम् ।*
*याश्च नद्यः पूर्वं कूलङ्कषाः स्रवन्ति स्म ता अधुना मन्दतां गताः ।*

अथेह प्रत्यक्षरनिषेधः कथङ्कारं प्रवृत्त इति परिशीलयेम । अत्र हि ग्रीष्मो विषयः । तस्मात्तं ग्रीष्मशब्दं वारयितुं गकारो निषिद्धः प्रष्ट्रा । अवधानी ताकारं न्यास्थत् । तापः किल ग्रीष्मस्य किञ्चिदसाधारणं लक्षणम् । अतस्तं शब्दं वारयितुकामेन प्रष्ट्रा पकारो न्यषेधि । मार्गान्तरमन्विष्यताऽवधानिना रेफो न्यवेशि । तदनु तारणमिति शब्दम् ऊहमानेन प्रष्ट्रा णकारे निषिद्धे 'का' इत्यब्रवीदवधानी । अत्र तारकेति पदं पूर्णं किम् उताहो तारकाल इत्यादिना केनचिदध्वना तदनुवर्तते? इति सम्भ्रान्तः स्यात् प्रष्टा । तथापि पूर्वोक्तयोर्द्वितीयस्य विकल्पस्य प्रासङ्गिकताम् अधिकां पश्यता तेन लकारो न्यषेधि । तावतैव 'रू' इत्याह वधानी । अधुना प्रष्ट्रा णकारे निषिद्धे अवधानी क्षकारं न्यधित । प्रायः प्रष्ट्रा पूर्वो वर्णो 'रु' इति ह्रस्वान्तः श्रुतः, येन कारुण्यमिति शब्दं तर्कयता तेन स्यान्निषिद्धो णकारः । तदेवं मिथो घर्षतोरेव तयोः समाप्तास्त्रयः पादाः । पद्यमपि सुभगं सुबोधं च सम्पन्नम् ऋते तृतीयपादात् । यतस्तृतीये पादे विवक्षितोऽर्थः यत्नाद् व्याख्येयः । तुरीयः पादो निर्निषेधं कृत इत्यपि सुवेद्यं स्याद् विदाम् ।

अत्र पूर्वार्धे कविना कृतश्चमत्कारो नितरां स्तुत्यः । विशिष्य "सत्त्वशक्तिपविः" इति रूपकेण पद्यं चारुतरम् अलङ्कृतं सुवेद्यं स्यात् सचेतसाम् । तृतीये पादे असमर्थसमासत्वाद् अर्थः स्तोकं दुरुपपादश्चेदपि कल्पना हृद्या विराजते । वस्तुतस्त्वस्मिन् विभागे निरलङ्कारमपि पद्यंदुष्करं भवति प्रत्यक्षरनिषेधात् । अतो यथाशक्ति समुचितैर्विशेषणैः पद्यमिह प्रबध्यं भवत्यवधानिना । व्याकरणदृष्ट्या निर्दुष्टत्वमेव निषिद्धाक्षरीपद्यस्य ग्राह्यतां सम्पादयति । तथाप्यत्र सालङ्कारं पद्यं रिरचयिषुर्विशिष्यते प्रकृतावधानी । तदेतदमुष्य इदम्प्रथममवधानम् इत्यंशमपि मनसि कुर्महे चेद् द्विगुणः स्यादानन्दः ।

## प्रत्यक्षरनिषेधे प्रष्ट्रा अवधानिना सहृदयैश्च अवधेयाः केचनांशाः

चिरादवधानकलाबद्धश्रद्धैर्विद्वत्सहृदयैः सन्ततावलोकनेन मिथश्चर्चाभिश्च अभ्युपेताः केचिदंशाः साम्प्रतमिह नियमरूपेण सिद्धान्तिताः सन्ति । तेषु एतद्विभागसम्बद्धा मुख्या नियमाः क्रमेण परिचाय्यन्ते -

प्रष्ट्रा आदौ वस्तु वृत्तं चैतन्मात्रं निर्देष्टव्यम् । न तत्र अलङ्कारविशेषो बन्धविशेषो वा नियमनीयः ।

अवधानाङ्गेषु कठिना मन्दगतिका च भवति निषिद्धाक्षरी । द्राघीयांसि वृत्तानीह महते कालव्ययाय कल्पन्ते । येषु च क्वचिल्लघुनैरन्तर्यं गुरुनैरन्तर्यं वा अपेक्षितं तेषु शिखरिणीस्रग्धरादिषु वृत्तेषु प्रसन्नं निषिद्धाक्षरीपद्यं न केवलं दुःशकम्, किञ्च असम्भवमेवेति वक्तव्यम् । अतो वसन्ततिलकान्तान्येव वृत्तान्यत्र निर्देश्यानि ।

विशिष्य अनुष्टुप्, आर्या, शालिनी, इन्द्रवज्रा, उपेन्द्रवज्रा, रथोद्धता वंशस्थं द्रुतविलम्बितञ्चैतानि वृत्तान्यत्र सुष्ठु युज्यन्ते ।

- प्रष्टा प्रत्यक्षरन्यासम् एकमेव वर्णं निषिध्येत्, तच्च व्यञ्जनमेव । क्वचिदेव अवधानिविस्मयाय सभारञ्जनाय वा स्वराक्षरं निषेद्धुमर्हति सः । परमिदम् असकृन्न कर्तव्यम् । न च तेन अक्षरनिषेधार्थम् अधिकः कालो ग्राह्यः ।
- क्वचित् समग्रे पादे वर्गमेकं निषेद्धुमप्युचितम् । तदाऽवधानिना तद्वर्गीयान् वर्णान् अपहाय तत्पद्यपादः प्रणेयो भवति ।
- तुरीये पादे किमप्यक्षरं न निषिध्यते । तत्र स्वाभिप्रेतेनार्थेन पद्यं सम्पन्नतां नेतुं समर्हत्यवधानी ।
- अवधानिना विरचितं पद्यं व्याकृतिदोषविनिर्मुक्तं चेदलम्। दूरान्वयः क्लिष्टता अप्रतीतार्थकत्वं चेत्यादयो दोषा नात्र प्रसजन्ति, चित्रकाव्यत्वात् ।

### निषिद्धाक्षरीनिर्वाहे अपेक्षितं ज्ञानं कौशलं च

एतावतैतद् व्यक्तमेव यत् सुदुष्करोऽयं निषिद्धाक्षरीनिर्वाहः । व्युत्पत्तिरेव क्षमेह विपत्तेरव- धानिनं तारयितुम् । कीदृशी व्युत्पत्तिरिहावश्यकीति किञ्चिद्विशदीक्रियते –

१. **कोशः–** अपारशब्दसागरः स्यादवधानी । शब्दसम्पत्तिश्चेयंबहुप्रकारा । प्रत्येकमपि समुचि-
तैरुदाहरणैः उत्तरत्र परिचाय्यते ।

- **अभिप्रेतार्थे भूयांसः शब्दाः ।** यथा –हृदयार्थे चित्त-चेतः-स्वान्तादयः, मयूरार्थे बर्हि-बर्हिण-शिखण्डिप्रभृतयश्च शब्दाः । तदेतदवधानिनं विवक्षितार्थव्यक्तौ भृशमु- पकरोति । यथा वा - अस्ति जीर्णार्थको जीनशब्दोऽपि । अनेन रेफे निषिद्धे नकारेण, नकारे निषिद्धे र्णकारेण च अभिलषितार्थकः शब्दः शक्यनिवेशो भवति ।
- **नानार्थकाः शब्दाः ।** यथा –तारकाशब्दः । अस्य नक्षत्रार्थकत्वमेव प्रथमम् उपस्थितं भवति नः । किञ्चास्य कनीनिकेत्यपि वर्तते अर्थान्तरम्, यद्बलेनावधानी प्रष्टारं शक्नोति प्रतारयितुम् । तदेतत् प्राग्दर्शित उदाहरणे सुबोधम् ।
- **अप्रसिद्धाः शब्दाः ।** यथा - बह्वर्थकः अदभ्रशब्दः, निःसारार्थकः वार्तशब्दोवा । एतादृशाः शब्दाः पादादौ प्रयुक्ताश्चेत् तदर्थमनवगच्छतः प्रष्टुर्दुरूह एव भवेद् वधान्यध्वा । इदमपि तन्त्रं किञ्चिद्दूरं त्रायते तम् । **समानाक्षरादिकाः नैके शब्दाः ।** यथा – जकारेप्रयुक्तेसतिजन-जय-जगत्-जप-जल-जड-जन्तु-जरा-जव-जल्प-जनि-जनुष्-जगती प्रभृतयोनैकेशब्दा झटितिवधानिधिष- णायाम् उपस्थिताभवेयुः ।

तदेतदपिनिर्बाधंकरोत्यवधानिनम् ।

**२. व्याकरणम् –** सन्धिसमासनियमानां साधु परिज्ञानं कृत्तद्धितान्तानां निर्मितौ नैपुण्यं च वधानिमार्गम् ऊहातीतं विदधाति । इहापि प्रत्येकम् अंशः उदाहरणैः स्फुटीक्रियते ।

**सन्धिसमासनियमानां सुपरिज्ञानम्।** प्रागुक्ते उदाहरणपद्ये वधानिना तारका इति यदा वर्णत्रयं निवेशितं तदा द्विविधो मार्गस्तन्मतौ कृतपदः स्यादेव । तारकाशब्दमादाय पुरोगमनं तयोराद्यः । अपरस्तु तारं पूर्वपदं विधाय काकारादिकं पदं संयोज्य च तारकाल-तारकाम-तारकान्त-प्रभृतीनां शब्दानामाश्रयणम् । तदेतत् समासविषये । तथैव 'लतानता' इत्यक्षरचतुष्टयं चेदवधानिना निबद्धं तर्हि 'लताः नता..','लता नता', 'लता आनता', 'लता न ताङ्ग..' चैवं विविधान् कल्पान् विमृश्य यस्तावत् प्रष्टुरनूह्य इति भाति तेन पुरो यातव्यम् । एवं सन्धिकार्यज्ञानमवधानिनः साधु साहाय्यमाचरतीति प्रस्फुटम् ।

**कृत्तद्धितान्तानां निर्मितिः ।** अवधानकाले प्रयुक्तस्य कस्यचन शब्दस्य कृदन्तात्मना तद्धितान्तात्मना वा परिणामनम् अपीह बहुधा उपकरोति । यथा भूमिशब्दः भूमिपः, भूमिदः, भूमिकृत्, भूमिराट्, भूमिभृत् चैवं कृत्प्रत्ययसाहाय्येन बहुभिरध्वभिरग्रे शक्यो नेतुम् । तथैव सौहित्यम् आञ्जस्यं वैरल्यं चेत्यादयः असहजास्तद्धितान्ता अपि क्वचिदवधानिनं पारीणं कर्तुं क्षमन्ते ।

**३. लोक-शास्त्र-इतिहासादि-ज्ञानंवक्रोक्तिमार्गश्च ।** पद्यरचनार्थं वस्तु कीदृग्लभ्यत इत्येतत् पारेगिरं किल! तस्मादवधानी सर्वविधेष्वपि विषयेषु कृतावगाहः कृतप्रवेशो वा भवेत् । यथा –

क्वचित् प्रष्टा पौराणिकम् ऐतिहासिकं वा वस्तु निर्दिशेद् यथा कृष्णस्य बाल्यलीलाः । क्वचिल्लौलिकं यथा आशुखाद्यम् (झ्गल्ळ-झ्ब्ब्छ) । क्वचित्तु वर्णनाविशेषं यथा सूर्योदयः । अतोऽवधानिना सन्ततमात्मा शास्त्रीयेषु लौकिकेषु पौराणिकेषु चैवं सर्वविधेष्वपि विषयेषु यथाशक्ति विनीयेत । तदा किल तस्य पद्यपूरणार्थमपेक्षितेषु अर्थेषु न मनागपि सम्भवति आकिञ्चन्यम् । अनेन स पटीयसोऽपि प्रष्टुरप्रकम्प्यो भवति, कमपि मार्गं समास्थाय स्वं कर्म निरवष्टम्भं निर्वोढुं पारयति च ।

**वक्रोक्तिमार्गः ।** यावदवधानी वक्रोक्तिमार्गमनुसरति तावत् स प्रष्टुरनूह्यो भवति । तस्माद् वक्रं पन्थानं सर्वदा मार्गयेदवधानी निष्प्रत्यूहसञ्चाराय । वक्रोक्तिः किल जीवातुः काव्यस्य । अतोऽयं मार्गः स्वकाव्यस्य काव्यत्वेऽपि निभृतं सहकरोति ।

वस्तुतस्त्विहोक्ता अंशाः आशुकवेरवधानिनश्च सर्वत्रापि काव्यरचनायाम् आवश्यका एव ।९ तथापि अस्मिन् विभागे विशेषेणोक्तं साभिप्रायकम् । यतो हि कोशो व्याकरणं च

अवधानिनम् अस्मिन्नङ्गे यावदुपकरोति न तावदन्यत्र । तृतीयोऽप्यंशः अत्र प्रामुख्यं भजते यतो हि, कस्यचन वर्णस्य निषेधेन कदाचित् कश्चन वर्णनमार्ग एव पिहितो भवेत् । अतोऽवधानी शतपथः सहस्रपथो वा भवति चेदेव तेन मार्गान्तरं शक्यमासादयितुम् । तस्माल्लोकशास्त्राद्यवेक्षणान्न जातु तेन प्रमदितव्यम् । तदेवं प्रायेण समग्राहि प्रत्यक्षर-निषेधसम्बद्धं विषयजातम् ।

## विवर्गाक्षरी

विगतानि वर्गाक्षराणि यस्यामिति व्युत्पत्त्या यस्यां कवितायां कस्यचन वर्गविशेषस्य अक्षराणि यत्नेन वारितानि भवन्ति सा विवर्गाक्षरीति गीतमविगीतैर्विचक्षणैः । अनेनापि प्रकारेण निषिद्धाक्षरीविभागः शक्यो वर्तयितुम् । अत्र वर्गनिषेधो द्वेधा भवितुमर्हति यथा –

१. कृत्स्ने पद्ये कस्यचन वर्गस्य निषेधः
२. एकैकस्मिन् पादे एकैकस्य वर्गस्य निषेधः

तदेतदुभयमपि एकैकेनोदाहरणेन स्फुटीक्रियते –

१. विषयः – शिवः । निषिद्धवर्गः – पवर्गः । अवधानी – शतावधानी डा. आर्. गणेशः ।

तुहिनशिखरवासो दिव्यरौद्राट्टहासो ललितसितशरीरः कालकालावतारः ।
नतजननयनार्को नानुनीताढ्यतर्कोऽवतु कवनवितीर्णः शङ्करः शान्तिकीर्णः ॥

(शतावधानिरचनासञ्चयनम्, ३५२)

अपवर्गमिदं पद्यमिति पठनेनैव वेत्तुमलम् । यतिस्थानेषु कृतपदा 'वासो–हासो', 'शरीरः–वतारः' चेत्यादिका पदमैत्री पद्येऽस्मिन् चारुतानिदानम् । नतजननयनार्क इति रूपकमपीह रस्यतां तनोति ।

२. विषयः – गजेन्द्रमोक्षः । अवधानी – श्री. पिसुपाटि चिदम्बरशास्त्री ।

निषिद्धः – प्रथमे पादे तवर्गः, द्वितीये पवर्गः, तृतीये चवर्गः, चतुर्थे तवर्गश्च ।

ग्राहावकृष्टचरणस्य गजेश्वरस्य त्राणाय सत्वरगतिः सकलान् विसृज्य ।
सम्प्राप्तवानयमहो हरिरादिदेवः शीघ्रक्रमश्च बहुभिर्मुहुरीक्षणीयः ॥
(फ्ञ अय्ळ ग्फ्छ दच्त्ज्फ्च्ज ब्ङ्ग अ२ग्छ्णaफ्ग्ए त्प दग्फ्ल्ध्य्त्ळ, १२३)

मकरग्रस्तस्य करिणः परित्राणे हरेः संरम्भं रमणीयम् अभिव्यनक्ति पद्यमिदम् । कविनोपात्तं वसन्ततिलकावृत्तमपि निर्यतिकत्वादिह महदौचित्यमञ्चति ।

सैषा विवर्गाक्षरी प्रत्यक्षरनिषेधवदवधानिनं न त्रासयति । अस्याः प्रत्यक्षरनिषेधापेक्षया अल्पसमयसाध्यत्वमपि निश्चप्रचम् । अतोऽस्मिन् प्रकारे क्वचिन्मालिनी मन्दाक्रान्ता शिखरिणी चेत्यादीनां वृत्तानामपेक्षा न दुष्यति । वर्गनिषेधश्चासौ चतुर्ष्वपि चरणेषु कर्तव्यः ।१०

तदेवम् अवधानेषु प्रसिद्धौ निषिद्धाक्षर्या उभावपि प्रकारौ विवृतौ । अनयोः प्रकारयोः प्रत्यक्षरनिषेधो रस्यतरो यदसौ प्रतिपदं प्रष्ट्रवधानिनौ विचारपरौ कुरुते, सहृदयान् सविस्मयकौतूहलस्य परां काष्ठां नयते च । अतोऽवधानेषु निषिद्धाक्षर्याम् अमुमेव प्रकारं स्पृहयन्ति सचेतसः ।

**उदाहरणान्तराणि**

तदेवं न्यरूपि निखिलमपि निषिद्धाक्षरीसम्बद्धं विषयजातम् । अथात्र अन्यान्यपि कानिचन पद्यान्युदाह्रियन्ते, येषां पर्यालोचनया प्रागुक्ता अंशाः स्फुटीभवन्ति सचेतश्चेतसि । विभागेऽस्मिन् देवतास्तुतिपर एव विषयो निर्दिश्यते प्रायेण । तथापि अवधानिभेदेन अन्येऽपि - समुद्रमथनप्रभृतयः पौराणिकाः, मार्कण्डेयकाट्जुप्रमुखाः प्रासङ्गिकाः, तालवृन्तमुख्या लौकिकाः, सूर्योदयादयो वर्णनाप्रधानाश्च विषयाः तत्र तत्र निर्दिष्टा दृश्यन्ते । तन्मुखेनैव उदाहरणान्तराणि उपस्थाप्यन्ते, यथा -

**१. देवतास्तुतिः ।** विषयः – हरिहरः । अवधानी – शतावधानी डा. आर्. गणेशः ।

वनधरतनयाधवं भजेऽहं घनतमरम्यविनीलकन्धराभम् ।
करकनदभयं कपालमाला- स्फुरदुरुवत्समथो हरिं हरं च ॥ (शतावधानिरचनासञ्चयनम्, ३२९)

पद्यमिदं नैकैर्विशेषैरस्मदीयम् अवधानं समर्हति । अत्र प्रयुक्तं वृत्तं पुष्पिताग्रा, याऽस्मिन् विभागे न इष्यते भूयोभिरवधानिभिः । पद्येऽस्मिन् प्रयुक्तानि सर्वाणि विशेषणानि श्लेषबलेन हरे हरौ चोभयत्र अनुयन्ति । यथा – वनशब्दस्य काननं सलिलं चेत्यर्थयोर्ग्रहणेन लक्ष्मीः पार्वती चोभे अपि वनधरतनये भवतः । करकनदभयं चेत्यादीनि रमणीयानि समस्तपदान्यपीह कल्पितानि । एवमिदं पद्यं तथा शिल्पितं कविना यदेतत्प्रत्यक्षरनिषेधजन्यं पद्यमिति अङ्गीकृतिः सुदुष्करा स्यादस्माकम् । काव्यधर्ममहर्निशं जुषमाणेनैवावधानिना साध्या स्यादीदृशी निर्मितिः ।

**२. पौराणिकमाख्यानम् ।** विषयः – नलः । अवधानी – श्री. पिसुपाटि चिदम्बरशास्त्री ।

अयं राजा साक्षाज्जयमसमभाग्योच्चयगुरुः
समं प्राप्य क्षोण्या सुरुचिरयशाः पुण्यविजयः ।
बभौ भैमीप्राणप्रिय इह पुरा स प्रभुमणि-
श्चिरं सेव्यं सेव्यः प्रबलकरणैर्भावुकगुणैः ॥

(The Art and Science of Avadhānam in Sanskrit, 122)

इह कृत्स्ने पद्ये तवर्गः प्रतिषिद्ध इति कृत्वा पद्यमिदं विवर्गाक्षरीप्रकारकम् । तदेतत् शिखरिण्या निबद्धमस्ति, यन्न सुकरं विवर्गाक्षर्याम् । तथापीह प्रसन्नपद्यरचना स्तुत्यर्हतां भजते । तवर्गो निषिद्ध इति कृत्वा नलशब्दमानेतुमिह नापीपरदवधानी । तथापि तेन भैष्मीप्राणप्रियप्रमुखैः शब्दैः पद्यं किंविषयकमिति स्वयंवेद्यं यच्चक्रे तदपि स्तुत्यं नः ।

**३. प्रासङ्गिकवृत्तम् ।** विषयः – मार्कण्डेयकाट्जुः । अवधानी – डा. शङ्करराजारामः ।

दुर्धीवर्धी हर्म्यभूर्धार्ष्ट्यसक्तः सम्यग्जैनत्रातृरत्नं मतान्धम् ।
मृत्योर्हर्षो निम्नताभृच्छिवघ्नो मार्कण्डेयः कण्टको नीतिमार्गे ॥
(The Art and Science of Avadhānam in Sanskrit, 121)

अस्य पद्यस्य विषयो जनः सर्वोच्चन्यायालयस्य भूतपूर्वो न्यायाधीशः । तस्मादिह वर्णनास्पदत्वं न लेशतोऽपि । अतः प्रतिभासम्पन्नेनाप्यवधानिना पद्यशिल्पत एव सौन्दर्यं पारितमानेतुं न त्वलङ्कारविशेषैः । तथा च तेन विषयभूतस्य जनस्य पौर्वापर्यं किञ्चिद्वा विदितं भवेत् पद्यप्रबन्धार्थम् । यद्यवधानी दैनिकवृत्तान्तेषु आत्मानं शिक्षितं न कुरुते तर्हि ईदृशप्रसङ्गेषु तस्य कान्दिशीकत्वं दुर्वारमेव स्यात् ।

**४. वर्णनाप्रधानम् ।** विषयः – देहली ।

देहलीदिष्टपुष्पाणि प्रेक्ष्य तोरणपल्लवाः ।
प्रहसन्ति परन्त्वेका रङ्गवल्ली वयस्यति ॥(शतावधानिरचनासञ्चयनम्,११९)

वस्तुतस्त्विह चतुर्ष्वपि पादेषु संवृत्तो वर्णनिषेधः । तथापि पद्यम् उदारार्थकम् अभिरामगात्रं च सन्दृब्दमिति विशेषो हृदयावर्जकः । यूयम् अधःस्थिताः वयं तु उपरि इति भावेन तोरणपल्लवाः देहलीगतानि पुष्पाण्युपहसन्ति । किञ्च सर्वस्यापि नश्वरत्वं विदती रङ्गवल्ली पुष्पाभ्याशे एव कृतवासा तन्मैत्रीमातिष्ठति – इत्येतद्रूपः अस्य पद्यस्य भावो नितान्तं हृद्यः । अनेनाभिव्यज्यमानः 'न कोऽपि नैच्यभावेन द्रष्टव्यः' इति सन्देशोऽपि नः सूपादेयः ।

**उपसंहारः**

तदेवं निषिद्धाक्षरीप्रपञ्चः, अवधानोपयुक्तौ तदीयौ द्वौ प्रकारौ, तत्रप्रष्ट्रा अवधानिना सहृदयैश्च अवधेयाः अंशाः, तन्निर्वाहे अपेक्षितं ज्ञानं कौशलं च – इत्येते विषयाः अवधानसमयमाश्रित्य नैकैरुदाहरणैः सहितं न्यरूपिषत । अनेनाध्ययनेन उपलब्धानंशान् कारिकाभिः पुनः प्रस्तुत्य विरिरंसामि -

यत्र प्रत्यक्षरन्यासमेकाक्षरनिषेधतः । वधानी रचयेत्पद्यं सा निषिद्धाक्षरी मता ॥१॥
चतुर्थे चरणे स्वैरं पदानि निदधत् कविः । सङ्गतार्थतया वाक्यं समाप्तिं नेतुमर्हति ॥२॥
निषेधं व्यञ्जनस्यैव कुर्यात् प्रष्टाविलम्बितम् । क्वचिद् युक्त्या स्वरस्यैवमनिषेधोऽपि कुत्रचित् ॥३॥
क्वचिद् वर्गनिषेधेन पादपूरणमीप्सता । प्रष्ट्रा विस्मायनीया स्यात् समितिः सावधानिनी ॥४॥
नेयार्थकाप्रतीतार्थक्लिष्टगूढार्थतादयः । चित्रकाव्यतया न्वेतां दूषयन्ति न जातुचित् ॥५॥
यत्र यन्न निवार्यं स्यात् तत्र तन्न हि दुष्यति । नाल्पाक्षरत्वहानिः स्यात् सूत्रेष्वचतुरादिषु ॥६॥
वसन्ततिलकान्तानि वृत्तानीह मुदे सताम् । द्राघीयांसि न शस्यन्ते समयाशीनि भूरिशः ॥७॥
सुसमृद्धाङ्गतादिष्टविराजद्वर्णनास्पदः । विषयोऽत्र प्रदातव्यो न सङ्कुचितवर्त्मकः ॥ ८॥
कोशव्याकृतिशास्त्रादिज्ञानसम्पन्नचेतसा । शक्या तरीतुमेषा स्यादविपन्नतयाञ्जसा ॥९॥

## Acknowledgement:

This paper has been produced as a part of the **Centre for Avadhanam** Project jointly initiated by Chinmaya Vishwavidyapeeth, Ernakulam and Indic Academy, Hyderabad.

## सन्दर्भग्रन्थसूची

१. *Avadhāna-vidya.* Subbanna, CV. Hyderabad: Telugu University, 1987.
२. *KannaḍadalliAvadhāna-kale*. Ganesh, R. Hubli: Sahitya Prakashana, 2015.
३. *Śatāvadhāni-racanā-sañcayanam*. Ganesh, R. (Ed. Shukla, Balram). New Delhi: Sahitya Academy, 2019.
४. *The Art and Science of Avadhānam in Sanskrit.*Ganesh, R. & Shashi Kiran, BN. Bangalore: PrekshaaPratishtana, 2020.

## End Notes

१. वस्तुतोऽवधानं साहित्यावधानं वेदावधानं गणितावधानं चेति बहुप्रकारकम् । अस्मिन् पत्रे तावदवधानशब्देन साहित्यावधानं विवक्षितमस्ति ।

२. प्रसिद्ध एवायं प्रधानमल्लनिबर्हणन्यायः । कस्मिंश्चित् मल्लसमूहे प्रमुखो मल्लो यदि पराजीयते तर्हि तदनुयायिनां तेन जितपूर्वाणां वा मल्लानां पराजयः स्वत एव सिद्धो भवति । न तत् प्रतिष्ठापनार्थं नियुद्धान्तरमपेक्ष्यते ।

३. यत्र दीर्घस्वरा न प्रयोक्तव्याः ।

४. यत्र ह्रस्वस्वरा न प्रयोक्तव्याः ।

५. यत्र वर्गीयव्यञ्जनानि न प्रयोज्यानि ।

६. यत्र अवर्गीयव्यञ्जनानि न प्रयोज्यानि ।

७. येषां वर्णानाम् उच्चारणे जिह्वा स्थिरैव स्यात् ।

८. निषिद्धान्यक्षराणि आवरणस्यान्तर्निविष्टानि सन्ति । तुरीयपादे न कोऽपि वर्णो निषिद्धः ।

९. यद्यपि कविरप्यत्र अन्तर्भाव्यः, तस्याप्यमीषामंशानामावश्यकत्वात् । तथापि तेन ग्रन्थाद्यवलोकनार्थं तदभिज्ञसंवादार्थं वा शक्यं प्राप्तुं समयम् इति कृत्वा न सोऽत्र परिगणितः ।

१०. निषिद्धाक्षर्यां वसन्ततिलकान्तान्येव वृत्तानि देयानीति, तुरीये चरणे वर्णनिषेधो न कर्तव्य इति च प्रागुक्तो नियमः प्रत्यक्षरनिषेध एव, विवर्गाक्षर्यां स नान्वेतीति भावः ।

**Dr. Ramakrishna Pejathaya**

Director, Centre for Avadhanam

Associate Professor, School of Linguistics and Literary Studies

Chinmaya Vishwavidyapeeth

Veliyanad, Ernakulam-682313

Phone : 9844210845

E-mail : Ramakrishna.pejathaya@gmail.com

*******

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# योगदर्शने ईश्वरप्रणिधानोपायेषु शतरुद्रीयस्य प्राशस्त्यम्

**Venkata Subbaiah Bathula,**
PhD Scholar – Yoga & Spirituality Department,
Swami Vivekananda Yoga AnusandhanaSamsthana,
19, Eknath Bhavan, Gavipuram Circle,
K.G. Nagar, Bangalore

कृष्णयजुर्वेदस्य तैत्तिरीयसंहितायां चतुर्थकाण्डे पञ्चमप्रपाठके श्रूयमाणाः एकदशानुवाकाः रुद्रप्रश्नः इतिविख्यातम् । रुद्रप्रश्ने नमो नम इति शब्दानाम् आवृत्त्यतः नमकम् – इत्यपि अभिधीयते । शतम् = अनन्तानि रुद्रनामानि यस्मिन्तत्शतरुद्रीयम् । महाभारते अनुशासनिकपर्वणि उपमन्यूपख्याने शिवस्तव नाम चतुर्दशाध्याये शतरुद्रीयस्य प्राशस्त्यं वर्णितं यथा—

सामवेदश्च वेदानां यजुषां शतरुद्रियम् । सनत्कुमारो योगीनां साङ्ख्यानां कपिलो ह्यसि ॥

महाभारतम् 13.14.159 ॥

यजुर्वेदान्तर्गतासु शत-शाखासु पठ्यते, इत्यतः शतरुद्रीयम् अपि ख्यातम् । शतरुद्रीयस्य षड्विधः पाठभेदः षट्सुसंहितासु अधुना लभ्यते । ते –तैत्तिरीयसंहिता, काण्वसंहिता, माध्यन्दिनसंहिता, मैत्रायणीयसंहिता, काठकसंहिता, कपिष्ठल- कठसंहिताचेति । अत्र दक्षिणभारते विशेषतया तैत्तिरीय संहितायाः रुद्राध्यायः प्रसिद्धः, (गोविन्दाचार्यः 2013) । अत्र एकादशानुवाकाः सन्ति । तत्र आद्ये प्रथमानुवाके भगवतः प्रसादः । द्वितीयादिष्वष्टसु अनुवाकेषु सर्वेश्वरत्व- सर्वा त्मकत्व-सर्वान्तर्यामित्वादिरूपेण भगवन्नमस्कारः । ततो दशमे भगवतः प्रार्थना । एकादशे भगवदंशभूतरुद्रसङ्घप्रार्थना । इति एकादशात्मकश्रीरुद्राध्यायार्थः । (अभिनवशङ्करभाष्यम्) ।

## रुद्रस्य अहङ्कारतत्वाधिदैवतञ्च तथा ईश्वरतत्वनिरूपणञ्च

संस्कृतसाहित्ये रुद्रः द्विधा कीर्त्यते, यथा अहङ्कारतत्त्वस्य अधिदेवो रुद्रश्च, पुनः निराकारो निर्गुणः परब्रह्मा परमेश्वरोऽपि रुद्रः इति । जगदुत्पत्तिवर्णनम्तैत्तिरीयोपोनिषदि यथा, "सोऽकामयत । बहुस्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किञ्च ।

वातो वर्षमिषवः...इति (तैत्तिरीयसंहिता 4.5.11.11) ।

तथा एतेषु स्थानेषु स्थिताः रुद्राः एतैः शरैः जीवानां कर्मफलानुसारेण पुण्या- पुण्यफलं प्रयच्छन्ति । अतः रुद्रः शर्वः इति कीर्त्यते । स एव अस्य भवस्य कारणञ्च पतिश्च लयकारोऽपि च ।

नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च । (तैत्तिरीयसंहिता 4.5.5)

नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाऽऽतताविने क्षेत्राणां पतये नमः । (तैत्तिरीयसंहिता 4.5.2)

तथा, सर्गस्थितिलयादि कारणो भूत्वा रुद्रो ब्रह्मेति निरूपितम् ।

यथा चोक्तं तैत्तिरीयोपनिषदि—

यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्ति अभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति ॥ ३ ॥ (तैत्तिरीयोपनिषत् 3.1)

स एव प्रपञ्चोपशमः शिवेति कीर्तितः। "अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद" इति (माण्डूक्योपनिषद् 12)

रुद्रानुवाकेष्वपि तस्य मोक्षप्रदत्वञ्च परमानन्दकारणञ्च शिवतत्त्वमपि च श्लाघ्यते यथा, "नमस्ताराय नमश्शम्भवे च मयो भवे च नमश्शङ्कराय च मयस्कराय च नमश्शिवाय च शिवतराय च ।" (तैत्तिरीयसंहिता 4.5.8) इति ।

**योगदर्शने ईश्वरप्रणिधानोपायः**

योगः समाधिः इति योगसूत्रस्य व्यासभाष्यम् (युज्समाधौइतिधात्वर्थे) । समाधि- सिद्ध्यर्थं श्रद्धाद्युपायाः प्रोक्ताः महर्षिणा पतञ्जलिना यथा, "श्रद्धावीर्यस्मृति- समाधिप्रज्ञापूर्वकइतरेषाम्" इतियोगसूत्रम् 1.20 ।

अर्थात्, "श्रद्दधानस्य विवेकार्थिनो वीर्यम् उपजायते। समुपजातवीर्यस्य स्मृतिः उप- तिष्ठते । स्मृत्युपस्थाने च चित्तम् अनाकुलं समाधीयते । समाहितचित्तस्य प्रज्ञाविवेक उपावर्तते । येन यथावद्वस्तु जानन्ति । तदभ्या-सात् तद्विषयाच्च वैराग्यात् असम्प्रज्ञातः समाधिर्भवति ॥ (1.20 योगसूत्रस्य व्यासभाष्यम्)"।

एवं प्रोक्त्वा कश्चिदन्योपायमपि वर्ण्यते, "ईश्वरप्रणिधानाद्वा" इति योगसूत्रम् 1.23 ।

- प्रणिधानाद् = भक्तिविशेषाद् (मानसात् / वाचिकात् / कायिकात्वा) आवर्जितः (अभिमुखीकृतः)
- ईश्वरः तम् अनुगृह्णाति अभिध्यानमात्रेण ।
  तदभिध्यानमात्रादपि योगिन आसन्नतमः समाधिलाभः समाधिफलं च भवतीति ॥२३॥ (1.23 योगसूत्रस्यव्यासभाष्यम्)

एवं पतञ्जलिना समाधिलाभः प्रोच्यते ईश्वरप्रणिधानात् ।

"समाधिसिद्धिः ईश्वरप्रणिधानात्" इतियोगसूत्रम् 2.45 । कथम् ईश्वरप्रणिधानं करणीयम्? "तज्जपस्तदर्थभावनम्" इतियोगसूत्रम् 1.28।

- अर्थात्प्रणवस्य जपश्च, प्रणवाभिधेयस्य चेश्वरस्य भावनम् ।
- तदस्य योगिनः प्रणवं जपतः प्रणवार्थं च भावयतश्चित्तमेकाग्रं सम्पद्यते ।

(1.28 योगसूत्रस्य व्यासभाष्यम्)

यथा भगवद्गीतायामपि प्रोक्तम् ईश्वरप्रणिधानलाभः —

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः । अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ भगवद्गीता 12.6॥

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् । भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥ भगवद्गीता 12.7॥

तथा पतञ्जलिमहर्षिणा ईश्वरप्रणिधानात्फलद्वयं निरूप्यते यथा—

"ततः प्रत्यक्चेतनाधिगमोऽपि अन्तरायाऽभावश्च" इतियोगसूत्रम् 1.29 ।

प्रथमं तु – प्रत्यक्-चेतन-अधिगमः = स्वरूपदर्शनम् । यथैवेश्वरः पुरुषः शुद्धः प्रसन्नः केवलोऽनुपसर्गः तथायमपि बुद्धेः प्रतिसंवेदी पुरुष इत्येवम् अधिगच्छति ॥ (1.29 योगसूत्रस्यव्यासभाष्यम्)।

द्वितीयं तु – अन्तराय-अभावः = व्याधिप्रभृतयः न भवन्ति । "व्याधि-स्त्यान-संशय-प्रमाद-आलस्य-अविरति-भ्रान्तिदर्शन-अलब्धभूमिकत्व-अनवस्थितत्वानि चित्तविक्षेपाः ते अन्तरायाः" इतियोगसूत्रम् 1.30 ।

**ईश्वरप्रणिधानेशतरुद्रीयस्यविनियोगः**

तैत्तिरीयसंहितायां रुद्राध्याये, भिषक्रूपेण च अघोररूपेण च श्लाघ्यते रुद्रः । भिषग्रूपेण व्याध्यादीन्दूरीकर्तुं च, अघोररूपेण स्वरूप-प्रकाशनार्थं चेति । अत्र भिषगिति शब्दस्य उपलक्षणनेन व्याध्यादि सर्वविक्षेपहरणं ग्रहीतव्यम् ।

अत्र प्रथमानुवाके,

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् । अहीँश्च सर्वाञ्जम्भयन्सर्वाश्च यातुधान्यः ॥ तैत्तिरीयसंहिता 4.5.1.6॥

अत्र, "प्रथमो दैव्यो" इत्यादि शब्दैः, तस्य ईश्वरतत्वम्निरूप्यते, यथोक्तं पतञ्जलिना "पूर्वेषामपि गुरुः कालेन-अनवच्छेदात्" इतियोगसूत्रम् 1.26 । पुनस्तस्य कालेनानवच्छेद्यं निरूप्यते च षष्ठानुवाके, "नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च" (तैत्तिरीयसंहिता 4.5.6) इति ।

रुद्रस्य भैषजलक्षणम् ऋग्वेदसूक्तेष्वपि बह्वत्र श्रूयते । द्वितीयमण्डले त्रयस्त्रिंशतितमे रुद्रसूक्ते रुद्रोभिषक्तम इतिविशेषतः श्लाघ्यते । यथा,

- गाथपतिं मेधपतिं रुद्रं जलाष भेषजम् । तच्छंयोः सुम्नमीमहे ॥ ऋग्वेदसंहिता 1.43.4॥
- दिवोवराहमरुषं कपर्दिनं त्वेषं रूपं नमसानिह्वयामहे । हस्ते बिभ्रद्भेषजावार्याणि शर्मवर्मच्छर्दिरस्मभ्यं-यंसत् ॥ ऋग्वेदसंहिता 1.114.5॥
- मात्वारुद्रचुक्रुधामानमोभिर्मादुष्टुतीवृषभमासहूती । उन्नोवीराँअर्पयभेषजेभिर्भिषक्तमंत्वाभिषजांशृणोमि ॥ ऋग्वेदसंहिता 2.33.4॥

## शतरुद्रीयं परमं मन्त्रौषधम्

व्याधीनां हेतुत्रयं चरकसंहितायाम् एवं प्रोच्यते, "असात्म्ये न्द्रियार्थ- संयोगः, प्रज्ञापराधः, परिणामश्चेति त्रयः त्रिविधविकल्पाहेतवो विकाराणां; समयोगयुक्तास्तु प्रकृतिहेतवो भवन्ति" इति (चरकसंहिता 1.11.53) तन्निवारणार्थं औषधत्रयमपि व्याख्यातम् "त्रिविधमौषधमिति- दैवव्यपाश्रयं, युक्तिव्यपाश्रयं, सत्त्वावजयश्च । तत्र दैवव्यपाश्रयं- मन्त्र-औषधि-मणि-मङ्गल-बलि-उपहार-होम-नियम-प्रायश्चित्त-उपवास-स्वस्त्ययन-प्रणिपात-गमनादि । युक्तिव्यपाश्रयं- पुनराहारौषधद्रव्याणां योजना । सत्त्वावजयः- पुनरहितेभ्योऽ- र्थेभ्यो मनोनिग्रहः ।" इति (चरकसंहिता 1.11.54) ।

तथा व्याधिनां चिकित्सायां दैवव्यपाश्रयेषु मन्त्रस्य प्रथमस्थानं कल्प्यते । तत्र बहवः धर्मशास्त्राश्च पुराणाश्च विविधव्याधीनां हरणे बहूनि दैवव्यपा- श्रयोपान्सूचयन्ति । अत्र शतरुद्रीयस्य च ऋग्वेदान्तर्गतरुद्रसूक्तानां च विनियोगः बहुना दृश्यते ।

विश्वेश्वरभट्टविरचितमदनमहार्णवे अष्टमतरङ्गे यथोक्तम्-

"प्रकारान्तरेण साध्यसर्वरोगहरं विरुग्विधाने,

असाध्यव्याधिना ग्रस्त उग्रेण प्राणहारिणा । आ ते रौद्रेण सूक्तेन प्रत्यृचं वाग्यतः शुचिः ॥"

इति । अत्र, "आ ते" इतिरुद्र-सूक्तम् (ऋग्वेदे २.३३)

साध्यासाध्यसर्वव्याधिहरमिति सूचितम् । तत्रैव दशमतरङ्गे यथा-

"अथशातातपोक्तं विविधज्वरहरम्–

देवस्वहरणाच्चैव जायते विविधज्वरः । ज्वरो महाज्वरश्चैव रौद्रो वैष्णव एव तु ॥

ज्वरे रुद्रजपं कुर्यान्महारुद्रं महाज्वरे । महारुद्रं जपेद्रौद्रे वैष्णवे तद्द्वयं जपेत् ॥"

अत्र विविधज्वराश्च वर्णिताः । पुनस्तेषां निवारणे रुद्रं, महारुद्रम् इत्यादि विशेषाः सूचिताः । अस्मिन्नेवमदनमहार्णवे, शतरुद्रीयस्य विनियोगः अनेका- नेकव्याधीनां निवारणे बहुधा व्याख्यातः । अत्र केचित्विनियोगाः उदाहृताः—

- सहस्रकलशस्नानं रुद्रेणेशस्य कारयेत् । इति (दशमतरङ्गे) उष्णज्वरहरं कर्मविपाकसङ्ग्रहे।
- जपित्वा च महारुद्रं दशांशं जुहुयात्तिलान् । इति (एकविंशस्तरङ्गे) श्यावदन्तहरं शातातपोक्ते ।
- सहस्रकलशस्नानं शम्भोः पूजा यथाविधि । इति (षड्विंशस्तरङ्गे) भुजस्तम्भशमनं शातातपोक्ते ।
- सहस्र-कलश-स्नानम् ईश्वरस्य तु कारयेत् । इति (सप्तविंशस्तरङ्गे) उदरव्याधिहरं कर्मविपाकसमुच्चये ।
- अथ सहस्र-कलश-स्नानं महादेवस्य चैव हि । इति (सप्तविंशस्तरङ्गे) जलोदरहरं कर्मविपाकसङ्ग्रहे ।
- मासं रुद्रजपः कार्योदद्यात्भक्त्या च काञ्चनम्। इति (एकत्रिंशस्तरङ्गे) प्रकारान्तरेण प्रमेहहरम्।

किं बहुना? एतद्विख्यातमेव, शिवपुराणे शतरुद्रसंहितायां चन्द्रस्य क्षयरोग-नाशकः शिवः इति श्लाघ्यते ।

- चन्द्रेण च तपस्तप्तं षण्मासं च निरन्तरम् ।
  मृत्युञ्जयेन मन्त्रेण पूजितो वृषभध्वजः ॥ 4.14.39॥
- दशकोटिमितं मन्त्रं समावृत्य शशी च तम् ।
  ध्यात्वा मृत्युञ्जयं मन्त्रं तस्थौ निश्चलमानसः ॥ 4.14.40॥
- सोमेश्वरश्च नामासीद्विख्यातो भुवनत्रये ।
  क्षयकुष्ठादिरोगाणां नाशकः पूजना द्द्विजाः ॥ 4.14.41॥

तथा बहुप्रकारेनोक्तं यत्, रुद्राध्यायीमुच्यते सर्वपापैः।

## शतरुद्रीयं कैवल्योपायम्

रुद्रः शिवः शिवतरः शिवतमः इतिबहुना श्लघ्यते रुद्रानुवाकेषु। यथा,

यातइषुः शिवतमा शिवं बभूव ते धनुः। शिवा शरव्या या तवतया नो रुद्र मृडय॥ तैत्तिरीयसंहिता 4.5.1.2॥

यथा कैवल्योपनिषदि (2.24) शतरुद्रीयस्य अध्ययनफलम्कैवल्यपदप्राप्ति- रिति प्रोक्तम्—

> यः शतरुद्रियमधीते सोऽग्निपूतो भवति सुरापानात्पूतो भवति स ब्रह्महत्यायाः पूतो भवति स सुवर्णस्तेयात्पूतो भवति स
> कृत्याकृत्यात्पूतो भवति तस्मादविमुक्तमाश्रितो भवत्यत्याश्रमी सर्वदा सकृद्वा जपेत् ॥ अनेन ज्ञानमाप्नोति संसारार्णवनाशनम्। तस्मादेवं विदित्वैनं कैवल्यं पदमश्नुते कैवल्यं पदमश्नुत इति॥

अथ जाबाल्युपनिषदि (चतुर्थे मन्त्रे) अमृतत्त्वसिद्धिरिति याज्ञवल्क्येनोक्तम्—

> अथ हैनं ब्रह्मचारिण ऊचुः किं जप्येनामृतत्वं ब्रूहीति॥ स होवाच याज्ञवल्क्यः। शतरुद्रियेणेत्येतान्येव ह वा अमृतस्य नामानि॥ एतैर्हवा अमृतो भवतीति एवमेवैतद्याज्ञवल्क्यः॥

महाभारतेऽपि द्रोणपर्वणि प्रतिज्ञापर्वणि पाशुपतास्त्रसिद्ध्यर्थं कृष्णार्जुनाभ्यां शतरुद्रियस्य विनियोगः—

> ततः कृष्णश्च पार्थश्च संस्पृश्यापः कृताञ्जली। तौ नागावुपतस्थाते नमस्यन्तौ वृषध्वजम् ॥7.57.70॥
>
> गृणन्तौवेदविदुषौतद्ब्रह्मशतरुद्रियम्। अप्रमेयं प्रणमन्तौगत्वासर्वात्मना भवम् ॥7.57.71॥

आपस्तम्बीयश्रौतसूत्रेष्वपि स्वरूपावबोधने शतरुद्रियस्य विनियोगः यथा-

> यो रुद्रो अग्नाविति रौद्रं गावीधुकं चरुम्। 17.12.1 ॥
>
> एतेन यजुषा यस्यामिष्टकायां शतरुद्रीयं जुहोति तस्यां प्रतिष्ठापयति 17.12.2 ॥

तथा, कैवल्यसिद्ध्यर्थं वा स्वरूपदर्शनार्थं वा प्रत्यक्चेतनाधिगमे शतरुद्रियस्य वैशिष्ट्यं दृश्यते।

## शतरुद्रीयस्यईश्वरप्रणिधानोपायषुप्राशस्त्यम्

एवं प्रकारेण, ततः प्रत्यक्चेतनाधिगमोऽपि अन्तरायाभावश्च (योगसुत्रम् 1.29), इति फलद्वयं शतरुद्रीयविनियोगेन दर्शितम्। लिङ्गपुराणे उत्तरभागे द्वादशाध्याये रुद्रस्य ध्यानविधिः प्रोच्यते यथा-

> नारुद्रस्तु स्पृसेद्रुद्रं नारुद्रो रुद्रमर्चयेत्।
>
> नारुद्रः कीर्तयेद्रुद्रं नारुद्रो रुद्रमाप्नुयात् ॥ 12.82 ।।

यथा पतञ्जलिनोक्तम्, "क्षीणवृत्तेः, अभिजातस्येवमणेः, ग्रहीतृ-ग्रहण-ग्राह्येषु तत्स्थतदञ्जनता-समापत्तिः।" इति (योगसूत्रम् 1.41)। तथा ध्यातृ-ध्येययोः समापत्ति र्भवति सति चित्तविक्षेपादि नाशनं च योगसिद्धिश्च भवति। पुनस्तत्र, तीव्र-संवेगानाम् आसन्नः (योगसूत्रम् 1.21)। मृदु-मध्य-अधिमात्रत्वा- त्ततोऽपि विशेषः ॥ (योगसूत्रम् 1.22) इति सूत्रद्वयेन, साधकस्य चित्त-भूमिकानां भेदानुसारेण फलभेदं प्राप्यते इति ज्ञातुं शक्यते। भगवता वासुदेवेनापि चोक्तं तथा—

> चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
>
> आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ भगवद्गीता 7.16॥
>
> यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
>
> तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ भगवद्गीता 7.21॥

अत एव यजुर्वेदसंहितायां सत्यपि रुद्राध्यायः उपनिषदिति कीर्त्यते। अत्र रुद्रोपसनस्तु प्रणवोपासनमेव च। यथोच्यते, "प्रणवो धनुः शरो ह्यात्मा ब्रह्मतल्लक्ष्यमुच्यते" इति (मुण्डकोपनिषत् 2.2.4), अत्र शतरुद्रीयमेव प्रणवः। शरो हि स्वयमात्मा। रुद्र एव ब्रह्मा। त्र्यम्बकं यजामहे सुगन्धिं पुष्टि-वर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥ इतिप्रार्थना ॥

**सहायकग्रन्थाः**

1) Apastamba-Srauta-Sutra, 2 Vols. Text with English Translation and Notes by G.U. Thite, Motilal Banarsidass Publishers Private Limited, New Delhi, 2013
2) ईशादिदशोपनिषदः श्रीमच्छङ्करभाष्ययुताःश्रीगोविन्दशास्त्रिणाटिप्पणीभिःसमलङ्कृताः, मोतीलालबनारसीदास, वाराणासी, १९८७.
3) ईशाद्यष्टोत्तरशतोपनिषदः, चौखम्बाविद्याभवन, वाराणासी, २०१०.
4) ऋग्वेदसंहिता https://vedicheritage.gov.in/samhitas/rigveda/sha kala-samhita/
5) कर्मविपाकः, सुदर्शनशर्मणासम्पादितः, श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपति, २०१२.
6) चतुर्वेदसंहिता, वैदिकसाहित्यप्रचारसमितिः, हैदराबाद, २००६.
7) चरकसंहिता, चक्रपाणिदत्तआयुर्वेददीपिकाव्याख्यासहिता, चौखम्बासुरभारती प्रकाशन, वाराणासी, २०१६.
8) चतुर्वेदसंहिता, वैदिकसाहित्यप्रचारसमितिः, हैदराबाद, २००६.
9) चरकसंहिता, चक्रपाणिदत्तआयुर्वेददीपिकाव्याख्यासहिता, चौखम्बासुरभारती प्रकाशन, वाराणासी, २०१६.
10) पातञ्जलसूत्राणि, व्यासभाष्यवाचस्पत्यसहितानि, प्रथमावृत्तिः, निर्णय सागराख्यामुद्रणालयः, मुम्बै, १८९२.
11) शतरुद्रीयम्, षड्विधपाठभेदसहितम्, गोविन्दाचर्यभाष्यसहितम्, श्रीहृषीकेश तीर्थ संस्थानम्, उडुपि, २०१३.
12) शब्दकल्पद्रुमः, चौखम्बासंस्कृतसिरीजआफीस, वाराणासी, १९६७.
13) श्रिविश्वेश्वरभट्टविरचितमदनमहार्णवः, ओरिएंटल्इन्स्टिट्यूट्, बरोडा, १९५३.
14) श्रीमदीश्वरकृष्णविरचितः साङ्ख्यकारिकाः, श्रीगौडपादकृतभाष्यसहितः, चौखम्बा संस्कृत सिरीज आफीस, वाराणासी, १९६३.
15) श्रीमद्भगवद्गीता, श्रीमच्छङ्करभाष्येण–आनन्दगिरिकृतव्याख्यायुजा संवलिता–तथानीलकण्ठी–भाष्योत्कर्ष- दीपिका–श्रीधरीयसुबोधिनी– अभिनव गुप्ताचार्य व्याख्या–श्रीमधुसूदनसरस्वतीस्वामिकृतगूढार्थदीपिकाव्याख्या सहिता– श्रीधर्म दत्तशर्मविरचितगूढार्थतत्त्वालोकेन युता च; द्वितीयावृत्तिः, निर्णय सागराख्या मुद्रणालयः, मुम्बै, १९३६.
16) श्रीरुद्रभाष्यम्, स्कन्ददेवप्रोक्तं शिवरहस्येतिहासान्तर्गतम्, नारायणशास्त्रिभिः सम्पादितम्, चामाराजेन्द्रसंस्कृतकलाशाला, बेङ्गलूरु, १९९४.
17) श्रीरुद्राध्यायःअभिनवशङ्करभाष्यसहितः, श्रीवाणीविलासमुद्रालय, मुद्राणलयः, श्रीरङ्गनगरम्, १९६२.
18) श्रीरुद्राध्यायःविष्णुसूरिविरचितभाष्यसंवलितः, आनन्दाश्रममुद्राणलयः, पूणा, १९५८.
19) श्रीरुद्राध्यायःसायणाचार्यभट्टभास्करप्रणीतभाष्याभ्यांसंवलितः, आनन्दाश्रममुद्राणलयः, पूणा, १८८८.
20) श्रीवेदव्यासमहर्षिप्रणीतंमहाभारतम् (तेलुगुव्याख्यानसहितम्), गीताप्रेस, २०१८.
21) श्रीवेदव्यासमहर्षिप्रणीतंलिङ्गपुराणंद्वितीयखण्डम्, श्रीरामशर्माआचार्यस्यहिन्दीटीकासहितम्, संस्कृतिसंस्थान, बरेली, १९७१.
22) श्रीवेदव्यासमहर्षिप्रणीतम्, श्रीमद्भागवतमहापुराणम् – तृतीयःस्कन्धः, स्वामि-तत्त्वविदानन्द-सरस्वतिनाविरचितं तत्त्वप्रकाशिका-सहितम् (तेलुगुटीका), तिरुमल तिरुपति देवस्थानम्, २००३.
23)

## Author details:

**Venkata Subbaiah Bathula,**
PhD Scholar - Yoga & Spirituality Department,
Swami Vivekananda YogaAnusandhana Samsthana,
(Deemed to be University)
19, Eknath Bhavan, Gavipuram Circle,
K.G. Nagar, Bangalore, India - 560 019
Mobile: +91 9945125002,
Email: bvsubbaiah@gmail.com.

**Prof. Melukote K. Sridhar**,
Registrar, S-VYASA,
Swami Vivekananda Yoga AnusandhanaSamsthana,
(Deemed to be University)
19, Eknath Bhavan, Gavipuram Circle,
K.G. Nagar, Bangalore, India - 560 019.
Mobile: +91 9480467836,
Email: drmksridhar@gmail.com

*************

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# अद्वैताधुनिकमतानुरोधेन चैतन्यचिन्तनम्

**Dr. R. Suresha**
Faculty, Department of Studies in Sanskrit,
University of Mysore, Mysore

**सारलेखः** - 'सर्वं खल्विदं ब्रह्म' इत्यादिभिः महावाक्यैः चैतन्यं सर्वान्तर्यामीति बुद्ध्यते । तदेव मायाशबलितं सत् भिन्नं भिन्नं रूपं भजते । नित्यं परिवर्तमानस्य परिदृश्यमानस्य प्रपञ्चस्य अधिष्ठानतत्त्वस्य निर्गुणस्य ब्रह्मणः नामरूपवैविध्यं महद्रोचकम् । यद्यपि चैतन्यं समष्टि-व्यष्टिभेदेन द्विविधेति स्थूलो भेदः क्रियते अन्तर्वाणिभिः, तथापि समष्टिचैतन्यं विराट्, हिरण्यगर्भः, ईश्वर इति त्रिकोटिकम् । व्यष्टिचैतन्यं विश्वः, तैजसः, प्राज्ञ इति त्रिविधम् । एतेषां षण्णां भेदानां अद्वैतवेदान्तदर्शनोक्तदिशाजिज्ञासा आधुनिकविचारेण समं विधीयते ।

**कूटपदानि**- जीवः, ईश्वरः, सगुणब्रह्म, निर्गुणब्रह्म

**विराट्**- समष्टिमायावच्छिन्नस्य चैतन्यस्य विराडिति वैश्वानर इति वा नामधेयं जागृदवस्थायाम् । स हि विराट् विभिन्नधर्माश्रितस्य जगतः कारणी- भूतः अभिमानिदेवता । जागृदवस्थायां सर्वेषु नरेषु वर्तमानः साक्षिस्वरूपः वैश्वानरः । आद्यशङ्कराचार्याः छान्दोग्योपनिषदः भाष्ये 'वैश्वानर' इति पद- निर्वचनं द्वेधा समकुर्वन् । 'विश्वान् नरान् नयति पुण्यपापानुरूपां गतिं सर्वात्मा एष ईश्वरः वैश्वानरः' इति प्रथमं निर्वचनम् । द्वितीयं तावत् 'विश्वः नरः एव वा सर्वात्मत्वात्' । भगवद्गीतायां च अस्य गमकं वर्तते 'अहं वैश्वानरो भूत्वा' इति । वैश्वानरस्य समष्टिस्थूलदेह इति व्यवहारस्य हेतुरुच्यते स्थूलभोगायतनत्वादिति । प्रारब्धकर्मणः क्षयार्थमेव स्थूलो देहः आश्रयणीयः । अस्यैव विराटः चैतन्यस्य कोशव्यवस्थानुगुणतया अन्नमयकोश इति व्यपदेशः । अन्नस्यैव विकारत्वात् अन्नमयकोश इति कथ्यते । 'अन्नम्' इति पदस्य निर्वचनमुवाच स्वयं श्रुतिः 'अद्यते अत्ति च भूतानि', 'अन्नं वै विराट्' इत्यादिषु वाक्येषु । अमूनि वेदवाक्यानि विराजः अन्नमयकोशत्वे प्रमाणानि भवन्ति ।

**हिरण्यगर्भः**– समष्टिमायावच्छिन्नं चैतन्यं हिरण्यगर्भ 'सूत्रात्मा' इति सम्बोधयन्ति श्रुतयः सर्वेषां जीवानां सूक्ष्मशरीरं प्रविष्टत्वात् । ज्ञानेच्छाक्रियाशक्तिभिः युक्तत्वात् 'प्राणः' इति अस्य नामान्तरम् । 'हिरण्मयस्य अण्डस्य गर्भभूतः प्रजापतिः हिरण्यगर्भः' इति सायणाचार्याः ऋक्संहितायामूचुः । कोशविभागानुसारेण अयं हिरण्यगर्भः कोशत्रयं (विज्ञानमयः, मनोमयः, प्राणमयः) उपाधिरूपेण दधार । विज्ञानमयादयः त्रयः कोशाः क्रमात् ज्ञानेच्छाक्रियाशक्तीनां च अधिष्ठानानि भवन्ति । अयं हिरण्यगर्भः समष्टिशरीरस्य सूक्ष्मदेहः भवति विराजः अपेक्षया सूक्ष्मत्वात् । जागृदवस्थायाः सर्वे संस्काराः सूक्ष्मशरीरे सुस्पष्टं प्रतीयन्ते । एषावस्था जागृत्स्वप्नयोः विराडीश्वरयोः सन्धिस्थानमिति च कथ्यते । स्थूलप्रपञ्चस्य अखिलाः व्यवहाराः सुषुप्त्यवस्थायां विलीयन्ते । अत एव सूक्ष्मशरीरं स्थूलशरीरस्य लयस्थानमिति व्यवह्रियते ।

**ईश्वरः**– समष्ट्यविद्योपहितस्य आत्मवस्तुनः सुषुप्त्यवस्थायाम् 'ईश्वर' इति नामधेयम् । अखिलानां व्यवहाराणाम् अधिष्ठानस्य निदानभूतत्वात् 'कारण- शरीरम्' इति प्रोच्यते । आनन्दघनस्य आत्मनः नैकट्यवर्तित्वात् कोशविभाग- परिधौ 'आनन्दमयकोश' इति अभिधानम् । जागृदवस्थायाम् इष्टस्य प्राप्तौ अनिष्टस्य परिहारे, स्वप्नावस्थायां सुखस्वप्नद्वारा, सुषुप्त्यवस्थायां सर्वव्यव-हारोपरमद्वारा (मुक्त्यवस्थावत्) प्राप्यमाणः आनन्दः एव आनन्दमयः कोशः । उभयोः स्थूलसूक्ष्मशरीरयोः उपरमस्थानत्वात् 'सुषुप्तिः' इति व्यवहारः अस्य ईश्वरस्य । सुषुप्तिरिति पदस्य महाप्रलये अन्वयः । प्रलयस्थितौ तम आवृणोति, पञ्चमहाभूतानि विलीयन्ते । प्राणिनां वासनाम् अवलम्ब्य पुनः सृष्टिः स्यात् । पञ्चमहाभूतादीनि समुत्पद्यन्ते । एवञ्च सृष्टिलययोः बीजभूतत्वात् 'कारणशरीरम्' इति परिभाषा विचारसहा ।

**ईश्वरस्य नामान्तराणि, नामनिर्देशने कारणानि**– सर्वज्ञः–अखिलचराचरप्रपञ्चस्य साक्षीभूतत्वात् । सर्वेश्वरः– कर्मानुगुणेन फलप्रदानशक्तिमत्वम् । सर्वनियामकः– समस्तं प्राणिजातं स्वकर्मणि नियुङ्क्ते । अव्यक्तः–

जगदुत्पत्तेः प्राक् सूक्ष्माव- स्थायां विद्यमानत्वात् । अन्तर्यामी–अखिलप्राणिनां हृदये तिष्ठन् बुद्धिं चोदयति । जगत्कारणम्– प्रपञ्चोत्पत्तिं प्रति अभिन्ननिमित्तोपादानकारणत्वात् । शुद्धं चैतन्यं मूलाविद्योपहितत्वे सगुणं ब्रह्मेति व्यवह्रियते । तच्च स्थूलशरीरं सूक्ष्मशरीरं कारणशरीरमिति अभिव्यनक्ति । जागृत्-स्वप्न-सुषुप्तयः अवस्थाः, विराट्-हिरण्यगर्भ-वैश्वानराः आविर्भवन्ति । यथा समष्टिचैतन्यस्य जागत्स्वप्न- सुषुप्त्यवस्थायां भेदाः प्रदर्शिताः तथैव व्यष्टिचैतन्यस्यापि विश्व-तैजस-प्राज्ञाः इति भेदाः विद्यन्ते । अत्रेयं जिज्ञासा वितन्यते ।

**विश्वः**– व्यष्ट्यविद्योपहितं चैतन्यमेव जागृदवस्थायां 'विश्व' इत्यभिधीयते । 'विश्वः' इति पदं विश-प्रवेशने इति धातोः निष्पन्नम् । कारणशरीरं, सूक्ष्मशरीरं च उपाधित्वेन परिगणयन् स्थूलं शरीरं च प्रविशति जीवात्मा । अत एव 'विश्व' इत्यभिधानम् । शरीरस्य जागृदवस्थायां केवलं ज्ञानोत्पत्तिदर्शनात् एवं व्यवहारः ।

**तैजसः**– व्यष्ट्यविद्योपहितस्य चैतन्यस्य स्वप्नावस्थायां 'तैजस' इति परिभाषा । अस्य अन्तःकरणस्य तु सत्वगुणप्रधानत्वात् तेजोमयत्वाच्च 'तैजस' इति व्यपदेशः । स्थूलशरीरापेक्षया सूक्ष्मत्वात् 'सूक्ष्मशरीरम्' इति वासना- युक्तत्वात् 'स्वप्न'इति, 'स्थूलशरीरस्य लयस्थानम्' इति च निगद्यते । तैजसः स्वप्नावस्थायां बाह्यविषयाभावात् मनोवृत्तिभिः सूक्ष्मविषयान् उपभुङ्क्ते । 'तस्मादेष प्रविविक्ताहारतः इवैव भवति' ति बृहदारण्यकोपनिषदि लिङ्गं हि लभ्यते । 'प्रविविक्तभुक् तैजसः' इति माण्डूक्यश्रुत्या च सिद्ध्यति ।

**प्राज्ञः**– जीवात्मनः एव सुषुप्तिस्थितौ 'प्राज्ञ' इत्यभिधानम् । अत्र प्रत्यङ्ङा- त्मना सह सोपाधिकसाम्यत्वम् उपभुङ्क्ते । अल्पज्ञत्वात् अनीश्वरत्वात् च अयं जीवः 'प्राज्ञः' इति हि व्यपदिश्यते । सदानन्दविरचितस्य वेदान्तसारस्य विद्वन्मनोरञ्जनी व्याख्यायां श्रीरामतीर्थैः 'प्रायेण अज्ञः' इत्यर्थः कल्पितः प्राज्ञशब्दस्य । जीवात्मोपाधिभूतस्याः तूलाविद्यायाः त्रिषु गुणेषु रजस्तमसोः एव आधिक्यात् चैतन्यस्य आनन्दानुभूतिः अस्पष्टेति विज्ञेयम् ।' स्थूलसूक्ष्मशरीरयोः लयस्थानं' इति च कथ्यते । शुद्धचैतन्यं तूलाविद्योपहितं सत् जीवः भवति । सोयं जीवः जागृत्स्वप्नसुषुप्तिषु अवस्थासु स्थूल-सूक्ष्म- शरीरयोः लयस्थानं' इति च कथ्यते । शुद्धचैतन्यं तूलाविद्योपहितं सत् जीवः भवति । सोयं जीवः जागृत्स्वप्नसुषुप्तिषु अवस्थासु स्थूल-सूक्ष्मकारणानि त्रीणि शरीराणि धारयन् विश्व-तैजस-प्राज्ञाभिधानः स्यात् । व्यष्टिचैतन्यस्य समष्टिचैतन्यस्य च क्रमेण तूलामूलाविद्ययोः सम्बन्धे त्रिष्वपि अवस्थासु विभिन्नानि नामानि भवन्ति जीवस्य सगुणब्रह्मणः च । एकस्यैव चैतन्यस्य इमानि सर्वाण्यपि नामानि उपचारमात्रम् इति स्थितिः । अग्रे च स्थूलसूक्ष्मकारणानां शरीराणां विचारः क्रियते ।

### स्थूलशरीरम्–

इदं तु स्थूलशरीरं साप्तधातुकम् । ऋषयो हि आहुः यत् अस्य देहस्य विनाशे सत्यपि सूक्ष्मकारणशरीराभ्यां युक्तः प्रत्यगात्मा देहान्तरं प्रविशति पूर्वकर्मानुसारमिति । भगवद्गीतायां च भगवान् स्वयं प्रोवाच-

> वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोपराणि ।
>
> तथा शरीराणि विहाय जीर्णानि अन्यानि संयाति नवानि देही ।। (भगवद्गीता-2.22)

अस्य स्थूलदेहस्य लक्षणं विवेकचूडामणौ सुस्पष्टं निरुपितम् । स हि स्थूलदेहः षड्भावविकाराणाम् अधिष्ठानभूतः । 'जायते, अस्ति, वर्धते, विपरि- णमते, अपक्षीयते, म्रियते' इति षड्भावविकाराः । सञ्चितकर्मणः एकांशेन प्रारब्ध कर्मरूपेण शरीरयात्रारम्भः जीवस्य । उपभोगेन विना कर्मक्षयः न स्यात् । अतः साप्तधातुकं त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिजं देहं दधानः कर्मोपभोगं आगामिकर्मरूपेण कर्मसञ्चयम् च करोति जीवः । स्थूलदेहोयम् 'अन्नमयः' इति व्यपदिश्यते यत्र मयट् प्रत्ययः प्राचुर्यार्थे विकारार्थे च विनियुक्तः । अन्नस्य परिणामादेव शरीरस्य उत्पत्त्युपचय-विनाशदर्शनात् विकारार्थे मयटः प्रत्ययस्य विनियोगः उचितः । इदञ्च तैत्तिरीयोपनिषदि सूचितम् 'अद्यते अत्ति च भूतानि' इति । जीवाः स्वस्थितिहेतोः यददन्ति तदन्नम् । अयं विपर्यासः यत् तदेवान्नं भूतानि अश्नाति । अन्नं स्वयं विकारं प्राप्य भुज्यमानमपि विकारयति । प्रेरककर्तृत्वेन स्वकर्तृत्वेन च मयट् प्रत्ययः प्रयुक्तः विकारार्थे । अथ प्राचुर्यार्थे तु इदं कारणस्ति यत् अदनरूपस्य कर्मणः

प्रभूतभागस्य स्थूलदेहे एव सावकाशत्वं लोके प्रसिद्धम् । एवञ्च स्थूलदेहस्यैव अन्नमयकोश इति व्यपदेशान्तरं युक्तियुक्तम् ।

**सूक्ष्मशरीरम्**– सूक्ष्मदेहोयं लिङ्गशरीरमित्यपि च अभिधीयते । लिङ्ग्यते ज्ञाप्यते प्रत्यगात्मसद्भावः एभिः इति लिङ्गम् । लीनं गमयति इति वा लिङ्गम् । प्रत्यगात्मनः अस्तित्वं तु एतैः करणैः गम्यत इत्यर्थः । सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि इति वेदान्तसारेपि प्रोक्तम् । विवेकचूडामणौ सूक्ष्मशरीरस्य लक्षणं सुचारु निरूपितम् ।

वागादिपञ्च श्रवणादिपञ्च प्राणादिपञ्च अभ्रमुखानि पञ्च।
बुद्ध्याद्यविद्यापि च कामकर्णणी पुर्यष्टकं सूक्ष्मशरीरमाहुः ।। 98 ।।

अन्तःकरणं चतुर्विधम् । अन्तःकरणस्य वृत्यनुगुणतया चत्वारः भेदाः । बुद्धिः–निश्चयात्मिका अन्तःकरणवृत्तिः । मनः- सङ्कल्पविकल्पात्मिका अन्तः करणवृत्तिः । चित्तम्-अनुसन्धानात्मिका अन्तःकरणवृत्तिः । अहङ्कारः -अभिमानात्मिका अन्तःकरणवृत्तिः । किन्तु सूक्ष्मशरीरस्य अवयवत्वेन अन्तः - करणस्य बुद्धिमनसी केवलम् अन्तर्भाविते । अतः चित्ताहङ्कारयोः सावकाश- त्वसिद्धये बुद्धिमनसोः एव निवेशः । अन्तःकरणस्य चत्वारोपि भागाः पञ्च- भूतानां सात्विकांशेभ्य एव समुद्भूताः प्राकशगुणत्वात् । अत्र भगवद्गीता प्रमाणम् ।

तत्र सत्वं निर्मलत्वात् प्रकाशकम् अनामयम्। सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चाघन ।। 14. 6 ।।

कोशव्यवस्थानुगुणेन मनोमयकोशः विज्ञानमयकोशश्च सूक्ष्मशरीरे अन्तर्भवतः । मनः ज्ञानेन्द्रियैः युक्तं सत् मनोमयकोश इत्यभिधीयते । बुद्धिः ज्ञानेन्द्रियैः युक्ता सती विज्ञानमयकोशः ।

**कारणशरीरम्–**

त्रिषु देहेषु प्रत्यगात्मनः नेदिष्ठवर्तित्वम् अस्यैव सङ्गच्छते । एतर्हि विक्षेपावरणशक्ती कार्यरते । व्यष्टिचैतन्यम् आवृत्य वर्तमानम् अज्ञानं तूलाविद्येति शास्त्रनयः । तया एव तूलाविद्यया सर्वस्यापि जीविनः जीवत्वं सम्भवति । यद्यपि कारणशरीरं सामान्यदृष्ट्या नाधिगम्यते तथापि अस्य प्रभावो महान् । ज्ञानमार्गानुगामिनः यथा यथा स्वमानसम् एकस्मिन् वस्तुनि सम्यक् आस्थापयन्ति तथा तथा कारणदेहोयं क्षीणताम् उपैति । अत एव जेगीयते यत् कारणशरीरलयः आनन्दावाप्तिश्च समाधौ केवलं भवतीति । चैतन्यस्य प्रतिबिम्बः कारणशरीरे भवति अथवा कारणशरीरमेव चैतन्यमावृणोति इति सुवचम् । जीविनां जीवनं न केवलम् आस्थूलदेहपातं परन्तु आमुक्ति इति आर्षं मतम् । प्रत्येकस्यापि जीविनः स्थूलदेहघरणकाले कृतानां पुण्यापुण्यकर्मणां फलं सूक्ष्मशरीरे वर्तते । सूक्ष्मकारणाभ्यां युक्तस्य प्रत्यगात्मनः स्थूलदेहक्षयात् स्थूलदेहान्तरप्राप्तिरेव जन्मान्तम् इत्यभिधीयते । इत्थञ्च सूक्ष्मकारणदेहवान् प्रत्यगात्मा प्राक्तनानि सुकृतदुष्कृतकर्माणि देहान्तरं नयति । कारणशरीरस्य विषये विवेकचूडामणौ आद्यशङ्कराचार्यैः विलिखितम् यथा –

अव्यक्तवत् त्रिगुणैर्निरुक्तं तत्कारणं नाम शरीरमात्मनः। सुषुप्तिरेतस्य विभक्त्यवस्था प्रलीसर्वेन्द्रियबुद्धिवृत्तिः ।।

त्रिगुणात्मकत्वे सति स्थूलसूक्ष्मलयस्थानं हि कारणशरीरस्य लक्षणम्। 'सुखमहम् अस्वाप्सम् । न किञ्चिदवेदिषम् ।' इति लोकव्यवहारोपि इह प्रमाणम् ।

**आत्मनः अवस्थाः** – जागृत्-स्वप्न-सुषुप्ति-तुरीयेति चतस्रः अवस्थाः । मायया संवलितत्वे जीवात्मनः परमात्मनः आद्याः तिस्रः अवस्थाः सम्भवन्ति । शुद्धचैतन्यावस्थायां तु उभयोः जीवात्मपरमात्मयोः अभेदः । माण्डूक्योपनिषदि चतस्रः अवस्थाः स्पष्टं निरूपिताः । जागृदवस्थायाम् आत्मनः स्थूलभुक् इति संज्ञा । स्थूलान् शब्दादीन् विषयान् भुङ्क्ते इति स्थूलभुक् । स्वप्नावस्थायाम् आत्मा प्रविविक्तभुक् इति संज्ञितः । सूक्ष्मान् अणीयान् विषयान् भुङ्क्ते इति प्रविविक्तभुक् । सुषुप्त्यवस्थायाम् आनन्दभुक् इति व्यपदिष्टः । बाह्यविषयनिरपेक्षम् अज्ञानयुक्तं क्षणिकम् आनन्दमनुभवति । यद्यपि चतस्रः अवस्थाः भिन्नाः इति प्रतीयन्ते तथापि जागृत्स्वप्नयोः सुषुप्तितुरीययोः च समानता प्रतिपादिता माण्डूक्योपनिषदि । भोक्तृ-भोज्ययोः भेदः, विषयसापेक्षः आनन्दश्च जागृत्स्वप्नयोः अवस्थयोः समानाः धर्माः । भोक्तृ-भोज्ययोः अभेदः, विषयनिरपेक्षः आनन्दश्च सुषुप्तितुरीययोः अवस्थयोः समानांशाः ।

**शरीरे चातुर्विध्यम् –**

आचार्याः सदानन्दाः वेदान्तसारे इत्थमूचुः । 'जरायुजानि जराभ्यः जातानि मनुष्यपश्वादीनि । अण्डजानि अण्डेभ्यः जातानि पक्षिपन्नगादीनि । स्वेदजानि स्वेदेभ्यः जातानि यूकामशकादीनि । उद्भिज्जानि भूमिम् उद्भिज्य जातानि लतावृक्षकादीनि ।'

**शरीरोत्पत्तिः –**

कारणशरीरस्य उत्पत्यभावः अनादित्वात् । त्रिगुणात्मिकायाः मायायाः पञ्चभूतानि पृथिव्यादीनि समुत्पद्यन्ते । पञ्चीकृतैः पञ्चमहाभूतैः सहितः मायायाः सत्वगुणः ज्ञानेन्द्रियाणाम् उत्पत्तिहेतुः । पञ्चीकृतैः पञ्चमहाभूतैः सहितः मायायाः रजोगुणः कर्मेन्द्रियाणि उत्पादयति । पञ्चीकृतैः पञ्चमहाभूतैः सहितः मायायाः तमोगुणः स्थूलशरीरस्य जनिकर्ता । अपञ्चीकृतपञ्चभूतैः युक्तः सत्त्वगुणः मनोबुद्ध्यहङ्कारचित्तानि प्रजनयति । अपञ्चीकृतपञ्चभूतैः युक्तः रजोगुणः पञ्चप्राणानाम् उत्पादयिता । अपञ्चीकृतपञ्चभूतैः युक्तः तमोगुणः जगदुत्पत्तिबीजम् ।

**औपनिषद्-आधुनिकयोः विचारविमर्शः –**

ऋषिः दर्शनात् । साक्षात्कृतधर्माणो ऋषयो बभूवुः इति निरुक्ते यास्काचार्यः । कविः क्रान्तदर्शी । मननात् मुनिः । प्रत्यक्षादिभिः लौकिकैः प्रमाणैः अगोचरं सत्यं तपसा योनुपश्यति स मुनिः । अलौकिकप्रमातृभिः साक्षात्कृतं कालातीतं सत्यं वेदं मन्यन्ते । आधुनिकं विज्ञानं प्रयोगः-परिशीलनं-परिष्कारः इति त्रिभिः सूत्रैः निबद्धम् । अत एव एकस्मिन् काले प्रयोगसिद्धः सिद्धान्तः कालान्तरे निरस्तः कालकवलितः च दृश्यते । इत्थं वर्धमानं विज्ञानम् । यद्यपि ऋषयः सार्वकालिकं सत्यं विज्ञानिनः सान्दर्भिकं सापेक्षं समयसीमोपेतं सत्यंमन्यन्ते, तथापि अतीन्द्रियगोचरः पदार्थविशेषः पाञ्चभौतिके देहे वर्तत इत्यत्र मुनिविज्ञानिनोः न मतभेदः । अयं पदार्थविशेषः चैतन्यमिति मेनिरे ऋषयः । यद्यपि केचिद्विज्ञानिनः चैतन्यं मन्यन्ते, तथापि बहवः तन्निरस्यन्ति लौकिकप्रमाणैः अगोचरत्वात् । पुनर्जन्मतत्वं निरस्यन्ति क्रिश्चियन्-प्रभृतीनि प्रसिद्धानि सशक्तानि मतानि चैतन्याभ्युपगमे मानसं निबध्नन्ति । कतिभ्यश्चित् वत्सरेभ्यः प्राक् भारतीयं दर्शनं सम्प्रदायं संस्कृतिम् उपहसन्तः पाश्चात्याः अतीन्द्रियविषयकान् अनुभवानपि आप्नुवन् । अमेरिका देशे एड्गर्केसी इत्याख्यः महाभागः स्वप्नावस्थायां बहूनां जनानां जन्मान्तरसम्बद्धं दोषं परिहारञ्च असूचयत् । तस्य सत्यवचनानि श्रुत्वा सम्भ्रान्ताः वैदेशिकाः बहुषु विश्व- विद्यालयेषु अध्ययनं संशोधनञ्च प्रारेभिरे । para-psychology, transpersonal psychology, clinical hypnosis इत्यादिना नाम्ना विज्ञानस्य नाना शाखाः प्रारब्धाः । यथा भारतीयानां दर्शनपरम्परायां सत्यावगमनाय चार्वाकादीनि अद्वैतपर्यन्तानि विभिन्नानि दर्शनानि सत्यसाक्षात्कारस्य क्रमिकविकासं प्रतिपादयन्ति तथैव विज्ञानमपि सत्यान्वेषणं कुर्वत् सत् सोपानारोहणक्रमेण चलदस्तीति सुधयः आमनन्ति । सम्प्रति आधुनिकविज्ञानस्य प्रगतिं विकासं च नैकट्येन सूक्ष्मेक्षिकया अवलोकयतां विपश्चिदाम् अयम् अनुभवः यत् तत्थम् अनतिदूरे वर्तते ।

**उपनिषत्-विज्ञानयोः सादृश्यम् –**

यद्यपि मूलभूतविषयेषु चिन्तनशैल्यां च भेदः वर्तते तथापि उपनिषत्-विज्ञानयोःलक्ष्ये अभेदः । प्रज्ञायाः विविधानि सोपानानि विद्यन्ते इत्यत्रापि उभयोः ऐक्यमत्यम् । बहूनां विदुषां स्वप्नावस्थायां विनूतनानि चिन्तनानि अस्फुरन् । विश्वप्रसिद्धः भारतीयः गणितज्ञः तेषु अन्यतमः । प्रज्ञायाः जागृदन्तरसोपानानि वर्तन्त इति विज्ञानिनां निश्चप्रचं मतम् । जन्मान्तरीयाणि सुकृतदुष्कृतकर्माणि मूलरुपेण सूक्ष्मदेहे भवन्तीति आर्षः पन्थाः । वश्यसुप्तस्थितौ नरस्य जन्मान्तरीयः विषयः ज्ञातुं शक्य इति वैज्ञानिकः अभिप्रायः । स्थूलदेहं परित्यक्ताः प्रत्यगात्मनः विभिन्नेषु स्तरेषु लोकेषु वा भवन्ति । न तेस्माकं मन्ददृष्टीनां दृष्टिपथम् आयान्ति । धृते देहे प्राक्तना कर्मस्मृतिः विनश्यति । कर्मणि प्रवृत्तिः चेतनधर्मः । जन्तवः यानि कर्माणि कायेन वाचा

मनसा निर्वर्तयन्ति तेषाम् अनुरूपमेव फलं स्वयं भुञ्जते- बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ।। भवगवद्गीता-4.5

ईदृशं कर्म 'Boomerang Karma' इति प्रकथ्यते । What goes around comes around. न्यूटन् विज्ञानिनः तृतीयः नियमः कर्मव्यवस्थायामपि समन्वेति । (For every action there is an equal and opposite reaction.) प्राचीनार्वाचीनयोः समावेशः इहाप्यस्ति । एकया दृष्ट्या पुनर्जन्म नाम विकास इत्यर्थः । सर्वेपि जीविनः भिन्नं भिन्नं देहं धरन्तः चरमं पुरुषार्थं प्रति प्रयान्तस्सन्तीति आद्यशङ्कराचार्याः क्वचिदभिप्रयन्ति । तद्यथा सर्वं वस्तु स्वस्थितये पृथिवीम् आश्रयते, पृथिव्याः दूरं प्रक्षिप्तं वस्तु गुरुत्वाकर्षणबलेन पृथिवीम् उपसर्पति, तथैव सर्वेपि मानवाः उत्पथगामिनः अपि विकाससमार्गे प्रवृत्ताः । दुर्वृत्तोपि केनचन निमित्तेन निषिद्धे पथि निबद्धः कर्मविपाक- वशात् । लोकोयं कर्मबन्धनः इति गीताचार्यस्य वचनं स्मर्यम् । स्वामी विवेकानन्दाः उदघोषयन् – Every man is potentially divine. भारतीयाः वैदेशिकाश्च विचक्षणाः एतमेव जीवविकाससमार्गं पुरस्कुर्वन्ति । अतीतानन्तरकाले कृतानां कृष्णकर्मणां फलानि व्याधयः । तदुक्तं आयुर्वेदे यथा- पूर्वजन्मकृतं पापं व्याधिरूपेण बाधते । इदं symbolic karma इति कथ्यते । धर्मशास्त्रेषु यथा – अत्युत्कटैः पुण्यपापैः इहैव फलमश्नुते । एवञ्च बहवो विषयाः समाना इव प्रतीयन्ते ।

**सम्बन्धसेतुः ज्ञानफलञ्च -**

आर्षाधुनकयोः पथोः क्वचन विषयसाधर्म्ये सत्यपि शब्दप्रयोगे वैधर्म्यं लक्ष्यते । विचारसंवहने च क्लेशोस्ति । आर्षाः आधुनिकविषयमूढाः । आधुनिकाः आर्षविषयविमुखाः । एवञ्च उभयोरपि मार्गयोः सम्बन्धसेतुः वर्तमानस्य कालस्य आवश्यकता । अपरः विषयः ज्ञानफलम् । प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते इति प्रसिद्धोक्तिः । आर्षाः ज्ञानिनः आधुनिकाः विज्ञानिनः सत्यान्वेषणपरा इत्यत्र नास्ति सन्देहसन्दोहः । किन्तु, आत्मनो मोक्षार्थं जगद्धिताय च इति श्रद्धया ऋषयः ज्ञानसाघकाः आसन् । ज्ञानानुसन्धाने सत्यसाक्षात्कारे धर्मः दिग्दर्शक आसीत् । परन्तु, एकविंशे शतके अर्थमूलं हि ज्ञानशोधः । तच्च अनर्थे पर्यवस्यति । तद्यथा-परमाण्वनुसन्धानम् । अत एव जेगीयते यत् आर्षे आघारे आधुनिकेन विघानेन विघीयमानः शोधः प्रमोदजनकः भवेत्, न प्रमादजनकः । यथायोग्यं यथाशक्ति यदि वयं पथिन्यस्मिन् कृतयत्नाः स्याम तर्हि भारतं जगद्गुरुपदं विन्दतीत्यत्र न कोपि संशयलेशः इति शम् ।।

## आकरग्रन्थसूची


* श्रीशङ्कराचार्यसम्पूर्णग्रन्थावलिः – वाणीविलासमुद्रणालयः , श्रीरङ्गम्.1910 ,
* वेदान्तसारः – सदानन्दः, सं- .स्वामी हर्षानन्दः ,रामकृष्णाश्रमः ,मैसूरु.1978 .
* विवेकचूडामणिः – आद्यशङ्कराचार्याः ,सं -.स्वामी हर्षानन्दः , रामकृष्णाश्रमः , मैसूरु.2008 .
* सर्वमतसङ्ग्रहः – सं .गणपतिशास्त्री ,अनन्तशयनं तिरुवनन्तपुरम्-१९१८
* सर्वसिद्धान्तसङ्ग्रहः – सं .रङ्गाचार्यः ,मद्रपुरीसर्वकारीयमुद्रणालयः ,चेन्नपुरी , .1909



**Dr. R. Suresha**
Faculty, Department of Studies in Sanskrit,
University of Mysuru
Mysuru – 570006, Karnataka
Mobile: 9980833466
Email : drrsuresha@gmail.com


*********

Journal of Veda Samskrita Academy, ISSN 2250-1711
Volume XVIII : July to December – 2021

# मार्तण्डसोमयाजिग्रन्थोक्तषोडशसंस्काराः

**राजराजेश्वर. एन्. जोशि**
तात्कालिक अतिथि उपन्यासकः, शुक्लयजुर्वेद विभागः,
महाराज संस्कृत महाविद्यालयः, मैसूरु

**पीठिकाः–**

आहारनिद्राभयमैथुनञ्च सामान्यमेतत्पशुभिर्नराणाम् ।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः ॥

धर्मार्थकाममोक्षाख्यस्य चतुर्विधपुरुषार्थस्य सम्प्राप्तिरेव मानवजन्मनः परमं लक्ष्यं तथा धर्ममार्गेणैव इतरपुरूषार्थस्य आर्जवं भवेदिति धर्मस्य महत्वमपि अत्र स्पष्टीकृतमस्ति । चतुरशीतिकोटिजीवराशिषु मानव एव चतुर्विधपुरूषार्थसाधक इत्यनेनैव मानवजन्मनः महत्वम् अवगम्यते । तञ्च मानवजन्म, विना पुण्येन असाध्यमिति शङ्करभगवत्पादानां मतम् । अत एव विवेकचूडामणिग्रन्थे एवम् उक्तम्,

जन्तूनां नरजन्मदुर्लभमतः पुंस्त्वं ततो विप्रता तस्माद्वैदिकधर्ममार्गपरता विद्वत्वमस्मात्परम् ।
आत्मानात्मविवेचनं स्वनुभवो ब्रह्मात्मना संस्थितिः मुक्तिर्नो शतकोटिजन्मसुकृतैः पुण्यैर्विना लभ्यते ॥ इति ॥

एवं शतकोटिजन्मसुकृतैः प्राप्त मानवजन्मसाफल्यकरणे संस्काराणां महत् स्थानमस्ति । तर्हि संस्कारशब्दस्य अर्थः कः? कतिविध संस्काराः संतीति शास्त्रज्ञानाम् अभिप्रायः? मार्तण्डसोमयाजिग्रन्थोक्त संस्काराः के? इत्यादयः विषयाः अस्मिन् लेखने स्पष्टाः भविष्यंति ।

**संस्काराः**

सम् उपसर्गपूर्वक डु कृञ् (करणे) धातुना निष्पन्नोऽयं संस्कार शब्दः । "सम्यक् क्रियते" , "संस्क्रियते अनेन" इति संस्कारः । येन कर्मणा परिशुद्धिर्भवति, तत् कर्म एव संस्कारशब्देन व्यवह्रियते । तथाप्यस्ति, "आत्म शरीरान्यतरनिष्ठ विहित क्रियाजन्य अतिशयः विशेषः वा संस्कारः" इति । तर्हि प्राप्तमानवजन्मसाफल्यं कदा भवति, केन भवति इति प्रश्ने, यदा मानवः संस्कारवान् , धर्मवान् भवति तदैव इति उत्तरम् । वेद एव

सर्वविधधर्ममूलत्वात् वेदाध्ययनेऽपि संस्कारः आवश्यक एव । संस्कारः किमर्थम्
आवश्यक इत्युक्ते, चाटूक्तिरस्ति यथा,

सर्व संस्कार संयुक्तः इहामुत्र च मोदते । संस्कार रहितो लोके पशु मध्ये विराजते ॥ इति ॥

सर्व संस्कार संयुक्तः इहामुत्र च मोदते ।
संस्कार रहितो लोके पशु मध्ये विराजते ॥ इति ॥

संस्कारहीनस्य तथा संस्कारयुतमानवस्यमध्ये कथं भेदः वर्तते इति अनेन ज्ञातुं साध्यम् । तत्र आङ्गिरसमहर्षेर्वचनमस्ति,

चित्रकर्म यथानेकैः अङ्गुरून्मील्यते शनैः । ब्राह्मण्यमपि तद्वत्स्यात् संस्कारैः विधिपूर्वकम् ॥ इति ॥

जीवात्मानम्प्रति क्रियमाणाः जातकर्मादयः एव संस्काराः । वैशेषिकाः वेग, भावना, स्थितिस्थापकञ्चेति त्रिविध संस्कारान् आमनन्ति । तर्हि सर्वेषामपि संस्कारकर्म अस्ति वा इति चेत्– आपस्तम्बमहर्षिः "अस्त्रीभ्यः प्रतीयेरन्" इति गृह्यसूत्रे उक्तत्वात् स्त्रीणामपि कानिचन संस्कारकर्माणि सन्तीति भाति । केचन अष्टचत्वारिंशत्, केचन पञ्चविंशतिः, केचन षोडशेति प्रोक्ताः प्राचीनाचार्यैः स्वस्वगृह्येषु ।

तथा च रघुवंशे महाकाव्ये [३–१८] अस्ति,

स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते । दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ ॥ इत्यस्ति ।

वैशेषिकाः वेग, भावना, स्थितिस्थापकञ्चेति त्रिविध संस्कारान् आमनन्ति । आश्वलायनस्मृतिप्रकारेण एकादशसंस्काराः, मनु, याज्ञवल्क्य, व्यासमते द्वादशसंस्काराः, बोधायन, पारस्कर (कात्यायन), वाराह आचार्याणां मते त्रयोदशसंस्काराः, वैखानसगृह्यसूत्रानुसारेण अष्टादश संस्काराः, तथा गौतममते तु चत्वारिंशत् संस्काराः सन्ति । परंतु अधिकाः मुनयः तथा विद्वांसः षोडषसंस्काराः सन्तीति अभिप्रयंति । अस्मिन् कर्णाटकप्रदेशे काण्वशाखानुयायिनः मार्तण्डसोमयाजिकृत संस्कारमार्तण्ड– प्रयोगमेव अधिकतया अनुसरन्तीति कारणात् तथा,

अथापिचापलाद्ग्रन्थ एष सङ्क्षेपतो मया । सौलभ्याय प्रयोगाणां रच्यते कण्वशाखिनाम् ॥
इति संस्कारमार्तण्डप्रयोगे उक्तत्वाच्च अधोलिखितान् षोडशसंस्कारान् अधिकृत्य पश्यामः ।

गर्भाधानं पुंसवनं सीमंतोन्नयनं तथा । जातकर्माभिधानंच निष्क्रमः प्राशनं क्रमात् ।

चोडोपनयनं वेदव्रतानां च चतुष्टयं । गोदानमेखलोन्मोको विवाहः षोशशक्रियाः ॥ इति षोडशसंस्काराः

**१. गर्भाधानसंस्कारः**

अयं संस्कारः षोडशसंस्कारेषु प्रथमः संस्कारः । डु धाञ् (धारणपोषणयोः) धातुना निष्पन्नोऽयं शब्दः । गर्भ आधीयते अनेन इति गर्भाधानम् । "गर्भः संधार्यते येन कर्मणा तत् गर्भाधानम्" (वीरमित्रोदये), "निषिक्तो यत्प्रयोगेण गर्भः संधार्यते स्त्रिया तत् गर्भालंबनम्" । गर्भाधानार्थम् ज्योतिष्केन प्रशस्ततिथिवारनक्षत्रादिकं सूचितमस्ति । तथा च आयुर्वेदशास्त्रे गर्भाधानार्थे,

"तासामाद्याः चतस्रस्तु निंदितैकादशी तथा ।
त्रयोदशि च शेषाःस्युः प्रशस्ताः दशरात्रयः" ॥ एवमुक्तमस्ति ।

तथैव, "नार्तवे दिवा मैथुनं व्रजेत्" इति निषेधमुक्तमस्ति । तथास्ति शंखलिखिते, " क्लीबा अल्पवीर्याश्च दिवा मैथुनात् प्रसूयंते अल्पायुषश्च" इत्यस्ति । अन्यत्र श्रूयते यथा,

"ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडशः स्मृताः,
श्राद्धं कृत्वा च भुक्त्वा च श्रेयोऽर्थि न च पर्वसु", ॥
इति गर्भाधानार्थं प्रशस्ताप्रशस्त कालः उक्तः ।

**२. पुंसवनसंस्कारः**

षोडशसंस्कारेषु द्वितियः संस्कारः अयम् । षूङ् (प्राणिगर्भविमोचने) धातुना निष्पन्नः शब्दः । पुत्रसंपादनार्थं एषः संस्कारः क्रियते । पुमांसं सूते अनेन इति पुंसवनम्, पुमांसमिव सूते पुरुषवत् जनयत्यनेन इति पुंसवनम्, पुमान् प्रसूयते येन कर्मणा तत् पुंसवनम् । अथ पुंसवनं पुरा स्पंदत इति मासे द्वितीये तृतीये वा इति पारस्करगृह्यसूत्रे उक्तत्वात् अयं संस्कारः गर्भात् द्वितीये अथवा तृतीये मासे क्रियते इत्यर्थः । अस्मिन् संस्कारे यदि पुत्र्याः अपेक्षा वर्तते चेत् क्रियाभेदः सुश्रुतसंहितायां प्राप्तुं शक्यते ।

**३. सीमंतोन्नयनसंस्कारः**

षोडशसंस्कारेषु अयं तृतीयः संस्कारः । "सीमंतः यस्मिन् कर्मणि उन्नीयते तत् सीमंतोन्नयनं" इति । "चतुर्थे गर्भमासे सीमंतोन्नयनम्", "आपूर्यमाणपक्षे (यदा) पुंसा नक्षत्रेण चन्द्रमा युक्तः स्यात्" इति आश्वलायनगृह्यसूत्रे कालः निर्दिष्टः अस्ति । तथा "पुंसवनवत् प्रथमे गर्भे मासे षष्ठेऽष्टमे वा" इति पारस्करगृह्यसूत्रे उक्तम् । आयुर्वेद –सुश्रुतसंहितायां "पञ्चमे मनः प्रभुद्धतरं भवति षष्टे बुद्धिः", "सा प्राप्त दोहदा पुत्रं जनयेच्च गुणान्वितं अलब्ध दोहदा गर्भे लभेत आत्मनि वा भयम्" इत्युक्तमस्ति । देवलप्रकारे "सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता" एवमस्ति ।

**४. जातकर्मसंस्कारः**

षोडशसंस्कारेषु अयं चतुर्थः संस्कारः । "जाते कर्म" "जातस्य कर्म" तथा "जातः कर्मसंस्कार्यः यस्मिन्" इत्येवं पदव्युत्पत्तिः कृतास्ति । जननात्पूर्वम् एतत् संस्कारो वा उत जननानन्तरमयं संस्कारो वा इत्यत्र भेदाभिप्रायः वर्तते,

"गर्भाम्बुपानजनित सकलदोष निर्हरणार्थम्"

तथा,

"जातस्यारिष्टनाशाय सर्वापद् भय शान्तये । सर्वसम्पत् समृध्यर्थं जातकर्मादि कारयेत् ॥
होमश्चायं कुमारस्य रक्षार्थं परिकीर्तितः ॥
इति शास्त्रवाक्यात् जातकर्मसंस्कारस्य उद्देशः स्वष्टो भवति ।

**५. नामकरणसंस्कारः**

षोडशसंस्कारेषु अयं पञ्चमः संस्कारः । नाम्नः करणं यत्रेति नामकरणम् । "एकादशे द्वादशे वा अहनि पिता नाम कुर्यात्" इत्यनेन नामकरणसंस्कारस्य कर्ता कः, कदेयं संस्कारः कार्यः इति उत्तरं लभते । नामकरणं किमर्थमित्यत्र वीरमित्रोदये अस्त्यथा,

नाममालिख्य व्यवहार हेतुः शुभावहं कर्मसुभाग्यहेतुः ।
नाम्नेव कीर्तिं लभते मनुष्यः ततः प्रशस्तं खलु नामकर्म ॥ इति

अत्र कुलदेवतानाम, मासनाम, नक्षत्रनाम तथा व्यवहारिकनामेति नामचतुष्टयं लेखिष्यन्ति । परन्तु निषेध अस्ति नामकरणे,

नार्थहीनं नचाशस्तं नापशब्दयुतं तथा । नामाङ्गल्यं जुगुप्स्यं वा नाम कुर्यात् समाक्षरम् ॥
इति विष्णुपुराणे नाम कथं भवेदित्युक्तमस्ति । तथा भागवतेप्युक्तम्,

"सांकेत्यं पारिहास्यं वा स्तोभं हेळनमेव वा । वैकुण्ठनामग्रहणं अशेषाघहंर विदुः" इति ।

**६. निष्क्रमणसंस्कारः**

षोडशसंस्कारेषु षष्ठः संस्कारः । "अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः" एवम् उक्तवान् याज्ञवल्क्यमुनिः । तथा च अस्ति,

"गृहान्निष्क्रमणं सूतेश्चतुर्थे मासि कारयेत् । यात्रोक्ते समये मासि तृतीये द्वादशेऽहनि ॥ इति ।

परन्तु ज्योतिर्निबन्धे,

"तृतीये वा चतुर्थे वा मासि निष्क्रमणं भवेत् । ततः चतुर्थे कर्तव्यं मासि शिशोः चन्द्रस्यादर्शनं ॥ इति लभ्यते ।

**७. अन्नप्राशनसंस्कारः**

षोडशसंस्कारेषु सप्तमः संस्कारः अयम् । "षष्ठेऽन्नप्रशनां मासि यद्वेष्टं मङ्गलं कुले" इति मनुस्मृतावुक्तत्वात्, शिशोः षष्ठे अथवा अष्टमेमासि कर्तव्यमित्यर्थः । "यादृशंभुज्यतेन्नं बुद्धिर्भवति तादृशी" इत्युक्तत्वाच्च अस्य संस्कारस्य अस्ति महत्वम् । कृत्यचिन्तामणिग्रन्थे, "स्त्रीणांतु मध्वोदनं आयुष्कामः, क्षीरोदनं पशुकामः , घृतोदनं तेजस्कामः" इति कं पदार्थम् दद्यादिति स्पष्टमस्ति ।

**८. चूडाकर्मसंस्कारः**

षोडशसंस्कारेषु अष्टमः एषः संस्कारः । वसिष्ठमुनिर्वदति,

द्वादशीं चाष्टमीं रिक्तां षष्ठीं प्रातिपदं तथा । हित्वा शेषासु तिथिषु क्षौरकर्म शुभावहम् ॥

पञ्चमी सप्तमी चैव दशम्येकादशी तथा । त्रयोदशी तृतीया च क्षुरकर्मशुभावहा ॥इति ।

प्रशस्तनक्षत्रवारलग्नादिकं दृष्ट्वा इमं संस्कारं कुर्यादिति मुनयः वदन्ति । संस्कारनिर्णये उक्तम्,

"जातकर्मादि संस्काराः स्वकाले न भवन्तिचेत् । चौलकर्मे प्रकुर्वीत प्रायश्चित्तादनन्तरम् ॥ इति",

चरक–सुश्रुतविरचित आयुर्वेद ग्रन्थे अस्ति,

"पौष्टिकंव्यष्यमायुष्यं शुचिरूपम् विराजनम् । केशश्मश्रु नखादिनां कर्तनं सप्रसाधनं ॥ (चरक)

पापोपशमनं केशरोमापामार्जनं । हर्षं लाघव सौभाग्यकरं उत्साहवर्धनं । मस्तकाभ्यंतरोपरिष्ठत् सिरासंधि सन्निपातो रोमावर्तो अधिपती ॥इति ॥ (सुश्रुत शरीरस्थान)

**९. उपनयनसंस्कारः**

एषः षोडशसंस्कारेषु नवमः संस्कारः । 'उप' उपसर्गपूर्वक 'णीञ्' (पापणे) धातुना निष्पन्नस्य अस्य व्युत्पत्तिः वीरमित्रोदयप्रकारे "उप समीपे आचार्यादीनाम्, नयनं प्रापणं उपनयनं" इति । तथा च मनुना,

"ब्रह्मवर्चसकाम्यस्य कुर्याद्विप्रस्य पञ्चमे । राज्ञे बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे" ॥

इति उपनयनस्य कालं, कामनापि उक्तम् । "उपनयनं विद्यार्थस्य श्रुतितस्संस्कारः" इति सूत्रद्वारा आपस्तम्बमुनिमते "विद्यार्थस्य" इति पुल्लिङ्गशब्दप्रयोगस्य उद्देशः, 'स्त्रीणां' अयम् उपनयनसंस्कारः नास्तीति वक्तुमेव इस् आपस्तम्बधर्मसूत्रे उक्तमस्ति । तर्हि किमर्थं स्त्रीणाम् उपनयनसंस्कारः निषिद्धः इत्युक्ते उपनयनसंस्कारस्य उद्धेशम् अवगन्तव्यं भवति । वेदाध्ययनमेव उपनयनसंस्कारस्य परमोद्देशः । विना उपनयनसंस्कारेण कोऽपि वेदाध्ययनस्य अर्हत्वं न प्राप्नोति । अतः यदा स्त्रीणाम् उपनयनसंस्कारः न सूचितः अर्थात् न विहितः तदैव अवगम्यते, स्तीणां वेदाध्ययनमपि निषिद्धम् अस्तीति । तर्हि किमर्थं स्त्रीणां वॆदाध्ययनं निषिद्धम् ? वॆदाध्ययनेन स्त्रीणां कः प्रभावः अर्थात् परिणामः भवति ? यदि तत्र अस्ति किं वैज्ञानिकं महत्वम् ? वैद्यशास्त्रस्य अभिप्रायः कः ? उपनयनसंस्कारस्य यॊग्यः कालः कः ? उपनयनसंस्कार अकरणे कोऽपि दोषः भवति ? इदानीन्तनकाले विवाहदिनस्य प्रात अपि केचन इमम् संस्कारं कुर्वन्ति । तदापि प्रयोजनमस्ति किम् ? केषाम् अयं संस्कारः विहितः केषां निषिद्धः ? अद्य बहुषु प्रदेशेषु वेदाध्ययनं तथैव होमहवनादि कर्मकुर्वतः स्त्रियः दृश्यन्ते खलु ? तर्हि तत्रास्ति किं कर्मसाफल्यम्? इत्यादयः मम शोधनग्रन्थे विमर्श्यते ।

**१०. वेदारम्भसंस्कारः**

एषः दशमः संस्कारः । गायत्रीमन्त्रसमेत साङ्गोपाङ्गवेदाध्ययनं कर्तुं यत् नियमधारणम् अस्ति, स च नियमः एव वेदारम्भः । उपनयनसंस्कारः यस्मिन् दिवसे क्रियते, स च दिवसः एव वेदारम्भस्यदिवसः इति केषान्चिस्मते । प्रति वेदाध्ययननारम्भेऽपि कश्चन क्रमः वर्तते, तथैव अनुसर्तव्यं भवति ।

**११. महानाम्नीव्रतसंस्कारः**

वर्षमॆकपर्यन्तम् एतद्व्रतं कर्तव्यं भवति । अयं संस्कारः,षोडश संस्कारेषु एकादशः संस्कारः, प्रायश्चित्तार्थं कुर्यात् । केशधारी भूत्वा भिक्शाटनपूर्वकम् एतद्व्रतं समाचरॆत् । परन्तु इदानीम् अस्याचरणं नास्ति ।

**१२. महाव्रतसंस्कारः**

वर्षमॆकपर्यन्तम् एतद्व्रतं कर्तव्यं भवति । अयं संस्कारः षोडश संस्कारेषु द्वादशः संस्कारः । केशधारी भूत्वा भिक्शाटनपूर्वकम् एतद्व्रतं समाचरॆत् । अस्मिन् व्रते, सूर्यदर्शनं तथा भूमिस्पर्शनं विशेषमुक्तमस्ति । परन्तु इदानीम् अस्याचरणं नास्ति ।

**१३. उपनिषद्व्रतसंस्कारः**

अयं संस्कारः षोडश संस्कारेषु त्रयोदशः संस्कारः । इमं संस्कारमपि गुरुकुले व्रतस्थो भूत्वैव एक वर्षपर्यन्तम् उपनिषद् पाठं पठितव्यं भवति । परन्तु इदानीम् अस्याचरणं नास्ति ।

**१४. गोदनव्रतसंस्करः**

अयं संस्कारः षोडश संस्कारेषु चतुर्दशः संस्कारः । अस्मिन् संस्कारे, वेदाध्ययनं कुर्वतः वटुः अर्थात् ब्रह्मचारी स्वस्य षोडषे वयसि मुखक्शौरं क्रुत्वा, आचर्यसहितो भूत्वा, होमं क्रुत्वा, अचार्याय गाम् दानरूपेण ददाति तथा च पूर्वोक्तवत् गुरुकुले एक वर्षपर्यन्तम् व्रतस्थोऽपि भवेत् । परन्तु अयमपि एकः संस्कारः इत्यत्र भेदः वर्तते । "केशान्त संस्कार" इत्यपि अपरं नाम अस्ति अस्य संस्कारस्य ।

**१५. समावर्तनसंस्कारः**

षोडषसंस्कारेषु एषः पञ्चदशः संस्कारः । "वेदमधीत्य स्नायात्" इति श्रुतिवचनानुसारेण, वटुः गुरूसन्निधौ वेदाध्ययनं समाप्यानन्तरं तथा गृहस्थाश्रम– स्वीकरणात्पूर्वं करिष्यमाणोऽयं संस्कारः । 'सम्' 'आङ्' उपसर्गपूर्वकं 'वृत' (वर्तने) धातुना निष्पन्नोऽयं शब्दः । आश्वलायनगृह्यसूत्रे "विद्यांते गुरूमर्थेन निमंत्र्य कृतानुज्ञातस्य वा समावर्तनम्" इत्यस्ति । त्रयः स्नातका भवन्ति, (१) विद्यास्नातकः (२) व्रतस्नातकः (३) विद्याव्रतस्नातकश्चेति । तत्र समाप्य वेदं असमाप्य व्रतं यः समावर्तते सः विद्या स्नातकः । अत्र व्रतशब्दः महानाम्न्यादि वेदव्रतस्य उपलक्षणम् । तथा, "समाप्य व्रतं असमाप्यवेदं यः समावर्तते सः व्रतस्नातकः । एवम्, "उभयं समाप्य यः समावर्तते सः विद्याव्रतस्नातकः" भवति । परन्तु

"कुब्जमानवः जात्यन्धः क्लिबपंग्वार्त रोगिणाम् । व्रतचर्या भवेत् तेषां यावज्जीवमनंशतः" ॥

इति एताः स्नातकाः न भवन्ति स्म ।

**१६. विवाहसंस्कारः–**

षोडषसंस्कारेषु अन्तिमः अर्थात् षोडषः संस्कारः अयम् । "सर्वोपकारः क्षमः गृहस्थाश्रमः" "धन्यो गृहस्थाश्रमः" एवं गृहस्थाश्रमस्य महत्वं वर्णितमस्ति । "विशिष्टं वहनम्" इति विवाहः, 'वह' (प्रापणे) धातुना निष्पन्नोऽयं विवाहशब्दः । तत्र अष्टविधविवाहाः सन्ति । ते तु, (१) ब्रह्म (२) दैवः (३) आर्षः (४) प्राजापत्यः (५) आसुरः (६) गन्धर्वः (७) राक्षसः (८) पैशाचश्चेति । विवाहयोग्यकालः, वधुवरयोर्लक्षणम् इत्यादि सर्वे विष्याः अनेकऋषिद्वारा विविधरीत्या वर्णिताः सन्ति ।

**उपसंहारः–**

अद्य प्रायशः शास्त्रविषयेषु निरासक्तिकारणेन वा समीचीन ग्रन्थानाम् अनुपलब्धित्वात् वा अधिकाः जनाः संस्कारहीनाः भवन्तः सन्ति अर्थात् संस्काराः लुप्ताः भवन्तः सन्ति । अत एव अस्मिन् समाजे अद्य अपराधाः तथा मनुष्यत्वरहिताः जनाः अधिकाः भवन्तः सन्ति वा इति जिज्ञासां प्रति उत्तरं प्राप्तुं शक्येत । वेदोक्तसंस्काराणां करणेन व्यक्तेः आरोग्यविषये वा तेन द्वारा समाजे कथं परिवर्तनं भवतीति केऽपि गम्भीररूपेण न चिन्तयन्तः सन्ति । परम्परानुसारेण आगतमितिकारणेन केचन संस्कारं कुर्वन्ति । तथा च अन्ये केचन जनाः एतानि संस्कारकर्माणि अर्थहीनाः इति विदेशीयान् दृष्ट्वा तिरस्काररूपेण संस्करं पश्यन्ति । अन्ये केचन अस्मिन् वैज्ञानिके प्रपञ्चे एते संस्काराः अर्थहीनाः इत्यपि वदन्ति । अन्ये केचन विदेशीयानां अभिप्रायः अत्र कथमस्तीति विचारं कुर्वन्ति । एतादृशाः जनाः एव अद्य अधिकाः सन्ति । संस्कारबोधकाः अनेकाः ग्रन्थाः अद्य उपलभ्यन्ते, परन्तु वेदोक्त–संस्कारकरणकालः किमर्थं निर्दिष्टः ? काले संस्कारान् न कुर्वन्ति चेत् तदा कः परिणामः भवेत् ? वेदोक्तसंस्कारकरणेन आरोग्ये परिणामः कथं भवति, वैज्ञानिकदृष्ट्या कस्य संस्कारस्य किं फलम् ? इति संस्कारविषये वैज्ञानिकवैद्यशास्त्रमहत्वं ज्ञातुं इतोऽपि अधिकाध्ययनं आवश्यकं वर्तते ।

**आधारग्रन्थाः**

**१. श्री चिदंबर प्रकाश भाग–१,**

प्रकाशकः श्रिगणेश चिदंबर इनामदार, चिदंबरकृपा मदिहाळ, धारवाड, मुद्रकः, श्रीमोहन् कुलकर्णि, विजयलक्ष्मी आर्ट् प्रिंटर्स् शेरिगल्लि, बेळगांव्, प्रथममुद्रणं–१९७६

२. **संस्कारमार्तण्ड (प्रथमःखण्डः)**,

श्री यज्ञेश्वराध्वरिसूरिसूनुना चिदंबरशर्मा, हावनूरोपाह्व श्रीकृष्णभ–सूनुर्दामोदरशर्मा च इत्येताम्बां, बडली (जि. बेळगांव ता. परसगड) ग्रामे प्रकाशितम् । श्रीयुत भिकाजि परशुराम काळे इत्येतैः आनंदवने श्री शेषाचलाख्यमुद्रायन्त्रालये संमुद्रितं च

**३. संस्कारमार्तण्ड (द्वितीयखण्डः)**

श्री यज्ञेश्वराध्वरिसूरिसूनुना चिदंबरशर्मा, हावनूरोपाह्व श्रीकृष्णभसूनुर्दामोदरशर्मा च इत्येताम्बां बडली (जि. बेळगांव ता. परसगड) ग्रामे प्रकाशितम् । श्र्युत भिकाजि परशुराम काळे इत्येतैः आनंदवने श्री शेषाचलाख्यमुद्रायन्त्रालये संमुद्रितं च

४. **“वाचस्पत्यं”** – बृहत् संस्कृताभिधान, श्रीतारानाथ–तर्कवाचस्पति–भ–ाचार्य्येणविरचितम् ।

५. **“शब्दकल्पद्रुमः”** – स्यार–राजा–राधाकन्तदेव–बाहदुरेण–विरचितः, –चौखांबा संस्कृत सीरिज

**राजराजेश्वर. एन्. जोशि**
तात्कालिक अतिथि उपन्यासकः,
शुक्लयजुर्वेद विभागः,
महाराज संस्कृत महाविद्यालयः,
न्यू सय्याजिराव् रोड्,
मैसूरु–५७०००२४.कर्नाटक,
चरदूरवाणी–9449131243, 9663319243
E-mail: rajarajeshwaranjoshi@gmail.com

**********

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# ईशावास्य-केनोपनिषदोः सामान्यपरिचयः

**Dr. Sanjib Sarkar**
Guest Lecturer, Department- Advaita Vedanta
Mumbadevi Adarsh Sanskrit Mahavidyalaya,
Bharatiya Vidya Bhavan, Mumbai

## ईशावास्योपनिषद्

अस्या उपनिषदः रचनाकालः क्रिस्तोः पूर्व सप्तमशतकम् (700BC) इति विमर्शकाः। उपनिषत्सु सर्वाधिकं प्राचीनम् एव महत्वपूर्णा ईशावास्योपनिषद् शुक्लयजुर्वेदस्य माध्यन्दिन् शाखान्तर्गत चत्वारिंशत-मोऽध्यायो (अन्ताऽध्याय एव) वर्तते। अत्रैकं पुरातनप्रमाणं दीयते येन माध्यन्दिनी शाखैव सर्वसाधारणी, नान्येति प्रतीयते। अथ पञ्चदशशाखासु माध्यन्दिनशाखा मुख्येति वेदितव्या। वसिष्ठेनोक्तं माध्यन्दिनी तु या शाखा सर्वासाधारणी तु सा १। अष्टादशसु मन्त्रेषु निबद्धा ईशावास्योपनिषदि कर्मसन्नास्यात अपसृत्य कर्मोपासनायाः सरलशैल्या मार्मिकं विवेचनम् अस्ति। ईशावास्यमिदं सर्वमित्यादयः पद्यानामाधारत्वाद् एव ईशोपनिषद् ईशावास्यो- पनिषद् वाऽस्याः संज्ञा सञ्जाताः। अत्र परमव्रह्म - परमात्मनः स्वरूप- विवेचनेन सह विद्या अविद्या विषये संक्षेपेण प्रकाशः दरीदृश्यते। प्रथमेन मन्त्रेण आचार्यः शिष्याय जगतः परमात्मव्यापकत्वमुपदिशति। द्वितीये मन्त्रे कर्मानुष्ठानस्य उपदेशः तथा तृतीये मन्त्रे नारकीयानां पारलौकिकगतिवर्णिता अस्ति। चतुर्थ-पञ्चम-मन्त्रयोः परमात्मनः सार्वभौमिकं सर्वव्यापकञ्च स्वरूपं निरूपितमस्ति। षष्टे मन्त्रे सर्वभूतात्मकत्वं, सप्तमे तस्य फलं च। अष्टमे मन्त्रे परमात्मप्राप्तेःफलम, तदन्तरम् एकादशमन्त्रपर्यन्तं विद्याऽविद्याविषयकं विचारं वर्णितमस्ति। द्वादश मन्त्रत प्रारभ्य चतुर्थदशमन्त्रपर्यन्तं प्रतिबन्धककर्मणां निवृत्तिपूर्वकं ब्रह्मानुभवेन सह चिन्तनमेव ब्रह्मप्राप्तेः साधनत्वेन निर्दिष्टम्। पञ्चदशे षोडशे च मन्त्रे मुमुक्षोः परमात्मानं प्रति प्रार्थना वर्णिताऽस्ति। सप्तदशे अष्टादशे मन्त्रयोः मुमुक्षुः परमात्मानं स्वापेक्षितप्राप्तये प्रार्थयति। तात्पर्यपूर्णाः उल्लेखयोग्याः श्लोकाः -

**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भूञ्जीथा मा गृधः कस्य स्विद्धनम्।२**
**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥३**
**विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्यायाऽमृतमश्नुते॥४**

कदाचित् वृहदारण्यकेशावास्ययोः तुलनया कतिपय श्रुतिवाक्यानां दर्शनेन ईशावास्योपनिषद् वृहदारण्यकोपनिषदोऽपि प्राचीनतरेति प्रतिभाति। उभयोः एकवेदसम्बन्धात् ईशोपनिषद् मन्त्रभागस्यांशभूतत्वात् पूर्वतरेत्यनुमानं भूयते। यतः ब्राह्मणभागादपि प्राचीनतरो मन्त्रभागः। समानाः श्रुतयः -

अन्धं तमः प्रावशन्ति येऽविद्यामुपासते। बृ.उ - 4/4/10 = ईश 9 N0 - श्लोकः, अनन्दा नाम ते लोका अन्धेन तमसावृताः। वृ.उ - 34/4/11 = असूर्या नाम ते लोकाः अन्धेन तमसाऽवृताः। 3 N0 - श्लोकः, हिरण्मयेण पात्रेण सत्यस्यापिहितं मुखम्। वृ.उ - 35/15/1 = ईश 15 N0- श्लोकः।

*** ईशावास्योपनिषद्व्याख्याकतॄणां कालः - प्रायः**

1. शङ्कराचार्यकृतं - ईशावास्योपनिषद्भाष्यम्

A.आनन्दगिरिकृता-ईशावास्यभाष्यव्याख्या (1260-1320A.D) B.
शिवानन्दयतिकृता - ईशावास्यभाष्यटिप्पणी (1650-1750A.D)

2. अनन्ताचार्यकृता - वेदार्थदीपिका (1625A.D)
3. आनन्दभट्टकृतम् - ईशावास्यभाष्यम्।
4. उपनिषद्ब्रह्मेन्द्रकृतम् - ईशावास्यविवरणम् (1765-1850A.D)
5. उवटाचार्यकृतम् - ईशावास्यभाष्यम् (1010-1062A.D)

6. गोपालानन्दकृता - ईशावास्यटीका - समयः कुत्रापि नोपलभ्यते
7. नरसिम्हभट्टकृता - ईशावास्यटीका - समयः कुत्रापि नोपलभ्यते
8. ब्रह्मानन्दसरस्वतीकृतम् - ईशावास्यरहस्यम् 1600-1700A.D
9. भास्करानन्दसरस्वतीकृता - ईशावास्यव्याख्या - 1800-1900A.D
10. रामचन्द्रपण्डितकृता - ईशावास्यरहस्यविवृतिः 1817A.D
11. श्रीधरानन्दकृतः - ईशावास्यविवेकः

**केनोपनिषद्**

(पुरातनो गद्योपनिषदः) अस्या रचनाकाल (500-400BC) इति विमर्शकाः। केनोपनिषत्सु सामवेदीयतवलकारशाखा, जैमिनीयशाखायाः तवल- कारब्राह्मणस्य नवमाध्यायात्मकः। अतः केनोपनिषद् तवलकारोपनिषन्- नाम्नापि प्रसिद्धा। इयं ब्राह्मणेपनिषद् इत्यपि कथ्यते। अस्यां चत्वारि खण्डानि सन्ति। अस्याः प्रथमे खण्डे अष्टौ मन्त्राः, द्वितीये खण्डे पञ्चमन्त्राः, तृतीये खण्डे द्वादशमन्त्राः तथा चतुर्थे खण्डे नवमन्त्राः समुपलभ्यते। अस्याः उपनिषदः आरभ्य 'केन' इति प्रश्नात्मकेन शब्देन भवति, अतएव उपनिषदियं केनोपनिषद् इत्यभिधीयते। अस्यामुपनिषदि तत् पूर्णं जगत् परमात्मकं वर्तते इति वर्णितम् अस्ति। परमात्मनो बलं विना अग्निः तृणमपि ज्वालयितुं न शक्नोति। परमात्मनः वलं विना वायुः तृणमपि आदातुं न शक्मोति। अत्र ब्रह्मतत्त्वं सम्यक् प्रतिपादनम्। तस्य ब्रह्मणः सत्तयैव वाक्चक्षुर्मनांसि स्वकर्म कर्तुं प्रभवन्ति। अतएव सर्वत्र परमात्मनः शक्तिः अनुसन्धेया मुमुक्षुभिः इति अस्याः सारंशः। यक्षरूपधारिणः परब्रह्मणः आख्यायिका, एवमेव उमायाः उपदेशः उस्याम् उपनिषदि प्राप्यते। प्रथमे खण्डे शिष्यः स्वगुरुं जिज्ञासा शमनार्थं कतिपयान् प्रश्नान् प्रस्तौति तेषां चत्वारः प्रश्नाः प्रथम- खण्डस्य प्रथमे मन्त्रे विद्यमानाः सन्ति। प्रश्नरूपेन सः पृच्छति - जडरूपं अन्तः करणं किमस्ति ? प्राणस्य का स्थितिः? वाण्यादिकर्मेन्द्रियाणाम् चक्षु- रादिज्ञानेन्द्रियाणां कः प्रेरक अस्ति तानि च इन्द्रियाणि स्वस्वकार्येषु प्रवर्तयिता कोऽपि सर्वशक्तिमान् सचेतनः अस्ति। सः कः किंस्वरूपश्च विद्यते ? शिष्येण पृष्टाः प्रश्नाः-

**"ॐ केनेषितं पतति प्रेषितं मनः, केन प्राणः प्रथमं प्रैति युक्तः।**

**केनेषितां वाचमिमां वदन्ति, चक्षुः श्रोत्रं क उ देवो युनक्ति ?॥"**

**"यन्मनसा न मनुते येनाहुर्मनो मतम्। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते "॥**५

अस्मिन् द्वितीयखण्डे ब्रह्मज्ञानस्य अनिर्वचनीयता आचार्येण प्रतिपादिता क्रियते। आचार्यः कथयति - यदि त्वं मन्यसे यदहं ब्रह्म सम्यग् जानामि तर्हि त्वं निश्चयेन ब्रह्मणः स्वरूपं अंशमात्रमेव जानासि। अतः निरभिमानितया ज्ञानार्जनं हि ध्येयम्। यतः इह जन्मनि मनुष्यस्य आत्मज्ञानार्जनस्य प्रयोजनम्।

**"यदि मन्यसे सुवेदेति दभ्रमेवापि, नूनं त्वं वेत्य ब्रह्मणो रूपम्।**

**यदस्य त्वं यदस्य देवेष्वथ नु, मीमांसं मेव ते मन्ये विदितम्॥"**६

अस्मिन् तृतीयखण्डे अहंकारोन्मत्तानां विभिन्नैः उदाहरणैः विज्ञापितमस्ति यत्संसारे ये केचित् प्राणिनः वा पदार्थाः मनोहराः शक्तिशालिनः रमणीयाः प्रियाश्च प्रतीयन्ते तेषु सर्वेषु परब्रह्मणः अंशस्यैव महिमा विद्यमानोऽस्ति। यदि कोऽपि सर्वशक्तिमत्वं मन्यते, तर्हि तस्य महान् दोषो भविष्यति। अत्र असुराणां पराजयेनाभिमानिनां देवानां गर्वापनोदनाय यक्षरूपधारी परमेश्वरस्य आविर्भावः वर्ण्यते। शक्तिपरीक्षायाम् यक्षस्य पुरः अग्निदेवस्य अभिमानभङ्गः पुनः देवा वायुसमीपं गत्वा प्रार्थितवन्तः। यदा सर्वे देवाः यक्षस्य समक्षं पराजिताः अभवन् इन्द्रे च उपस्थिते सति स्वरूपदिग्दर्शनार्थं यदा यक्ष इन्द्रसम्मुखमेव अन्तर्हितो बभूव तदानीम् उमारूपा सर्वज्ञशिरोमणिः, ईश्वरस्य श्रीमच्छंकरस्य स्वरूपाशक्तिः प्रादुर्बभूव या इन्द्रेण पृष्टे सति अब्रवीत्।

तत्र चतुर्थे खण्डे शक्तिरूपेण साकारीभूताया उमादेव्या देवराजाय उपदेशः - त्वया यो यक्षः दृष्टः एव य अन्तर्हितः स तु परब्रह्मपरमेश्वर उसीत्। यूयं सर्वे देवाः यद् असुरान् पराजित्य विजयं लब्धवन्तः तत्सर्व

तदब्रह्मणः अनुग्रहस्यैव परिणामः आसीत्। यूयन्तु निमित्तभूताः आस्ता। यूयं अहंकारवशात् ब्रह्मण इमं विजयं स्वविजयं मत्वा मिथ्याभिमानीनः भवथा। अधुना तदेव ब्रह्म युष्मत् मिथ्याभिमानं नाशयितुं यक्षरूपेण आविर्भूय अग्नेः वायोश्चाहंकारं मर्दयत् तथा तुभ्यं वास्तविकं ज्ञानं प्रदातुं मां प्रेरितमकरोत्। अतः 'युष्माभिः स्वशक्तभिमानं परित्यज्य' युष्माकं विजयः तस्यैव महिमा इति अवगन्तव्यम्।

इत्थं देवतासु सर्वप्रथमम् इन्द्रस्यैव मनसि इदं ज्ञानं प्रकटितमभवत् यद् यक्षरूपेण स्वयं परब्रह्मपरमात्मा एव आविर्भूतोऽभवत्। महाशक्तिभूतया उमाया इन्द्राय स्वयं ब्रह्मविज्ञानं प्रदत्तम्। यतः इन्द्रः एव देवेषु वरिष्टः। अतः यः ब्रह्मविद्यायाः रहस्यमवगच्छति, सः समस्तपापानाम् परमात्मसाक्षात्कारे प्रतिबन्धकरूपत्वात् समग्रशुभाशुभकर्मणाम् अशेषतः विनाशं कृत्वा नित्यं सत्यं सर्वश्रेष्टं परमधाम अध्यास्ते। कदापि ततो न निवर्तते सनातनरूपेण तत्रैव प्रतिष्ठति "ब्रह्मविद् ब्रह्मैव भवति"।

1.शङ्कराचार्यकृतम् - पदभाष्यम् वाक्यभाष्यम्

**भाष्यव्याख्याः -**

A. अभिनवनारायणेन्द्रकृता - भाष्यटीका
B. आनन्दगिरिकृता - भाष्यटिप्पणी
C. शिवानन्दयतिकृता - भाष्यटिप्पणी
D. श्रीधरशास्त्रिकृता - भाष्यव्याख्या बालवोधिनी

2. उपनिषद्ब्रह्मेन्द्रकृतम् - केनोपनिषद्विवरणम्
3. कृष्णलीलाशुककृता - केनोपनिषद्व्याख्या, शङ्करहृदयङ्गमा
4. नारायणाश्रमिकृता - केनोपनिषद्दीपिका
5. भास्करानन्दकृता - केनोपनिषद्व्याख्या
6. शङ्करानन्दकृता - केनोपनिषद्दीपिका

**पादटिप्पणी-**

१. ग. ओ. ला मद्रास, सूचीपत्र, तृतीयभागः, पृ. ३४२६ w । २. ई.उ., १ । ३. ई. उ., २ । ४. ई. उ., ११ ।
५. के. उप. । ६. के. उ. २ खण्डः ।

## सहायकग्रन्थसूची

१. अद्वैतवेदान्त इतिहास तथा सिद्धान्त - ड. राममूर्तिशर्मा - दिल्ली - 1998.
२. अद्वैततत्वमीमांसा - अभेदान्दभट्टाचार्यः -परिमल प्रकाशन -दिल्ली- 1964.
३. उपनिषदः एक परिचयः - वेम्पटि कुटुम्बशास्त्री, प्र.संस्करणम्-1995.
४. उपनिषत्सु कर्मवादः, जातवेद त्रिपाटी, प्र.सं, दिल्ली, 1986.
५. उपनिषद्भाष्यम् – खण्डः 1—एस. सुब्रह्मणमय्शास्त्री, महेश अनुसन्धानम् – वाराणसी.
६. दशोपनिषद् – शाङ्करभाष्य – मोतिलालवनार्जीदासः – दिल्ली – 1964.
७. श्रीमद्भागवद्गीता शाङ्करभाष्यम् – व्यासदेवः – गीताप्रेस, गोरखपुर – 1982

**Dr. Sanjib Sarkar**
Guest Lecturer
Department- Advaita Vedanta
Mumbadevi Adarsh Sanskrit Mahavidyalaya,
Bharatiya Vidya Bhavan,
K.m Munshi road, Chowpatty, Mumbai-400007
Mob- 7477822555
Email- sanjib9434sarkar@gmail.com

************

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# अप्रतीकालम्बनाधिकरणस्य रत्नप्रभाद्यनुसारेण विमर्शः

**Karthik Sharma K,**
Assistant Professor & Research Scholar
Chinmaya Vishwavidyapeeth, Adi Sankara Nilayam,
Adi Shankara Marg, Veliyanad, Ernakulam, Kerala 682313
Mobile No. : 8848480197
karthiksharma.k@cvv.ac.in karthik.19ep02014@cvv.ac.in

**सारांशः**

ब्रह्मलोकगन्तॄन्निर्णेतुम्प्रवृत्तम् अधिकरणम् अप्रतीकालम्बनाधिकरणम् । 'अथ यदुचैवास्मिञ्छव्यं कुर्वन्ति' इति छान्दोग्यवाक्यम्विषयीकृत्य इदमधि- करणम्प्रवृत्तम् । अस्मिन्वाक्ये विद्युल्लोकं प्राप्तान् उपासकान् अमानवः पुरुषः ब्रह्मलोकं गमयतीति अवगम्यते । तत्र किम्, ब्रह्मोपासकान् एव ब्रह्मलोकं गमयति वा उत अन्यान् अपि गमयति वा इति संशयनिवर्तनार्थम् एतदधिकरणारम्भः । अस्य अधिकरणस्य पूर्वपक्षोपोद्बलनाय सिद्धन्तदृढी- करणाय च अपेक्षिताः अनेकेअंशाः सूत्रभाष्ये विद्यमानाः अपि स्पष्टं नावगम्यन्ते इति रत्नप्रभां, ब्रह्मविद्याभरणम्, भामतीकल्पतरुपरिमलान्च अनुसृत्य अप्रतीकालम्बनाधिकरणस्य विमर्शः क्रियते ।

**उपोद्घातः**

शारीरकमीमांसायां चतुर्थाध्यायस्य तृतीयपादस्य षष्ठम् अधिकरणम् अप्रतीकालम्बनाधिकरणम् । 'अथ यदुचै- वास्मिञ्छव्यं कुर्वन्ति यदि च नार्चिषमेवाभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाण पक्षाद्यान्षड्दङ्ङेति मासा□स्तान्मासेभ्यः संवत्सर-संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्मगमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते नावर्तन्ते'१ इति छान्दोग्यवाक्यं विषयः । 'य एषोऽक्षिणि पुरुषोदृश्यत एष आत्मेतिहोवाचैतदमृतमभयमेतद्ब्रह्मेति तद्यद्यप्य- स्मिन्सर्पिर्वोदकं वासिञ्चति वर्त्मनी एव गच्छति'२ इति वाक्येन विहितस्य ब्रह्मोपासनस्य प्रकरणे३ इदं वाक्यं पठ्यते । ब्रह्मोपासनं कृत्वा अर्चिरादि मार्गेण विद्युल्लोकं प्राप्तान् उपासकान् अमानवः कश्चनपुरुषः ब्रह्मलोकं प्रापयति इति श्रुत्यर्थः अवगम्यते । अत्र च अयं सन्देहः। 'स एनान्ब्रह्म गमयति' इति अस्मिन्वाक्ये श्रूयते, तेन अमानवः पुरुषः प्रतीकोपासकान् अपि ब्रह्मलोकं गमयति वा न वा इति। प्रतीकोपासकान् अपि ब्रह्मलोकं गमयति वा न वा इति।

## अधिकरणारम्भकसन्देहोपपादनम्

कथमत्र संशयः उत्पद्यते इति चेत्? 'स एनान्ब्रह्म गमयति' इति अविशेषेण सर्वेषाम् उपासकानां ब्रह्मलोकप्राप्तेः प्रतिपादनात् 'प्रतिकोपासकान् अपि ब्रह्मलोकं गमयति अमानवः पुरुषः' इति कोटिः उत्तिष्ठति । ननु 'स एनान्ब्रह्म गमयति' इत्यत्र एतच्छब्देन प्रतीकोपासकानां यदि ग्रहणं अस्ति तर्हि प्रतिकोपासकानामपि ब्रह्मप्राप्तिः लभ्यते तदेव नास्ति खलु इति चेत्यदि प्रतिकोपासकानाम् अर्चिरादिमार्गेण गमनं नाङ्गीक्रियते, तर्हि तेषां कर्मप्राप्य धूमादिमार्गस्य च अभावात्मार्गद्वयभ्रष्टत्वात् 'अथ ये एतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदं दन्दशूकम्'४, 'अथैतयोः पथोर्नकतरेण च नतानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्वम्रियस्वेत्येतत्तृतीयं स्थानम्'५ इत्यादि श्रुत्यनुसारेण तृतीयमार्गप्राप्तिः स्यात् । अतः प्रतीकोपासकाः अर्चिरादि नाविद्युल्लोकं पाप्नुवन्तीति अवश्यं वक्तव्यम् । तथा च 'स एनान्ब्रह्म गमयति' इति वाक्येन विद्युल्लोकं प्राप्तानां प्रतीकोपासकानामपि ग्रहणं कर्तुं शक्यते इति अमानवः पुरुषः तानपि ब्रह्म गमयतीत्यर्थस्य लाभात्प्रतीकोपासकानामपि ब्रह्मप्राप्तिः लभ्यत एव इति तत्कोटेः उत्थानम् । तत्क्रतुन्यायात्प्रतीकोपासकान्ब्रह्म- लोकं न गमयति इति कोटेः उत्थानम् । 'यः यत्ध्यायति स एवतत्भवति' इति तत्क्रतुन्यायः ।

तथा च नामादिविकारेषु उपासनं कुर्वतां प्रतीकोपासकानां न ब्रह्मलोकप्राप्तिः फलं स्यात् । तथा च 'अमानवः पुरुषः प्रतीकोपासकान्ब्रह्मलोकं गमयति', 'अमानवः पुरुषः प्रतीकोपासकान्ब्रह्मलोकं न गमयति इति' कोटेश्च उत्थानं भवतीति अमानवः पुरुषः प्रतिकोपासकान्ब्रह्मलोकं गमयति न वा इति अधिकरणारम्भकसन्देहः भवति ।

**पूर्वपक्षः, अयमत्र पूर्वपक्षः ;**

अमानवः पुरुषः प्रतीकोपासकान् अपि ब्रह्मलोकं गमयति इत्येव अवगन्तव्यम् 'अनियमः सर्वासाम् अविरोधः शब्दानुमानाभ्याम्'६ इति सूत्रानुसारेण । तथाहि तृतीयाध्यायस्य तृतीयपादे गतेरर्थवत्वाधिकरणे ७। गतेः अर्थवत्वं सगुणविद्यायामेव न निर्गुणविद्यायाम् इत्येतन्निर्धार्य तदुत्तराधिकरणे अनि- यमाधिकरणे ८ सगुणासुविद्यासु कासुचित्गतिः श्रूयते कासुचित्नश्रूयते इत्यतः यासु गतिः श्रूयते तास्वेव गतिः नियमनीया वा उत यासु न श्रूयते तत्रापि गतेः उपसंहारं कृत्वा अनियमेन गतेः सर्वाभिः सगुणविद्याभिः सम्बन्धः कल्पनीयः वा इति विचारं कृत्वा अनियमेन सर्वासु सगुणविद्यासु सम्बन्धः कल्पनीयः इति सिद्धान्तः कृतः । तथा च अधिकरणद्वयेन इदं लभ्यते; निर्गुणविद्या व्यतिरिक्तासु सर्वासु सगुणविद्यासु देवयानाख्या गतिः भवति इति । तथा च प्रतिकोपासनस्याऽपि निर्गुणविद्याव्यतिरिक्तसगुणविद्यात्वात्तत्र अपि देवयानाख्यगतेः सम्बन्धः कल्पनीयः । तथा च देवयानेन विद्युल्लोकं प्राप्तान् अमानवः पुरुषः ब्रह्मलोकं गमयतीति निर्णीयते ।

पञ्चाग्निविद्यायाम् ईषत्भेदेन पठ्यमानस्य 'तद्य इत्थं विदुः । ये चेमेऽरण्ये श्रद्धातप इत्युपासते तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्य- माणपक्षाद्यान्षड्ुदङ्ङेतिमासास्तान् ।। मासेभ्यः संवत्सर- संवत्सरादादित्यमादि- त्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्मगमयत्येष देवयानः पन्था इति॥'९ इतिवाक्यस्य अर्थपर्यालोचनया अपि अयमेव निर्णयः कर्तव्यः भवति । तथाहि 'स एनान्ब्रह्म गमयति' इति वाक्यगतेन तच्छब्देन 'तद्य इत्थं विदुः येचामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमेवाभिसंभवन्ति' इति पूर्ववाक्ये प्रस्तुताः परामृश्यन्ते इति वक्तव्यम् । पूर्ववाक्ये च 'तद्य इत्थं विदुः' इत्यनेन पञ्चाग्निविदः परामृश्यन्ते, 'ये चामी अरण्ये श्रद्धा सत्यम्' इति ब्रह्मविदः परामृश्यन्ते । तथा अत्र ब्रह्मविदां परामर्शात्नामादिप्रतिकोपासकैः नामादिषु ब्रह्मदृष्टेः क्रियमाणत्वात्तेषामपि परामर्शः अस्त्येव । यदि च 'ये चामी अरण्ये श्रद्धसत्यम्' इत्यस्मिन्वाक्ये प्राधान्येन ब्रह्मोपासनं कुर्वताम् अहं ग्रहोपासकानामेव ग्रहणं, तत्रैव 'श्रद्धासत्यम् इत्युपासते' इति निर्देशस्वारस्य सम्भवात् , 'मनो ब्रह्मेत्युपासीत' इत्यादौ तु मनः आदीनाम्विशेषणतया एव ब्रह्म उपास्यते न प्राधान्येन इत्यतः नास्ति 'स एनान्ब्रह्मगमयति' इत्यत्र प्रतीकोपासकानां ग्रहणम् इति आशङ्क्येत तर्हि अत्राऽपि इदमेव वक्तव्यम् ;

यदि 'ये चामी अरण्ये श्रद्धासत्यमुपासते' इतिवाक्ये प्रतीकोपासकानां ग्रहणं न स्यात्, तदा तेषां कर्मप्राप्य धूमादिमार्गस्य अभावात् अर्चिरादिमार्गाभावात्तृतीय- मार्गप्राप्तिः स्यात्, सा तु नेष्टा इत्यतः अवश्यम् अर्चिरादिमार्गसम्बन्धः तेषां कल्पनीय एव इत्यतः 'ये चामी अरण्ये' इति वाक्ये प्रतीकोपासकाः अपि ग्राह्या एवेति, तानपि अमानवः पुरुषः ब्रह्मलोकं गमयत्येव ।

**सिद्धान्तः**

एवं पूर्वपक्षेप्राप्ते सिद्धान्ता सूत्रम् आरब्धं भगवता बादरायणेन 'अप्रती- कालम्बनान्नयतीति बादरायणः उभयथा चाऽदोषात्तत्क्रतुश्च'१० इति । प्रतीकम् आलम्बनं येषां ते प्रतीकालम्बनाः प्रतीकोसकाः इति यावत् । तद्व्यति- रिक्तसगुणविद्या पराः अप्रतीकालबनाः , तानेव अमानवः पुरुषः ब्रह्मलोकं नयति इति बादरायणः आचार्यः मन्यते ।

**ननु** अमानवः पुरुषः प्रतीकोपासकान् एव नयति न अन्यान् इति उभयथाभावे अनियमाधिकरणसिद्धान्तविरोधः भवति खलु इति चेत् 'अनियमः सर्वासां अविरोधः शब्दानुमानाभ्याम्' इति सूत्रे सर्वशब्दस्य प्रतीकोपासना व्यति- रिक्तपरत्वम् अङ्गीक्रियते । तथा च निर्गुणविद्याप्रतीकोपासन व्यतिरिक्तासु सर्वासु सगुणविद्यासु देवयानाख्या गतिः भवति इति । अयमेवार्थः उभयथा चाऽदोषात् इति सूत्रभागेन प्रदर्शयितुमिष्टः ।

**ननु** एतादृशोभयथाभावकल्पने किं प्रमाणम् इति चेत्तत्क्रतुन्याय एव प्रमाणम् । 'तं यथायथा उपासते तदेव भवति', 'यथाक्रतुरस्मिन्नलोके पुरुषो भवति तथेतः प्रेत्यभवति सक्रतुं कुर्वीत'११ इत्यादि श्रुत्यनुसारेण 'यः यत्ध्यायति स एव तत्भवति' इति सिद्ध्यन्न्यायः तत्क्रतुन्यायः इति प्रसिद्धम् । तथा च ब्रह्मोपासनं यः करोति स एव ब्रह्मलोकं गच्छति ब्राह्मम् ऐश्वर्यम्च आप्नोति इति सिद्ध्यति । नामादि प्रतीकोपासनेषु नामादीनामेव

ध्येयत्वात्नतेषां ब्रह्मलोकप्राप्तिः भवितुमर्हति । **ननु** 'नाम ब्रह्मेत्युपासीत' इति वाक्यविहितोपासने नाम्नि ब्रह्मदृष्टेः क्रियमाण त्वात्ब्रह्मोपासनमेव इदम् इति चेन्ननामादिप्रतिकोपासनेषु ब्रह्मदृष्टेः क्रियमा-णत्वेऽपि ब्रह्मणः नाम प्रतीकविशेषणत्वेनैव ध्यानविषयत्वं नतु विशेष्यत्वेन, प्रतीकोपासनेषु प्रतीकानामेव विशेष्यत्वम् इति नामादिप्रतिकोपासनानां ब्रह्मक्रतुत्वं नास्ति । तदुक्तं भामत्याम्; 'आश्रयान्तरप्रत्ययस्य आश्रयान्तरे प्रक्षेपः प्रतीकः इतिवृद्धाः'१२ इति । इदमेव प्रतीकोपासनं अध्यासपदेन निर्दिश्य पञ्चपादिकाविवरणे उक्तम्; 'अध्यासस्तु मन । आदित्यादौ ब्रह्मदृष्ट्या उपासनम्'१३ इति । उक्तञ्च तत्रैव; 'अध्यासे तु आलम्बनस्यैव प्राधान्येन अनुचिन्तनम्'१४। अत्र प्राधान्यम् इत्यनेन विशेष्यत्वंविवक्षितम् । आलम्बनम् इत्यनेन प्रतीकं विवक्षितम् । तथा च प्रतीकोपासनेषु प्रतीकस्यैव विशेष्यत्वम् इत्युक्तं भवति । एवकारेण प्रतीकभिन्नस्य विशेष्यत्वं वार्यते । तथा च 'नाम ब्रह्मेत्युपासीत' इत्यादौ ब्रह्मणः प्रतीकविशेषणत्वात्नतत्ब्रह्मोपासनम्किन्तु नामरूपप्रतीकोपासनम् ।

**ननु** 'नाम ब्रह्मेत्युपासीत' इत्यत्र ब्रह्मणः प्राधान्यं नास्तीति कथमवगतम् इति चेत्ब्रह्मशब्दस्य इति शब्दशिरस्कत्वात् इति ब्रूमः । तदुक्तं कल्पतरौ 'ब्रह्मशब्दस्य इति शब्दशिरस्कत्वेन ब्रह्मणः अप्रधानत्वावगमात्'१५ इति ।

**ननु** अब्रह्मोपासकानाम् अपि पञ्चाग्निविद्यया ब्रह्मलोकप्राप्तिः फलं श्रूयते ; 'स एनान्ब्रह्म गमयतीति' इति चेत्सत्यम्तत्क्रतुन्यायस्य औत्सर्गिकस्य प्रत्यक्ष -वचनात्यद्यपि पञ्चाग्निविद्यायां बाधस्तु अङ्गीकर्तव्यः तथाऽपि 'नाम ब्रह्मेत्युपासीत' इत्यादि स्थले बाधकवचनं नास्तीति इति न तदुपासकानां ब्रह्मलोकप्राप्तिः सम्भवति । तथा च असतिबाधके ब्रह्मोपासकाः एव ब्रह्म- लोकं गच्छन्ति । तदुक्तं भामत्याम् ; 'तं यथा यथा उपासते तदेव भामती इति श्रुतेः औत्सर्गिक्याः नासतिविशेषवचने अपवादो युज्यते ।'१६ इति ।

**ननु** तर्हि प्रतीकोपासकानां धूमादिमार्गस्य अर्चिरादिमार्गस्य च अभावात्तृतीय- मार्गप्राप्तिः स्यात्खलु इति चेन्नप्रतीकोपासकानपि अर्चिरादिमार्गेण गमनं अङ्गीक्रियते एव परन्त्तु अर्चिरादिद्वारा तेषां विद्युल्लोकपर्यन्तमेव गमनं अङ्गीक्रियते ततः अमानवपुरुषास्तु एनं ब्रह्मलोकं न गमयन्ति ।

तथा च नास्ति तृतीयमार्गप्राप्तिः प्रतीकोपासकानाम् । तदुक्तं परिमले; "एवं च प्रतीकोपासकानाम् अर्चिरादिमार्गेण विद्युल्लोकपर्यन्ता गतिः समाना । अमानवपुरुषस्तु तान्ननयतीति शेषः । अतः एव अप्रतीकालम्बनान्नयतीति सूत्रे नयनविशेषः उक्तः नार्चिरादिगतौ"१७ इति । तथा चायं निर्गलितार्थः ; अनियमाधिकरणन्यायविरोधपरिहाराय तन्न्यायस्य यत्प्रतीकोपासनातिरिक्तविषयत्वमुक्तं तदपि ब्रह्मप्राप्त्यं शमादाय उक्तम् । अयमाशयः अनिमयाधिकरणे निर्गुणविद्याव्यतिरिक्तासु विद्यासु अर्चिरादि मार्गसम्बन्धः यः स्थापितः सः तथैव इति प्रतीकोपासकानामपि अर्चिरादि मार्गसम्बन्धः अस्त्येव । परन्तु अर्चिरादिमार्गसम्बन्धित्वेपि विद्द्युल्लोकं प्राप्तानां न ब्रह्मप्राप्तिः इत्यर्थः । तथा च 'अनियमः सर्वासां अविरोधः शब्दानुमानाभ्याम्' इतिसूत्रे सर्वशब्दस्य प्रतीकोपासनाव्यतिरिक्तपरत्वमपि न वक्तव्यम् इति भाति ।

## द्वितीयसूत्रार्थः

'विशेषं च दर्शयति' इति अस्य अधिकणस्य द्वितीयं सूत्रम् । प्रतीकोपासकानां ब्रह्मप्राप्तिः न भवतीत्यत्र हेत्वन्तरम् अनेन सूत्रेण उच्यते । 'नाम ब्रह्मे- त्युपासीत' नामवागादि प्रतीकोपासनेषु पूर्वपूर्वोपासनापेक्षया उत्कृष्टं फलम् उत्तरोत्तरोपासकानां सम्भवतीति श्राव्यते । 'यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति'१८ 'वाग्वावनाम्नोभूयसी'१९ 'यावद्वाचोगतं तत्रास्य यथा- कामचारो भवति'२० 'मनोवाव वाचोभूयः'२१ इत्यादिना । तथा च यस्मात् उपासनाफलानाम् उत्कर्षापकर्षवत्वमस्ति तस्मादेव इदं निश्चीयते यत् एतेषाम् उपासनानां ध्येयं वस्तु ब्रह्म न भवति इति । तथाहि फले उत्कर्षापकर्षभावः हेतुप्रयुक्तः इति वक्तव्यम्; हेतूपचयापचयव्यतिरेकेण फले उत्कर्षापकर्षभावस्य निरूपयितुमशक्यत्वात् । हेतुश्च प्रकृते उपासनं, तत्र च यदि उपचयापचयौ निरूप्य वैलक्षण्यं सम्पादनीयम्तर्हि तदुपासनस्य विषयमादयैव वक्तुं शक्यते । यदि एतेषाम् उपासनानां ब्रह्मैव विषयः

स्यात्तर्हि ब्रह्मणः एकरूपत्वात्, तदुपासनरूपहेतौ उपचयापचययोः अभावेन वैलक्षण्यं न सम्पादयितुं शक्यते फले तारतम्यं न उपपादयितुं शक्यते । प्रतीकानां ध्येयत्वे तु तद्गतोपचयापचययोः सद्भावात्फले तारतम्यम् उपपादयितुं शक्यते ।

**सङ्गतिः**

अस्य अधिकरणस्य श्रुत्यर्थनिर्णायकत्वात् अस्ति श्रुति सङ्गतिः। चतुर्थाध्यायः फलाध्यायः । अस्मिन् अध्याये ज्ञानोपासनयोः यत्फलं मोक्षः ब्रह्मलोकश्च तत्सम्बन्धीविचारः प्रवर्तते ।

अस्मिन् अधिकरणे ब्रह्मोपासनानां ब्रह्मलोकरूपं फलं के प्राप्नुवन्तीति फलसम्बन्धिविचारस्य क्रियमाणत्वात् अस्ति अध्यायसङ्गतिः । इतः प्राक्प्रवृत्तम् अधिकरणम्कार्याधिकरणम् । तस्मिन्च अधिकरणे 'स एनान्ब्रह्म गमयतीति' इदमेव वाक्यं विषयीकृत्य उपासकाः कार्यं ब्रह्म गच्छन्ति वा उत निर्गुणं ब्रह्म इति विचारम्कृत्वा ब्रह्मोपासकाः निर्गुणं ब्रह्मैव गच्छन्तीति पूर्वपक्षं प्रदर्श्यकार्यं ब्रह्मैव गच्छन्तीति निर्णयः कृतः । तथा च पूर्वाधिकाणे उपासकानां गन्तव्यं स्थानं निर्णीतम् इत्यर्थः । गन्तव्यनिर्धारणे जाते तत्र गान्तारः के इति जिज्ञासितं भवतीति प्रसङ्गसङ्गत्या अप्रतिकालम्बनाधिकरणं प्रवृत्तम् इत्यतः अस्त्यत्र अधिकरणसङ्गतिः ।

**अधिकरणस्य फलम्**

'स एनान्ब्रह्म गमयति' इत्यत्र एतच्छब्देन प्रतीकोपासकानामपि ग्रहणम् इति निर्णये सर्वेषाम् उपासकानां ब्रह्मलोकप्राप्तिः इति पूर्वपक्षेफलं सिद्ध्यति, सिद्धान्ते विशेषवचनाभावे ब्रह्मोपासकानामेव ब्रह्मलोकप्राप्तिः भवति इति पूर्वपक्षसिद्धान्तयोः फलभेदः ।

**अधिकरणन्यायः**

एतदधिकरणन्यायः एवं प्रदर्शितः शारीरकन्यायसङ्ग्रहे; 'पितृयाणतृतीयस्थानसम्बन्धहीनत्वात्प्रतीक-विशेषणत्वेन ब्रह्मणोऽप्युपास्यत्वात् 'ये चामी अरण्ये श्रद्धां सत्युपासते' इति वाक्येन तेषामप्युपादानात् 'स एनान्ब्रह्म गमयति' इत्येतच्छब्देन प्रतीकालम्बनानामपि परामर्शसिद्धेः तानपि ब्रह्म गमयतीति प्राप्तम्; तत्र च ब्रह्मदृष्टिविशिष्टप्रतीकानामेवोपास्यत्वात् 'ये चामी अरण्ये' इतिवाक्येन परामर्शाभावात्फलान्तरनिर्देशाच्च परिशेषात् अर्चिरादिसम्बन्धः न वाक्येन; ततश्च ये चामी अरण्ये' इतिवाक्योपात्तप्रकृपरामर्शकेन 'स एतान्' इत्येतच्छब्देन प्रतीकानामपरामर्शात्विद्युत्पर्यन्तमेवै तेषां गमनमिति स्थितम् ।।' इति ।

**निगमनम्**

'स एनान्' ब्रह्म गमयति इति वाक्ये ब्रह्मोपासकानामेव ग्रहणम् इति अनेन वाक्येन ब्रह्मोपासकानामेव ब्रह्म लोकप्राप्तिः अवगम्यते । अर्चिरादि गतसम्बन्धस्तु प्रतीकोपासकानां विद्द्युल्लोकपर्यन्तम् अस्त्येव । यस्य च प्रतीको- पासनस्य प्रकरणे विशेषवचनात्ब्रह्मलोकप्राप्तिः फलम् अवगम्यते तदुपाकानां तु ब्रह्मलोकप्राप्तिः भवत्येव ।

**सन्दर्भग्रन्थाः**

१. ब्रह्मसूत्रशाङ्करभाष्यम्रत्नप्रभासमन्वितम् – द्वितीयः भागः, काशीसंस्कृतग्रन्थमाला - ७१, चौखम्बासंस्कृतसंस्थान,
२. भामतीकल्पतरुपरिमलैः उपबृंहितम्ब्रह्मसूत्रशाङ्करभाष्यम्, निर्णयसागर मुद्रणालयः, मुम्बै, १९३८
३. Brahmasūtraśāṅkarabhāṣyam with commentary brahmavidyā bharaṇam, The Samskrit education Society, Mylapore, Madras, 1979
४. प्रकटार्थविवरण-भाष्यभावप्रकाशिका-न्यायनिर्णय-शारीरकन्यायसङ्ग्रहैः समन्वितं शारीरकमीमांसाभाष्यम्, अद्वैत ग्रन्थरत्नमञ्जूषा ४७-रत्नम्, श्रीदक्षिणामूर्तिमठ प्रकाशनम्, वाराणसी, २००२

****************

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# संस्कृतसाहित्ये अलङ्कारस्य स्थानम्

**Dr. Bheemanaik S**
Asst. Professor,
Karnataka Samskrit University
Bangalore, Karnataka

कवेः कर्म एव **'काव्यम्'** इति मनीषिणः । तत्र कविः स्वकर्मवशाद् एव कविः इति अभिधानं भजते । श्रेष्टकवौ सति काव्यं च श्रेष्टं भवति । तस्मात् रसभावरूपादियुक्तस्य अर्थतत्वस्य गुणान्वितवाणिः अलौकिकप्रतिभया वैशिष्ट्यं प्रकटीकरोति ।

साङ्गाः वेदाः इतिहासश्च प्रकारद्वयं च अस्माकं भारतास्य साहित्यवृक्षस्य मूलम् । वेदेतिहासेभ्य एव ज्ञानवाहिनी निरन्तरेण प्रवहति । 'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते' इति खलु गीतोक्तिः । अतः ज्ञानस्य विभागः अस्माकं पूर्वजाः कृतः । शास्त्राध्ययनसौकर्याय विद्यापि द्विविधा विभक्ता, परा–अपरा चेति । एका परा ब्रह्मविषयिणी, द्वितीया तु लौकिकी । उभयेपि विद्ये सेव्ये । प्रस्तुतस्तु अलंकारः अपरा विद्यायाः विषयः।

अलङ्कारशब्दस्तु वेदोपनिषत्स्वपि सुप्रसिद्धः प्रतिभाति । मुनेः भरतस्य नाट्यशास्त्रे शुद्दालङ्काररुपेण चत्वरोअलङ्काराः एव निर्दिष्टाः ते च

**उपमा रुपकं चैव दीपकं यमकं तथा ।**
**अलङ्कारास्तु विजेयाक्ष्चत्वारो नाटकाश्रयाः ॥ नाट्यशास्त्रे .१७. ४२.**

अलङ्कारशास्त्रे काव्यस्वरुपरसदोषगुणरीत्यलङ्काराणामपि निरुपणीयत्वे अस्यालङ्कारनाम्नैव व्यपदेशस्य बीजं तत्वतः प्रच्छन्नमस्ति । तथापि अलङ्क्रियते अनेनति करणव्युत्पत्तिनिष्पन्नो यमकोपमादिबोधको नायमलङ्कारशब्दः किन्तु 'अलङ्कृतिरलङ्कारः । इति भावव्युत्पन्नो दोषापगमगुणालङ्कारसंवलनकृतसौन्दर्यपरः। अत्र मानन्तु "काव्यं ग्राह्यमलङ्कारत्" सौन्दर्यमलङ्कारः सदोषगुणालङ्कारहानोपादानाभ्याम् इत्यादि वामनसूत्रमेव ।

अलङ्कारशास्त्र भवः अलङ्कारिणा उदयति भामः, दण्डी, वामनः, उद्भट, रूद्रट, आनन्दवर्धन, कुन्तकः भोजः, मम्मटादि अनेकानाम् आलङ्कारिकाणां परिचयः अस्ति, परन्तु जयदेवेन "चन्द्रालोक नामके ग्रन्थे एकस्यामेव कारिकायामलङ्काराणां लक्षणं, तथोदाहरणं च निरुप्यैक सरलो नूतनश्च मार्गः आविष्कृतः। अस्मिन्नलङ्कारशास्त्रे तमेव मार्गमश्रित्य महाविदुषा अप्पय्यदीक्षितेनापि कुवलयान्द नामा ग्रन्थो व्यरचि । अयं च ग्रन्थोलोकक्रियायाः अलङ्कारविषयकसामान्यहारन् र्धकक्ष्चेति समेषां जनानां मनोपीगधिरुढतया प्रभ्रजत ।

**उपमालङ्कारः-**

**उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः । हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते ॥**

यत्र तस्मिन् काव्ये द्वयोर्वतुनोरुपमानोपमेयत्वेन प्रसिद्दयोःसादृश्यस्य लक्ष्मीः संपत, स™दय™दयाह्लादि सादृश्यमित्यर्थः,उल्लसति उद्भततया स्पष्टं प्रकाशते सा तथाभासमाना सादृश्यलक्ष्मीरुपमा इति लक्षणम् । हे कृष्ण ते तव कीर्तिः हंसीव स्वर्गङ्गामाकाशगङ्गामवगाहते इत्यदाहरणम् ।अत्र कीर्तिहंस्योः सादृश्यलक्ष्मीः स्पष्टं प्रकाशत इत्युपमालङ्कारः ।

उपमायाः सन्ति चत्वारोअवयवाः उपमानम्, उपमेयम्, साधारणधर्मः, उपमावाचकक्ष्चेति । तत्राधिकगुणवत्वे प्रसिद्दमुपमानं चन्द्रादि । प्रकृते वर्ण्यमानं मुखाद्युपमेयं न्यूनगुणम् ।अह्लादकत्वादिकं साधारणो धर्मः ।इवादि शाब्दाः सादृश्यवाचकाः ।सादृश्यं च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् ।

**अनन्वयालङ्कारः –**

**उपमानोपमेयत्वे यदेकस्यैव वस्तुनः । इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः ॥**

एकस्यैव वस्तुनः यदुपमानत्वमुपमेत्वं च विवक्ष्यते तदनन्वयालङ्कारः । स्वस्य स्वेनैव सादृश्यं नान्वेतीत्यनन्वयसंना । तथावर्णनस्य प्रयोजनं सदृशवस्त्वरव्यवच्छेदे–नापमत्वद्योतनम् । उपमायां द्वयोःसादृश्यवर्णनमत्र त्वेकस्य तेनैवेति भेदः ।

इन्दुरिन्दुरिव श्रीमानित्यत्र इन्दोरेकस्यैवोपमानत्वमुपमेयत्वं च वर्णितमित्यनन्वयालङ्कारः ।

**उल्लेखालङ्कारः –**

**बहुभिर्बहुधोल्लेखादेकस्योल्लख इष्यते । स्त्रीभिः कामोअर्थिभिः स्वर्दुः कालः शत्रुभिरैक्षि सः ॥**

यत्र नानाविधधर्मयोगि एकं वस्तु तत्तद्धर्मयोगरुपनिमित्तभेदेन अनेकेन ग्रहीत्रा अनेकधा उल्लिख्यते । तत्र उल्लेखः। अनेकधा उल्लेखने रुच्यर्थित्वभयादिकं यथार्ह प्रयोजकम्। रुचुरभिरतिः ।अर्थित्वं लिप्सा । स्त्रीभिः इत्याद्युदाहरणम् ।अत्र एक एव राजा सौन्दर्य वितरण पराक्र शालीति कृत्वा स्त्रीभिः अर्थिभिः प्रत्यर्थिभिश्च रुच्यर्थित्वभयैः काम कल्पतरु कालरुपो दृष्टः।

**तुल्ययोगितालङ्कारः–**

**वर्ण्यानामितरेषां वा धर्मैकयं तुल्ययोगिता । सङ्कुचन्ति सरोजानि स्वैरिणी वदनानि च ॥**

प्रस्तुतानाम् अप्रस्तुतानां वा गुणाक्रियारुपैकधर्मान्वयस्तुल्ययोगिता ।सङ्कुचन्तिति प्रस्तुत तुल्ययोगिताया उदाहरणम् ।तत्र प्रस्तुतचन्द्रोदय कार्यतया वर्णनीयानां सरोजानां प्रकाशभीरु स्वैरिणी वदनानां च सङ्कोचरुपैकक्रियान्वयो दर्शितः । उत्तरश्लोके नायिका सौकुमार्यवर्णने प्रस्तुते अप्रस्तुतानां मालत्यादीनां कठोरतारुपैकगुणान्वयः ।

**प्रतिवस्तूपमालङ्कारः–**

**वाक्ययोरेकसामान्ये प्रतिवस्तुपमा मता । तापेन भ्रजते सूरः शूरश्चापेन राजते ॥**

यत्र उपमानोपमेयवाक्ययोः एकः समानो धर्मः पृथङ् निर्दिश्यते सा प्रतिवस्तुपमा ।प्रतिवस्तु प्रतिवाक्यार्थम् उपमा समानधर्मोअस्याम् इति व्युत्पत्तेः । यथा अत्रैव भ्रजते राजते इति एक एव धर्मः उपमानोपमेयवाक्ययोः पृथग् भिन्नपदाभ्यां निर्दिष्टः ।

कुवलयानन्दकारेन स्वकृतिषु शुभाशुभकुनानां यथास्थानं सम्यग्वर्णनं कृतं विद्यते । आनन्देन स्पष्टतया वत्कुं शक्यते यत् कुवलयानन्दकरः संस्कृतसाहित्यस्य अद्वितीयजाज्वल्यमान नक्षत्र इव वर्तते । प्रमुखः अलङ्कारः उपमा, अनन्वय, उल्लेख, तुल्ययोगित, प्रतिवस्तुपमलङ्कारः। एते अप्पतदिक्षितनुसारेन प्रमुक अलङ्कारः । अयं प्राचीनभारतीयेतिहासस्य अन्तरात्मप्रतिनिधिरस्ति । एतत्कृतिषु अस्माकं संस्कृतेः प्राणं संरक्षितं वर्तते ।

*******

**सन्दर्भसूची**

१. अलङ्कारशास्त्रस्येतिहासः
२. संस्कृतसुगन्धः
३. साहित्यदर्पणः
४. काव्यालङ्कारसूत्रवृत्तिः
५. काव्यप्रकाशः

**Dr. Bheemanaik S**
Asst. Professor
Karnataka Samskrit University
Pampa Mahakavi Road
Chamarajapet, Bangalore- 560018
Karnataka, India
Mob: 7795634009
Email Id: beema87naik@gm

********

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# यङ्लुक् विचारः

**-S. Srinivasan**
Ph.D. Research Scholar
The Madras Sanskrit College
Mylapore, Chennai, Tamil Nadu.

**सङ्ग्रहः-**

व्याकरणशास्त्रे वैय्याकरणसिद्धान्तकौमुद्यां यङ्लुक्-प्रकरणे 'यङ्' प्रत्ययस्य लुकि सति क्रियमाणानि - यङ्लुकि प्रत्ययाश्रयणम्, यङन्तस्य धातु- त्वारोपणम्, यङ्लुगन्तस्य परस्मैपदत्वारोपणम् इत्यादीनि विशेषकार्याणि आक्षेप -समाधानसहितमत्र यथामति सङ्ग्रहेण विचार्यते । अत्र यङ्लुगन्तस्य प्रयोगः भाषायां न इति केषाञ्चन अभिप्रायः। केचित्तु-

"दाधर्ति-दर्धर्ति-दर्धर्षि-बोभूतु- तेतिक्तेऽलर्ष्याऽऽपनीफणत्- संस-निष्यदत् - करिक्रत्- कनिक्रदद्-भरिभ्रद्-दविध्वतो-दविद्युतत् तरित्रतः सरीसृपतं वरीवृजन् मर्मृज्याऽऽगनीगन्तीति च" (७-४-६५) इति सूत्रे "बहुलं छन्दसि" इत्यतः छन्दसीत्यनुवर्त्य छन्दस्येव गुणाभावविधानात् यङ्लुगन्तस्य भाषायामपि प्रयोगो युक्त एव इति वदन्ति । अस्मिन् निबन्धे पूर्वोक्ताः विषयाः इदानीं स्पष्टी क्रियन्ते ।

पाणिनीयाष्टाध्याय्यां द्वितीयाध्याये चतुर्थपादे चतुःसप्ततितमं सूत्रं "यङोऽचि च" इति । अत्र यङः, अचि, च इति पदच्छेदः । पदत्रयात्मकं सूत्रमिदम् । अस्मिन् सूत्रे "ण्यक्षात्रियार्षञितोयूनि-लुगणिञोः"(२-४-५८) इत्यतः'लुकि' इति अनुवर्तते । अत्र सूत्रे विद्यमानेन 'अचि' इत्यनेन 'अच्' प्रत्ययः गृहयते, न तु अच्प्रत्याहारः । कथमिति चेत् - यङः इति 'यङ्' प्रत्ययेन अचः साहचर्यात् । एवम् अस्मिन् सूत्रे विद्यमानेन चशब्देन "बहुलं छन्दसि"(२-४-७३) इति पूर्वसूत्राद्बहुलग्रहणमप्यनुकृष्यते । तथा सति-यङोऽच्प्रत्यये परे लुक् स्यात्, चकारात्तं विनापि (अच्प्रत्ययपरत्वाभावेऽपि) बहुलं लुक् स्यादिति सूत्रार्थो लभ्यते ।

अत्र बहुलशब्दस्य –

"क्वचित्प्रवृत्तिः कवचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ।
शिष्टप्रयोगाननुसृत्य लोके विज्ञेयमेतद्बहुलग्रहे तु ॥" इत्यर्थः ।

अत्र प्रकृते बहुलग्रहणेन प्रवृत्तिरिष्यते । इदानीं यो धातुः एकाच् , हलादिश्च भवति तस्माद्धातोः पौनःपुन्ये, समाहारे च द्योत्ये यङ्प्रत्ययः स्यादित्यर्थक "धातोरेकाचो हलादेः क्रियासमभिहारे यङ्" (३-१-२२) इति सूत्रेण प्रकृते, भूधातोः एकाच्कत्वात्, हलादित्वाच्च तस्मात् यङ्-प्रत्ययो भवति ।

यङि कृते -भू + यङ् इति जाते, इदानीं सन्नन्तस्य यङन्तस्य च प्रथमैकाचो द्वे स्तः, अजादेस्तु द्वितीयस्य इत्यर्थक "सन्यङोः"(६-१-९) इति सूत्रेण 'भू' धातोः द्वित्वं प्राप्तम्, एवञ्च "यङोऽचि च"(२-४-७४) इति प्रकृतसूत्रेण यङः लुक् च प्रात्यते ; तथा सति "यङोऽचि च" इति सूत्रापेक्षया "सन्यङोः"(६-१-९) इति सूत्रस्य परत्वात् "विप्रतिषेधे परं कार्यम्"(१-४-२) इति नियमात् द्वित्वमेव प्रथमं कर्तव्यम्, तदनन्तरं यङः लुक् खलु? इति चेत् - तथा न । प्रथमं यङ्लुगेव प्रवर्तते । कथमिति चेत् - "सन्यङोः"(६-१-९) इत्यस्य यद्यपि परत्वमस्ति, परन्तु तत्र द्वित्वं प्रति 'यङ्' इति बहिर्भूतः प्रत्ययः आवश्यको भवति ।

किन्तु यङ्लुक् तु अच्परत्वाभावेऽपि सम्भवति इत्यतःयङ्लुक् तु अनैमित्तिकत्वात् अन्तरङ्गो भवति । अतः "परनित्यान्तरङ्गापवादाना- मुत्तरोत्तरं बलीयः" इति परिभाषया परापेक्षया अन्तरङ्गस्य बलीयस्त्वात् "सन्यङोः" इति द्वित्वं बाधित्वा "यङोऽचि च" इति यङ्लुगेव प्रथमं प्रवर्तते, अन्तरङ्गत्त्वात्, तदनन्तरं द्वित्त्वं भवति ।

**अभ्यासकार्यम् -**

"भू" धातोः यङः लुकि कृते इदानीं भूधातोः प्रत्ययलक्षणम् आश्रित्य द्वित्त्वे कृते 'सन्यङोः' इत्यनेन भू +भू +य इति जाते, अभ्यासे झलां जशः , खयां चरः स्युरित्यर्थक "अभ्यासे चर्च" इति सूत्रेण प्रकृते अभ्यासस्य

जश्त्वं क्रियते । जश्त्वे सति बू +भू + य इति जाते अभ्यासस्य गुण: स्यात् यङ्यङ्लुको: इत्यर्थक "गुणो यङ्लुको:" (७-४-८२) इति सूत्रेण प्रकृते भूधातो: यङ्लुगन्तत्वात् अभ्यासस्य गुणे कृते बो भू य इति भवति ।

**यङन्तस्य धातुत्वारोपणम् -**

इदानीं भूधातो: प्रत्ययलक्षणेन यङन्तत्वात् , सनादय: कर्मेर्णिङन्ता: प्रत्यया: अन्ते येषां, ते धातुसंज्ञाः स्यु: इत्यर्थक "सनाद्यन्ता धातव:" (३-१-३२)इति सूत्रेण यङन्तस्य धातुसंज्ञा विधीयते । अत: प्रकृते यङन्तस्य धातुत्वात् -लडादय: दशलकारप्रत्यया: भवन्ति ।

"सन्-क्यच्-काम्यच्-क्यङ्-क्यषोऽथ आचार क्विब् -णिच्यङो तथा ।
यगाय ईयङ् णिङ् चेति द्वादशामी सनादय:" ॥ - एते सनादय: ।

**अत्र प्रश्न: -**

ननु, अत्र यङ: "यङोऽचि च"(२-४-७४) इति लुका लुप्तत्वेऽपि, प्रत्ययलक्षणमाश्रित्य यङन्तत्वात् "सनाद्यन्ता धातव:" इत्यनेन यङन्तस्य धातुसंज्ञायां लडादय: लकारप्रत्यया: क्रियन्ते, तत्कथं सम्भवति? लुक्, श्लु, लुप् एते लुमन्त: । अत: लुमताशब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यादित्यर्थक "न लुमताङ्गस्य" (१-१-६३) इति सूत्रेण तन्निषेधो भवति खलु? इति ।

**समाधानम्-**

तत्र समाधानमुच्यते - प्रत्ययपरत्वन्निमित्तीकृत्य अङ्गकार्यं यदा क्रियते तदानीमेव "न लुमताङ्गस्य" इति प्रतिषेध: प्रवर्तते; अत्र तु प्रत्ययान्तस्य यङन्तस्य द्वित्वं, धातुसंज्ञा च विधीयते इत्यत: अत्र "न लुमताङ्गस्य" इति विधिर्न प्रवर्तते । अत: यङन्तस्य धातुसञ्ज्ञा भवत्येव ।

**यङ्लुगन्तस्य परस्मैपदत्वारोपणम् -**

सम्प्रति यङन्तस्य धातुसञ्ज्ञायां सति यङः ङित्वात् यङन्तस्य धातो: अनुदात्तेत: उपदेशे यो ङित् तदन्ताच्च धातो: लस्य आत्मनेपदं स्यादित्यर्थक "अनुदात्तङित आत्मनेपदम्" (१-३-१२) इति सूत्रेण आत्मनेपदं प्राप्तम् । परन्तु, तं बाधित्वा यङ्लुगन्तात् परस्मैपदं विधीयते । कथमिति चेत् - 'ऋति' इति सौत्रो धातु: । तस्मात् "रीयङ्" आदेशो विधीयते स्वार्थे "ऋतेरीयङ्" (३-१-२९) इति सूत्रेण तत्र रीयङः ङित्त्वात् "अनुदात्तङित आत्मनेपदम्"(१-३-१२) इति सूत्रेण आत्मनेपदं विधीयते।

एवं "शीङ् स्वप्ने" इति धातु:तत्र शीङ: ङित्त्वात् तत्रापि "अनुदात्तङित आत्मनेपदम् " इत्यनेन 'शीङ्' धातोः आत्मनेपदं विधीयते । यत्र प्रत्ययस्य असाधारणं रूपम् आश्रीयते तत्रैव प्रत्ययलक्षणस्य सत्त्वात्, "अनुदात्तङित आत्मनेपदम्" इत्यत्र ङित्त्वस्य प्रत्ययाप्रत्यसाधरणत्वेन विवक्षिततत्वात् ङित्त्वप्रयुक्तं यदात्मनेपदं तत्तु यङ्लुकि सति न प्रवर्तते। अत: यङ्लुगन्तस्य धातो: आत्मनेपदं न । परस्मैपदमेव भवति ।

अत: प्रकृते यङ्लुगन्तस्य भूधातो: परस्मैपदे बो भू ति इति जाते, "कर्तरि शप्" इत्यनेन शपि, शपः लुकि "सार्वधातुकार्धधातुकयोः" (७-३-८४) इत्यनेन अङ्गस्य गुणे बो भो ति इति जाते, यङन्तात् परस्य हलादेः पितः सार्वधातुकस्य ईड् वा स्यात् इत्यर्थक "यङो वा" इति सूत्रेण ईडागम: भवतीति पक्षे, अवादेशे बोभवीति इति रूपं, ईडागमाभावे 'बोभोति' इति च रूपं सिद्ध्यति। अस्य पुनःपुनः उत अतिशयेन भवतीत्यर्थ: ।

**-S. Srinivasan**
Ph.D. Research Scholar
The Madras Sanskrit College
Mylapore, Chennai-600004,
Tamil Nadu.
Mobile N0. : **7502117835**
E-mail : srinivanasvedha@gmail.com

*************

Journal of Veda Samskrita Academy, ISSN 2250-1711
Volume XVIII : July to December – 2021

# पिण्डोत्पत्तिप्रकरणम्

**Dr. Siddappa B. Kareppagola**
Research Scholar
Karnataka Samskrita University, Bengaluru

१पिण्डश्च उत्पत्तिश्च पिण्डोत्पत्तिः । पिण्डस्य उत्पत्तिः पिण्डोत्पत्तिः । यत् पिण्डः उद्धूयते तत् पिण्ड इति कथ्यते । पीड्यते उद्धूयते इत्यपि च वक्तुं शक्यते । अनेके वनस्पतयः अस्यां वसुन्धरायां उत्पद्यन्ते । तैः एषा जीवजन्तुनां प्राणिपक्षिभ्यः रसवती भविष्यति । जीवजन्त्वपि रसास्वाधनं कुर्वन्ति । तेऽपि ब्रह्मचारिस्वरूपेण व्यवह्नीयन्ते तेषां वीर्यः निष्कलनो भवति । तेषां मिथुनक्रियाप्रकृतिगतरूपेण वर्तते । तथैव वीर्यरजः विषयसुखात्मकः सन्तानप्राप्तिरेव भवति । एवं च प्रजोत्पादनकार्येषु मानवः संयमितो भूत्वा ऋतुकाले एव मिथुनक्रियासु सतिपत्योः भविष्यति चेत्तदपि ब्रह्मचारि इति व्यवहारः प्रचलति । एकवारेण संभोगेन गर्भधारण भवति इति निश्चयेन वक्तुं न शक्त्यते । कारणं किमिति चेत्भावजन्यकामादिविकार- संस्कारः पुनः पुनः भूत्वा तेन कामाश्रित्यकामाग्निश्च तप्तवीर्यकणाः दुर्बलो भवन्ति । तथा च गर्भधारणपर्यन्तं यदा तदा मिथुनक्रियावश्यकमिति ज्ञेयम् । ऋतुकालः अत्यन्तसुसमयः महत्वं च भवति । समान्यतः रजस्वलानन्तरं षोडशरजनिपर्यन्तं ऋतुकालमित्युक्तम् । 'समानशीलेषु व्यसनेषु सख्यम्' एवं प्रकारेण स्त्रीपुरुषयोः सम्भोगक्रियावश्यकं अपेक्षते । संभोगक्रियान्तु, रात्रौ सूक्तमिति सामान्यतः ज्ञेयम् । वीर्याधिक्यं भवति चेत्पुरुष पुल्लिङ्गो भवति । रुधिराधिक्यं भवति चेत्स्त्रीलिङ्गो भवति । शरीरे लिङ्गभेदः दृश्यते । तेनैव स्वरभेदः गमनागमनभेदः । कुचद्वौ च भेदः । नखशिखभेदः । अशनव्यसन भेदः । तथैव वेषभूषणानि च भेदो दृश्यन्ते । शेषे२ द्वयोः समानः दृश्यते एव । किञ्चित्बलदुर्भलमपि शरीरे भेदो दृश्यते इति केचनाहुः ।

आत्मनस्तु एकैव स्त्रीपुरुष उपाधिना व्यवहारः लिङ्गभेदेन परिवर्तते । अन्यद्- निद्राक्रीडाहार गृहणधारणपटुत्वादयः समानः दृश्यन्ते । पुरुषभुक्तमधुर-आम्ल-लवण-तिक्त-कटु-कषायेति षड्विधाहाराणि जठराग्निना क्रमेण रस-रुधिर-मांसमेधस्सु, अस्ति, मज्ज-शुक्ररुपेण परिभवन्ति । अत्र शुक्रमेव स्त्रीऋतुकाले स्त्री-पुरुषसंयोगसमये स्त्रीयोन्यान्ते स्त्रीरक्ते प्रविशति तथैव मिलनं करोति च । मिथुनक्रियया पुरुषस्य शुक्रं स्त्रीयायाः रक्तेन सह मेलयिष्यतः । एकीभूतो भवति । तदनन्तरे मासार्धेन पिण्डो भवति । मासमेकेन शिरो भविष्यति । मासद्वयेन भुजद्वयौ भवतः । मासत्रयेण पादद्वयोः भवतः । चातुर्मासे उर-कटिश्च अवयवानि भविष्यन्ति । पञ्चमे मासे पृष्टभागः सिध्यति । षण्मासे सर्वेन्द्रियाणि सिध्द्यन्ति । सप्तमे मासे तु चैतन्यात्मकजीवः प्रविष्ठो भविष्यति स्थीयते च । तदनन्दरे नखशिखादयः उत्पद्यन्ते । नवमासनवदिनानन्तरे दशविकारादनन्तरे अस्थि भासते इति व्यवहारक्रियते । ततः जायते जननं भविष्यति ।

अत्रान्तरे किञ्चिद्विचारः - स्त्रीपुरुषपोः यदा मिथुनक्रियासम्भवति तदनुसारेणैव स्त्री-पुरुषमिति सिध्यति। स्त्रीऋतुकालानन्तरे सम-विषमदिनानि परिगण्यन्ते। स्त्रीऋतुकालसमये षड्दिनानि मिथुनक्रियानिषेधो भवन्ति। तेषु दिनेषु मिथुनभविष्यति चेत् ऋजपीडितपिण्डोत्पत्तिः भविष्यति। त्रीणि दिनानि संर्पूणनिषेधः चतुर्थ-पञ्च-षट्-दिनानि कनिष्टमिति ज्ञेयम्। एषु दिनेषु मिथुनेन गर्भधारणं भविष्यति चेत्तादृशपिण्डः अधिक(पाप)ऋजुदोषयुक्तो भवति। तस्मात्समदिनं विषमदिनमिति परिगण्यन्ते। रजस्वलास्त्रीयां पुरुषः विषमदिवसे मिथुनं करोति चेत्स्त्रीपिण्डोद्वभवति। तथैव समदिवसेषु स्त्रीपुरुषयोः मिथुनक्रिया सम्भवति चेत् पुरुषरूपः पुल्लिङ्गात्मकः शिशुः जन्यते। एवं प्रकारेण षोडशदिनपर्यन्तं भविष्यति।

**३यथायथारजोरात्रौनैकद्यंहिनिषेकतः । विस्फोटादिगदैर्युक्तोबालःसञ्जायतेततः ।**

रजशुध्यनन्तरं यथैव सामिप्येन समावेतः भवति चेत्तथैव वृणगजकणादयः
व्याधिरूपेण बाध्यन्ते एषोतरोत्तरं विद्यादायुरारोग्यमेव च।

**४प्रजां सौभाग्यमैश्वर्यं बलं च दिवसेषु वै । एकादशित्रयोदश्यास्तु नपूंसकः स्यात्॥**

रजोदर्शानानन्तरं उत्तरोत्तरं दूरदूरात्रौ सम्भोगः भविष्यति चेत तथैव अधिकविद्याबुद्धिः आयुष्यमारोग्य

-सौन्दर्यगुणसद्गुणसम्पन्नसन्तन्तिः जायते। सुखसुताभिष्ठिनः विचारपूर्वकेन क्रियताम्। प्रथमतः चतुर्थरात्रौ पर्यन्तं सङ्धव- र्जनीयः । द्वादशरात्रौ तु एकादशत्रयोदशरजन्यौ नपूंसकत्वात्नोचितम्। अथवा वन्द्यासन्ततिभविष्यदर्थेनोचितम्। तस्मात्चषड्त्रिंशद्दिनानि निषेधो भवन्ति। शेषरजन्यः दशः भवन्ति तासु रजनिषु युग्मायुग्मस्तः। अपि च षष्टी-अष्टमी-दशमी-द्वादशी-चतुर्दशी-षोडशी-रजन्यः एते समदिनानि पुरुषसन्ततिकानि भवन्ति।

पञ्चमी-सप्तमी-नवमी-पञ्चदशीरजन्यः षड्दिनानि स्त्रीसन्ततिकानि च। किमर्थमिति चेत्विषमरजन्यां स्त्रीरजः प्रबलो भवति। समदिवसेषु स्त्रीणां रजः दुर्भलो भवति। तथा च पुत्रार्थिनः समरजन्यां कन्यार्थिनः विषमरजन्यां मिथुनक्रियां क्रियतामिति विज्ञेयम्। एवं प्रकारेण मानवकुलसञ्जातक्रिया वर्तते। एषः क्रमः अन्यजीवजन्तूनामननन्वयो भवति । कथमिति चेत् अन्य- जीवजन्तूनां जननव्यत्यन्तरो भवति । कुक्कुरादयः प्रतिदिनं मिलति प्रतिदिनमण्डं प्रसूयति । पिपिलिकामसकापतङ्गादयः क्षणकालोद्भवि तथैव ५ नश्यन्ति । शुनकवराहादयः गर्भधारणादनन्तरत्रिमासादेव जन्यन्ते तथैव पञ्च-षट्-सप्त-अष्ट-नवदशाधिकमासादपि अंशून्प्रसूयन्ति। गर्भधारणादन्तरं अजादयः षण्मासादेव जन्यन्ते। गौरादयः गर्भधारणादन्तरंनवमासादेव जन्यन्ते। एतद्विषये उपनिषन्मन्त्राः प्रवर्तते" **आपो वावाऽन्नाद्भूययस्तस्माद्यदासु वृष्टिर्नभवति व्याधीयन्ते प्राणाः अन्नं कनीयो भविष्यतीत्यर्थः यदा सुवृष्टिर्भवत्यानन्दिनः प्राणाभवन्त्यन्नं बहुभविष्यतीत्याप एवेमा मूर्तायेयं पृथिवी यदन्तरिक्षं यद्द्यौर्यत्पर्वताः देवमनुष्यायत्पशवश्च वयांसि च तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपीलिकमाप एवेमामूर्ता आपउपास्स्वेति**" ॥1॥

(**छा,उ,अ**-7**ख**-10) (**जलमेव अन्नादधिकः तस्मायदावृष्टिः न भवति तदा प्राणीनांन्नंन्यूनं भवति यदा सुवृष्टिभवति तदा प्राणीनां अन्नं आनन्दकरो भवति । एते सर्वे मूर्ताः जलं पृथिवी अन्तरिक्षं द्युलोकं पर्वताः देवमनुष्याः पशवः तृणतरुलतादयश्च व्याघ्रमृगादयश्च क्रिमिकीटादयश्च एते सेर्वे मूर्तादयश्च इतिमत्वा उपासस्व**)।

अन्यजीवजन्तूनामपि एवमेव भविष्यति इति मन्ये। एतत्स्थूलशरीरस्य उत्पत्तिक्रमः अस्ति। केचित्शरीराणि सुखपूर्णानि केचित्शरीराणि दुःखःपूर्णानि भवन्ति। केचित्शरीराणि रक्तवर्णानि केचित्शरीराणि कृष्णवर्णानि भवन्ति च। कानिचन्शरीराणि दष्टपुष्टाणि भवन्ति। कानिचन्शरीरणि कृषाणि भवन्ति। तथैव अन्यत्शरीराणि बृहद्गात्राणि भवन्ति ।कानिचन्शरीरणि लघु-अतिलघुरूपेण दृश्यन्ते । एतत्शरीरे अनेके अवयवाः सन्ति। अनेके करणा- दयः सन्ति। बाह्यकरणानि अन्तःकरणानि विभेदौः स्तः। बाह्यकरणानि शिर-कर-चरण-नयन-कर्ण-नासिक-मुख-जिह्वा-पायूपस्ताश्च सर्वे सम्पन्नासन्ति। सर्वे अवश्यकानि अङ्गानि एव । एतेषु येन केन अङ्गेन नूनं भवति चेत् अस्य व्यवहारः दुःखमयं भवति। तथा च एषु करणेषु अधम-मध्यमा-उत्तमेति व्यवहारः जायते। यत्र-कुत्रापि यदा कदापि येन केनापि वक्तुं न शक्यते। सर्वेऽपि उत्तमोत्तमाङ्गमिति ज्ञेयम्। अत्र अशन- व्यसनक्रियात्मकमुखदन्ताः ब्राह्मकरणमेवेति वक्तव्यम्। तथैव नख-शिखावपि करणमेवेति सिद्धम्। एते करणानि शरीरस्यपालनपोषणबलवर्धनक्रियार्थं सहकरिष्यन्ति इति ज्ञेयम्।

किञ्चिद्विचारः वर्ततेः-

**६उत्तमाङ्गंशिरःशीर्सं मूर्धानां मस्तकोऽस्त्रियाम् । अङ्गंप्रतीकोऽवयवोऽधनोऽपघनोऽथकलेवरम्।।**

**गात्रंवपुसंहननंशरीरंवर्ष्मविग्रहः। कायोदेहःक्लीबपुंसुस्त्रियांमूर्तिस्तनुस्तनूः।।**

पुल्लिङ्गवाचकाः=प्रतीकः-अवयवः-अवधनः-कायः-देहः-विग्रहः एते पुरुषवाचक-शब्दाः। मूर्त्तिः-तनुः-तनू एते स्त्रीलिङ्गवाचकाः शब्दाः।

शरीरं-गात्रं-वपुस्-संहननं-वर्ष्मन्-अङ्गं -कलेवरं एते नपुंसकवाचकशब्दाः सन्ति ।

एभिः शब्दैव्यवहारः जगति प्रचलति। स्थूलसूक्ष्म-कारणदेहानां प्रति एते शब्दाः समानाः भवन्ति ।गीतोक्तरित्या

**ममयोनिर्महद्ब्रह्मतस्मिन्गर्भंददाम्यहस् संभवःसर्वभूतानांततोभवतिभारत** (**भगीअ 14 श्लो 3**)

मम स्वरूपिमूलमायाप्रकृतिः एतेषां प्राणीनां योनिर्भवति तदेव सर्वप्राणीनां गर्भस्थानी भवति तथैव योन्यां चेतनसमुदायरूपि गर्भं स्थापयामि।

जडचेतनयोः सर्वप्राणीणां जन्म भविष्यन्ति। सर्वयोनिषु७ कौन्तेयः मूर्तयः संभावन्तियाः। तासां ब्रह्ममहद्योनिरहं बीजप्रधपिता॥

एवं प्रकारेण सर्वयोनिषु जातशरीरधारीणां भूतानां गर्भधारणादेव प्रकृतिः भवति। तथैवाहमेव बीजस्थापकपिताहं भवामि। मायाप्रकृत्येव माता अहमेव पितेति भगवदुक्तम्। एवं प्रकारेण मम मतेर्गोचरितपिण्डोत्पत्तिविषयं निरूपितमस्ति इत्युक्त्वा विरमामि ।

## पादटिप्पणी-

१. मानवधर्मशास्त्र (सुरेशशिवाचार्य विरचित) ।
२. निजगुणग्रन्तः विवेकचिन्तामणि ।
३. श्रीहरिसंहिता ।
५. छा. उ. अ. ७ खं. १० मं. ।
६. अमरकोशः, ६-३९-६४० ।
७. भ. गी., १४-१४ ।

**Dr. Siddappa B. Kareppagola**
Research Scholar
Karnataka Samskrita University
PMK Road, Chamaraja Pete-560018
Bengaluru, Karnataka
Mobile : 9880741401

**********

Journal of Veda S amskrita Academy, ISSN 2250-1711
Volume XVIII : July to December – 2021

# वेदबोधकं रामायणम्

**Ms. S. Brahadha Prasanna**
Assistant Professor, PG & Research,
Department of Sanskrit
Srimad Andavan Arts & Science College
T.V.Koil, Tricharapalli

वेदाः विश्वसाहित्यस्य प्राचीनतमो ग्रन्थास्सन्ति । मानवसंस्कृतेः प्राचीनतमरूप विकासमवबोधनार्थं वेदानां परिशीलनमपरिहार्यम् । वेदाना- मध्ययनं भारतस्य प्राचीन तथा वर्तमानेतिहासस्य ज्ञानार्थमत्यावश्यकम् । वेदमेव धर्म-दर्शन-आचार-विचार-साहित्यादिषु क्षेत्रेषु आधारभूतो विद्यते । वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूना- मात्मनस्तुष्टिरेव च ॥[१]

संस्कृतसाहित्यादिस्त्रोतसि वेदे एव सर्वतः प्राक् कविकाव्यशब्दयोः समुल्लेखः प्राप्यते - 'कविर्मनीषी परिभूः स्वयम्भूः'[२] इति । 'देवस्य पश्य काव्यम्'[३] इत्यत्र काव्यपदं वेदमेवाभिधीयते इत्यनेनैतदभ्युपपन्नं जायते यत्कविभिः काव्यकलाप्रेरणा वेदेभ्य एव प्राप्ता ।

## वेदकालऋषयः

वेदकाले याः ऋषयः आसन् तेषां वंशजाः ऋषयश्च कथापात्ररूपेण श्रीमद्रामायणे भागं स्वीकृताः, संदर्भेऽस्मिन् 'धाता यथापूर्वं अकल्पयत्'[४] इति श्रुतिरेव प्रमाणम् ।

## वैदिक - लौकिक साहित्यम्

साहित्यिकदृष्ट्या वेदानां महत्त्वमपरिहार्यम् । ऋग्वेदस्य उषसूक्ते साहित्यिकोत्कृष्टत्वं परिलक्ष्यते । वैदिकसाहित्यस्यारम्भः संहितासाहित्यात् स्वीकार्यते । ऋग्वेदसंहिता प्राचीनतमा । काव्यस्योद्भवः वेदादेव जायते। वेदेषु स्फुटितकाव्यशैल्याः विकासितं रूपं श्रीमद्रामायणे दृश्यते । श्रीमद्रामायणं वेद बोधनार्थं, वेद संबन्धि विषयमस्तीति निरूपितम् ।

इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितम् । यः पठेत् रामचरितं सर्वपापैः प्रमुच्यते ॥[५]

चतुर्विंशतिसहस्त्रसंख्यका श्लोकास्सन्ति ग्रन्थेऽस्मिन् श्रीमद्रामायणस्य अपरं नाम चतुर्विंशतिसाहस्त्री संहिता' अप्यस्ति । मानवजीवनस्य धार्मिकक्रियाकलापानां विस्तृतता कृत्रिमं जायते ।

## वैदिक - लौकिक छन्दस्

वेदेभ्य एव च छन्दसां परिज्ञानमलङ्काराणाञ्च परिचयः ज्ञातः । वेदे यत्र गायत्री - त्रिष्टुब् - जगत्यादि छन्दसां प्रयोगः तत्र लौकिकसाहित्ये तद्भि-न्नतत्वदृशानाम् उपजाति - वंशस्थ- अनुष्टुबादि छन्दसां प्रसरः समुल्लसति ।

अनेन महर्षिणा वैदिकछन्दाम्स्येवाधारीकृत्य परिष्कृतरूपे लोकिकानां छन्दानामाविर्भावः कृतः । भगवतः वाल्मीकेः प्राक्काले एव छन्दोबद्धवाङ्मयं वेदरूपमेवासीत् । महर्षिणा वाल्मीकिना एव मुख्यतः अनुष्टुब् छन्दसि श्रीमद्रामायणं प्रवाहितम् ।

मा निषाद प्रतिष्ठा त्वमागमः शाश्वतीः समाः । यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥[६]

ब्रह्मणः वाक्यमनुसृत्य आदिकविर्वाल्मिकिमुखात् प्रप्रथममहाकाव्यं (आदिकाव्यम्) श्रीमद्रामायणं शोकः श्लोकत्वमागतो अनुष्टुब् छन्दसि ।

## श्रीमद्रामायणम्

रामस्य अयनम् इति रामायणम् अर्थात् भगवतः श्रीरामचन्द्रस्य निवासस्थानं चरितवर्णनञ्च यत्र सुविराजते तदेव रामायणं कथ्यते । श्रीमद्रामायणं भारतवर्षस्य राष्ट्रीयं काव्यमस्ति । मानवजीवनस्य साङ्गमादर्शं प्रस्तौतीदं महाकाव्यम् । दशरथनन्दनस्य श्रीरामचन्द्रस्य जीवनसम्बन्धिनी कथा वैदिकसाहित्येऽपि समुपलभ्यते ।

## वेदसारं रामायणम्

भारतीयजनानां विचारः वैदिकयुगाद् वर्तमानकालपर्यन्तमनेकदृष्ट्या सर्वथा सममेवास्ति । यथोक्तं महाभारते - इतिहासपुराणाभ्यां वेदं समुप-बृंहयेत् । विभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ॥[७]

संस्कृतवाङ्मये इतिहासपुराणानामतीव गौरवास्पदं स्थानं विद्यते । वेदविहितानां धर्माणां सरलसुबोधभाषायां वर्णनायैव इतिहास-पुराणानि विरचि- तानि । इतिहासैः यदि राज्ञां वृत्तं प्राधान्येन बोधि तं भवति तदा पुराणैः राज्ञां वृत्तैः सहैव ऋषीणामपि वृत्तं ज्ञातुं शक्यते । पुराणेषु भौगोलिकं तथ्यमपि दृश्यन्ते । श्रीमद्रामायणम् इतिहासः तथा महाभरतम् पुराणञ्च ।

## सामाजिकव्यवस्थायाः विवरणम्

वेदेषु समाजवत्परिवारव्यवस्था विषयेऽपि अस्माकं पथप्रदर्शकाः सन्ति । ऋग्वेदानुसारं पत्नी गृहस्य स्वामिनी वर्तते - 'जायेदमस्यम्' ।

अहल्या द्रौपदी सीता तारा मन्दोदरी तथा । पञ्चकन्यास्मरेन्नित्यं सर्वपाप विनाशनम् ॥

इत्यस्मिन् कर्णपरम्परा श्लोके अहल्या-सीता-तारा-मण्डोदर्याद्याः स्त्रियाः श्रीमद्रामायणस्थाः । तेन तासां पातिव्रत्यं श्रीमद्रामायण सामाजिक ओन्नत्यं, स्त्रीणां स्थानञ्च प्रतिबिंबी कृतमस्ति ।

## गुरुशिष्यसम्बन्धः

गुरुः पिता गुरुर्माता गुरुर्देवो गुरुर्गतिः । मोक्षस्य सर्वस्य वा मूलमस्ति महेश्वरः, महेश्वरस्यापि मूलमस्ति पञ्चाक्षरमन्त्रः, पञ्चाक्षरमन्त्रस्यापि मूलमस्ति गुरुः । गुरुशिष्यसम्बन्ध-विषये अथर्ववेदस्य कथनं यत्गुरुणा शिष्याः तथैव रक्षणीयाः यथा गर्भे मात्रा शिशुः । आचार्यः उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः ।

तं रात्रीस्तिस्त्रः उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः ॥[८]

गुशब्दस्त्वन्धकारः स्यात् रुशब्दस्तन्निरोधकः । अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते ॥[९]

संहिता - ब्राह्मण - आरण्यक - उपनिषद्रूपेण वेदाश्चतुर्धा विभक्ता- सन्ति । आरण्यक उपनिषत्सु संवाद रूपेण गुरवः शिष्याणां कृते ब्रह्मविद्यां प्रकाशिता इति प्रसिद्धः । प्रायेण गुरवः शिष्यान् प्रति पाठान्, यानि अनवद्यानि, आचरितव्यानि तानि सेवितव्यानि च अत्युग्ररीत्या बोधयति । विंशति ईशवीयशताब्दसाहित्ये जगद्गुरुरामभद्राचार्य विरचित 'श्रीराघवाभ्युदयम्' नाम रूपकेऽस्मिन् गुरुर्वसिष्ठः शिष्यं रामं प्रति अधिकवात्सल्यतया प्रकाश-यति । प्रथमदृश्यस्य शीर्षकं 'वसिष्ठवात्सल्यम्' इति कृत्वा प्रशंसितुं शक्यते ।

श्रीरामस्य समावर्तनानन्तरं अयोध्या प्रति गमनावसरे गुरुर्वशिष्ठः विलपति । परन्तु अद्य किमर्थं म्लानमुखः दृष्टो इति शिष्यः वामदेवः वसिष्ठं पृच्छति । शिष्यः वामदेवः गुरुमुखं दृष्ट्वैव तस्य शोकमवगम्यते ।[१०] वामदेवाय गुरुर्वसिष्ठः रामवियोग प्रसङ्गे प्रत्युत्तरं वदति, वदन्नेव स्खलद्गात्रः वामदेवाङ्के शिरोनिधाय अश्रूण्यावर्तयति, तेन गुरुशिष्य पराम्परा मूलं वेदमूलं ज्ञायते ।

श्रीभार्गवराघवीयम् नाम महाकाव्येऽपि जगद्गुरुरामभद्राचार्यः, गुरुरूपेण शिवस्य तथा शिष्य रूपेण परशुरामस्य सम्बन्धः वर्णयति ।[११]

## सहोदरपरस्परता

भ्रातृस्नेहं अधिकृत्य अथर्ववेदे एवमुक्तं - 'माता भूमिः पुत्रोऽहं पृथिव्याः।'[१२] 'सा नो भूमिर्विसृज्यतां माता पुत्राय मे पयः'[१३] । 'भूमेर्मातनिधेहि मा भद्रया सुप्रतिष्ठितम्'[१४] इति । वयं सर्वे परस्परं भ्रातर एव । पृथिव्याः पुत्राः सर्वे भारतीयाः सहोदराः विद्यन्ते । अत एवात्र न कोऽपि वरिष्ठः न कोऽपि कनिष्ठः प्रत्युत सर्वे भारतीयाः समा एव वर्तन्ते । यथोक्तमृग्वेदे - 'अज्येष्ठासो अकनिष्ठास एते सम्भ्रातरो वावृधः सौभगाय'[१५] इति । रामायणे भ्रातृप्रेम्णः यादृशो आदर्शः चित्रितः सुविराजते न तादृशः अन्यस्मिन् कस्मिंश्चिद् स्थाने प्राप्यते । युद्धभूमौ लक्ष्मणे मोहिते सति रामः विलपति यद् विवाहार्थं तु स्त्रियः सर्वत्र प्राप्तुं शक्यन्ते, मित्राण्यपि बहूनि भवितुं शक्यन्ते, बान्धवा अपि अनेके भवन्ति परन्तु तत्स्थानं न दृश्यते मह्यं यत्र सहोदरः भ्राता मिलेत् । देशे देशे

कलत्राणी देशे देशे च बान्धवाः । तं तु देशं न पश्यामि यत्र भ्राता सहोदरः ॥[१६]

## अतिथिसत्कारम्

अतिथिसत्कार उल्लेखनं ऋग्वेदे सूचितं यथा -

मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत स तस्य ।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥[१७]

राजा दशरथः कुलगुरुवशिष्ठेण सह विश्वामित्रमहर्षिं प्रति अतिथिसत्कारं प्रकटयति-

प्राप्तमावेदयामासुनृपायेक्ष्वाकवे तदा । तेषां तद् वचनं श्रुत्वा सपुरोधाः समाहितः ॥
प्रत्युज्जगाम संहृष्टो ब्रह्माणमिव वासवः । स दृष्ट्वा ज्वलितं दीप्त्या तापसं संशितव्रतम् ॥
प्रहृष्टवदो राजा ततोऽर्घ्यमुपहारयत् ।[१८]

अहल्याशापविमोचनानन्तरमपि अहल्या राम - लक्ष्मणौ सुस्वागतं व्याघ्रयति ।

शापस्यान्तमुपागम्य तेषां दर्शनमागता । राघवौ तु तदा तस्याः पादौ जगृहतुर्मुदा ।
स्मरन्ती गौतमवचः प्रतिजग्राह सा हि तौ ॥ पाद्यमर्घ्यं तथाऽऽतिथ्यं चकार सुसमाहिता ।
प्रतिजग्राह काकुत्स्थो विधिदृष्टेन कर्मणा ॥[१९]

## उपसंहारम्

एवं वेदमनुसृत्य श्रीमद्रामायणे तथा रामायणाधारितकाव्येषु च सर्वविधमोक्षदायकं पुरुषार्थसाधकं कल्याणकरं चास्ति श्रीमद्रामायणमिति वृत्तायते, भारतीयानां संस्कृतेश्च आदर्शरूपमित्यलमतिपल्लवितेन । वैदिककालाद् अद्यावधिपर्यन्तं संस्कृतकाव्यं उत्तरोत्तरं विकासस्य मार्गेऽग्रसरं विद्यते ।

## पादटिप्पणि-

१. मनुस्मृतिः - द्वितीयाध्याय - श्लोकः ६ । २. ईशोपनिषद् - श्लोकः । ३. सामवेदः (४.४.३); अथर्ववेदः (१०-८-३२) । ४. ऋग्वेदः - मण्डल १० - सूक्तं १०.१९० । ५. श्रीमद्वाल्मीकि रामायणम् - बालकाण्डम् - अध्यायः २ - श्लोकः - ९८ । ६. ibid.- पृ : । ७ - श्लोकः १५ महाभारतम् (१.१.२६७) ; पद्मपुराणम् (१.२. ५२)। ८. अथर्ववेदः - ११\ ५ \ ३ । ९. शुक्लयजुर्वेदः - अद्वयतारक उपनिषद् - श्लोकः - १६ । १०. श्रीराघवाभ्युदयम् - प्रथम दृश्यः - ६, ७, ८ ,९ । ११. श्रीभार्गवराघवीयम् - अध्याये: ३ -श्लो:७७,७८ । १२. पृथ्वी सूक्तम्-१२.१.७, ८ । १३. Ibid. -१० १४. अथर्ववेदः (मातृभूमिसूक्तम्) - का.१२सू.१,मं.६३ । १५ ऋग्वेदः - ५.६०.५ । १६. श्रीमद्वाल्मीकिरामायणम् , , युद्धकाण्डः - ५६ - श्लोकः - १३ । १७. ऋग्वेदः १०\११७\६ । १८. श्रीमद्वाल्मीकिरामायणम् – बालकाण्डम् – दज्च – १८ - श्लोकः – ४२, ४४ । १९. ibid. - बालकाण्डम् - श्लोकः - १६ - १८ ; Sec - ४९

## साहायग्रन्थविवरणम्

1. अथर्ववेदः 2. अद्वयतारकोपनिषद् 3. ऋग्वेदसंहिता 4. बुद्धचरितम्
5. श्रीभार्गवराघवीयम् 6. श्रीमद्वाल्मीकि रामायणम् 7. मनुस्मृतिः
8. महाभारतम् 9. श्रीराघवाभ्युदयम् 10. History of Sanskrit Literature
11. https://www.valmikiramayan.net/
12. https://ramanujramprapnna.blog/2019/04/24/authenticity-of-itihaas-and-purans/

**Ms. S. Brahadha Prasanna**
(Under the Guidance of : Dr.R.Srinivasaraghavan)
Assistant Professor, PG & Research Department of Sanskrit
Srimad Andavan Arts & Science College (Autonomous)
(Affiliated to Bharathidasan University) T.V.Koil, Tricharapalli – 620005.
Mobile No. : 95002-80736 E-mail : bragishek@gmail.com

************

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# भासनाटके नवरसाः

**Y. Shanmuga Priya Dharshini**
Reseadch Scholar
Madras Sanskrit Collega, Chennai

**सारांशः -** नाट्यशास्त्रे विव्रीयमाणा रसाः सर्वे काव्येषु कविभिः प्रदर्शिता दृश्यन्ते । कुत्रचित् कस्यचिद्रसस्य प्राधान्यं दृश्यते, अन्येषां चाप्राधान्यमिति विशेषः केवलम् । तत्र भास इति यो रूपककारः तस्य रूपकेषु किं सर्वे रसाः सन्ति न वेति विचाराय ममायं प्रयत्नः । यथा यथा विचारः क्रियते तथा तथात्र रसाणां वैविध्यं अस्माकं दृष्टिपथमायाति । विभावानुभावव्यभिचारि- संयोगात् रसनिष्पत्तिः इति भरतः । लोके यत्कारणम्, यत्कार्यम्, यच्च सहकारि तेषां काव्ये क्रमेण विभावानुभावव्यभिचारिशब्दैः व्यपदेशः । तेषां समुदाये सति रसो निष्पद्यते इति अस्यार्थः । ते च रसाः के इति जिज्ञासायां **भरतेनाभिहितम् -**

शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः । बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः॥ नाट्यशास्त्रम् ६।१५

काव्यप्रकाशकारदायस्तु शान्तमपि रसत्वेनाभ्युपगम्य नव रसाः इति आचक्षते । नाटककर्तृणां मध्ये भासस्य नाम प्राथम्येन श्रूयते । महाकविः कालिदासः भाणश्च स्वकृतौ अस्य प्रशंसां कृतवन्तौ । भासस्य रूपकेषु रसाणाम् आलोचनं सोदाहरणं यथाशक्ति विधीयते -

**१. शृङ्गाररसः** - अयं रतिस्थायिकः, तरुणविषयकः, श्यामवर्णः, श्रीविष्णु दैवतश्च । नायकादिः आलम्बनविभावः, चन्द्रचन्दनभ्रमरझङ्कारादिः उद्दीपन- विभावः, कटाक्षविक्षेपादिः अनुभावः, लज्जादिश्च व्यभिचारी ।

कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः।
तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयं पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः ॥

स्वप्नवासवदत्तम् ४।१

राजा उदयनः विदूषकं वसन्तकमेवं कथयति - वयस्य! अवन्तिकुमार्या दृष्टवतः मे मनसि मदनेन पञ्च बाणाः पातिताः । सम्प्रति तु पद्मावतीं परिणीतवतो मे मनसि पुनरपि अपरः कश्चिद्बाणः षष्ठः पात्यते इति चित्रमिति अस्याशयः । अत्र पद्मावतीविषये उदयनस्य रतिः प्रतीयते इति शृङ्गारः ।

**२. हास्यरसः -** अयं हासस्थायिकः, श्वेतवर्णः, प्रमथदैवतश्च । विदूषकादिः आलम्बनविभावः, तच्चेष्टादिः उद्दीपनविभावः, नयनमीलनादिः अनुभावः, निद्रालस्यादिश्च व्यभिचारी । अस्य षट् प्रभेदाः, येषु तावत् ज्येष्ठेषु स्मितहसिते इति, मध्यमेषु विहसितावहसिते इति, नीचेषु अपहसितातिहसिते इति द्वौ द्वौ प्रकारौ सम्भवतः । तत्र ईषद्विकासिनयनं स्मितम्, लक्ष्यदन्तं हसितम्, मधुरस्वरं विहसितम्, भुजशिरःकम्पनविशिष्टम् अवहसितम्, सबाष्पम् अवहसितम्, विक्षिप्ताङ्गं च अतिहसितमिति विवेकः ।

ऋज्वायतां हि मुखतोरणलोलमालां भ्रष्टां क्षितौ त्वमवगच्छसि मूर्ख सर्पम् ।
मन्दानिलेन निशि या परिवर्तमाना किञ्चित्करोति भुजगस्य विचेष्टितानि ॥ स्वप्नवासवदत्तम् ५।३

राजा उदयनः विदूषकं प्रति एवं कथयति - भूमौ पतितां दीर्घलम्बाम्, मन्दानिलेन च किञ्चित् चलन्तीं तोरणमालां विलोक्य त्वं सर्प इव मन्यसे, ततो मूर्खोऽसीति अस्यार्थः । अत्र मालायां सर्पबुद्ध्या विदूषकस्य यच्चेष्टितं तद्धासस्य प्रकृष्टमुदाहरणं भवति ।

**३. करुणारसः** - अयं शोकस्थायिकः, धूम्रवर्णः, यमदैवतश्च । प्रमीतपुरुषादिः आलम्बनविभावः, तस्य दहनादिकम् उद्दीपनविभावः, दैवनिन्दाभूमिपतनादिः वैवर्ण्याप्रलपनादिश्च अनुभावः, मोहव्याध्यादिश्च व्यभिचारी ।

तरुण तरुणतानुरूपकान्ते नियमपराध्ययनप्रसक्तबुद्धे ।
कथमिव गजराजदन्तभग्नस्तरुरिव यास्यसि पुष्पितो विनाशम् ॥ मध्यमव्यायोगः २४

अत्र दौर्भाग्यवशात् घटोत्कचेन अवरुद्धो ब्राह्मणः तेन नीयमानं स्वपुत्रं दृष्ट्वा त्यक्तुमनिच्छन् क्रन्दनं

करोति । गजराजदन्तेन भग्नस्य पुष्पितस्य तरोरिव स्वपुत्रस्य दशामवलोकयतो ब्राह्मणस्य मनसि नितरां शोकः संजायते । तस्मादत्र करुणो रसः ।

**४. रौद्ररसः** - रसोऽयं क्रोधस्थायिकः, रक्तवर्णः, रुद्रदैवतश्च । शत्रुः आलम्बनविभावः, तत्कृततर्जनादिः उद्दीपनविभावः, प्रहारपातनादिः अनुभावः, उग्रतावेगादिश्च व्यभिचारी ।

यदि न सहसे राज्ञो मोहं धनुः स्पृश मा दयां स्वजननिभृतः सर्वोऽप्येवं मृदुः परिभूयते ।
अथ न रुचितं मुञ्च त्वं मामहं कृतनिश्चयो युवतिरहितं लोकं कर्तुं यतश्छलिता वयम् ॥ प्रतिमानाटकम् १-१८

युवतिवशादेव पूज्यस्य रामस्य वनं प्रति प्रस्थानं सम्पन्नमिति क्रुद्धो लक्ष्मणः क्रोधाविष्टः सन् कैकयीं स्वमातेत्यपि अविचिन्तयन् लोकं युवतिशून्यं करोमीति व्याहरति । अनेन लक्ष्मणे रौद्रो रसो जागरित इव प्रतिभाति ।

**५. वीररसः** - रसोऽयम् उत्साहस्थायिकः, सुवर्णवर्णः, इन्द्रदैवतश्च । जेतव्य आलम्बनविभावः, तच्चेष्टादिः उद्दीपनविभावः, सहायान्वेषणादिः अनुभावः, धृतिमतिगर्वादिश्च व्यभिचारी ।

मा तावन्मम शरमार्गमक्षभूताः संप्राप्ताः क्षितिपतयः सजीवशेषाः ॥ कर्णभारम् ५

अत्र महावीरः कर्णः स्वशरस्य मार्गे ये पतन्ति ते सर्वेऽपि अवश्यं पराजयं गच्छन्तीति भावयति । तस्मात् कर्णे युद्धे उत्साहस्य प्रतीतिरिति वीरो रसः ।

**६. भयानकरसः** - अयं भयस्थायिकः, कृष्णवर्णः, भूतदैवतः, नीचप्रकृतिगतश्च । भीतिकारणं व्याघ्रादिः आलम्बनविभावः, तच्चेष्टादिः उद्दीपनविभावः, वैवर्ण्यगद्गदपलायनादिः अनुभावः, आवेगसंमोहादिश्च व्यभिचारी ।

युद्धे येन सुराः सदानवगणाः शक्रादयो निर्जिताः दृष्ट्वा शूर्पणखाविरूपकरणं श्रुत्वा हतौ भ्रातरौ ।
दर्पाद्दुर्मतिमप्रमेयबलिनं रामं विलोभ्य च्छलैः स त्वां हर्तुमना विशालनयने प्राप्तोऽस्म्यहं रावणः ॥
प्रतिमानाटकम् ५-१६

रामे मृगं ग्रहीतुं कुटीरात् निष्क्रान्ते, तत्सम्बोधनशब्दं निशम्य लक्ष्मणेऽपि निष्क्रान्ते सति स्वस्य भयानकं रूपं निह्नुवानः सीतासहितं कुटीरं रावणः प्रविशति । तत्र च संलापावसरे आत्मनो घोररूपं यत्प्रदर्शयति तत्पश्यन्त्याः सीताया मनसि महद्भयम् आविर्भवति । तस्मादिदं भयानकरसस्य उदाहरणं भवितुमर्हति ।

**७. बीभत्सरसः** - जुगुप्सास्थायिकः, नीलवर्णः, महाकालदैवतश्च । दुर्गन्धमांसादिः आलम्बनविभावः, तत्र कृमिपतनादिः उद्दीपनविभावः, निष्ठीवनाक्षिसङ्कोचादिः अनुभावः, मोहावेगादिश्च व्यभिचारी ।

मम मातुश्च मातुश्च मध्यस्था त्वं न शोभसे । गङ्गायमुनयोर्मध्ये कुनदीव प्रवेशिता ॥ प्रतिमानाटकम् २-१६

मम माता कैकयी रामस्य वनगमने पितुर्मरणे च कारणीभूतेति विभावयन् भरतः तां गङ्गायमुनयोर्मध्ये प्रविष्टा कुनदीवेति यन्निर्णयति तत्र बीभत्सरसो मनागिव प्रतीतिपथम् अवतरति ।

**८. अद्भुतरसः** - अयं विस्मयस्थायिकः, पीतवर्णः, गन्धर्वदैवतश्च । लोकोत्तरं वस्तु आलम्बनविभावः, तद्गुणप्रसंसादिः उद्दीपनविभावः, स्तम्भस्वेदादिः नेत्रविकासादिश्च अनुभावः, वितर्कादिः व्यभिचारी ।

तनुमृदुललिताङ्गं स्त्रीस्वभावोपपन्नं हरिकरधृतमध्यं शत्रुसङ्घैककालः।
कनकखचितपृष्ठं भाति कृष्णस्य पार्श्वे नवसलिलदपार्श्वे चारु विद्युल्लतेव ॥ दूतवाक्यम् ४७

अत्र महीभारपनोदनाय भुव्यवतीर्णस्य वासुदेवस्य क्रोधम् उपशमय्य तत्करे वर्तमानस्य शार्ङ्गस्य प्रशंसां यदत्र करोति तत्र शार्ङ्गं तावत् शत्रुसंघस्य यमरूपमित्यादिरूपेण वर्णने अद्भुतो रसः सचेतसां हृदि मन्दं मन्दं पदं निधत्ते ।

**९. शान्तरसः** - शमस्थायिकः, उत्तमप्रकृतिः, श्वेतवर्णः, नारायणदैवतश्च । अनित्यत्वेन विज्ञातं सकलं जगत् आलम्बनविभावः, अनित्यत्वस्य सोपपत्तिकं ज्ञानम् उद्दीपनविभावः, पुण्याश्रमतीर्थाटनादिः अनुभावः, हर्षस्मरणादिश्च व्यभिचारी । सर्वं गृह्णामि । किं ते भूयः प्रियमुपसरामि । दूतवाक्यम् इति दूतवाक्ये वासुदेवस्य वाक्यम् । अत्र नारायणस्य शान्तस्वरूपत्वं सङ्गरहितत्वम् ईश्वरत्वञ्च प्रकटीभवति ।

**उपसंहारः -** यद्यपि भासस्य कृतिषु एकैकस्यापि रसस्य बहूनि उदाहरणानि निर्देष्टुं शक्यन्ते तथापि प्रबन्धविस्तरभयेन एकैकमात्रम् उदाहरणं निर्दिष्टमिति मन्तव्यम् ।

## उपयुक्तग्रन्थसूची


1. Ghosh, Manmohan, Nāṭyaśāstra Ascribed to Bharata-muni, vol.I. Varanasi: Chaukamba Sanskrit Series Office, 2009.
2. स्वप्नवासवदत्तम्, Palakkad: R.S. Vadhyar & Sons, 2014.
3. मध्यमव्यायोगः, Palakkad: R.S. Vadhyar & Sons, 2016.
4. प्रतिमानाटकम्, Palakkad: R.S. Vadhyar & Sons, 2005.
5. कर्णभारम्, Palakkad: R.S. Vadhyar & Sons, 2017.
6. दूतवाक्यम्, Palakkad: R.S. Vadhyar & Sons, 2017.



**Y. Shanmuga Priya Dharshini**

Reseadch Scholar

Madras Sanskrit Collega

Chennai

Mobile No. : 9566182534

E-mail : priyadarshini.cni@gmail.com


*******

Journal of Veda Samskrita Academy, ISSN 2250-1711
Volume XVIII : July to December – 2021

# भारतीयज्ञानपरम्परायां लौकिकविज्ञानविचाराः

**(Modern scientific aspects in the light of Ancient Indian Wisdom)**

**Ganesh Bhat**
Research Scholar
Amity University, Haryana

**ABSTRACT:**

**भारतीयज्ञानपरंपरा वेदकालादारभ्य एतावत्पर्यन्तम् अनवरतरूपेण अव्याहतरूपेण अनुवर्तिता वर्तते । भारतीयज्ञानराशिः अगाधा अनन्ता च वर्तते तथैव वेदे विद्यमानविचारान् बहुसुलभतया इदानीन्तनजनाः अवगन्तुमपि न शक्नुवन्ति । अतः वेदविचारान् स्विकृत्य पुराणादिकम् आरचितं वर्तते । तेषु प्रामुख्यतां भजन्ते स्मृतयः, पुराणानि, धर्मशास्त्राणि, शुल्बसूत्राणि, श्रौतसूत्राणि, रामायणं, महाभारतं च । अत्र च गणितं, भौतशास्त्रं, रासायनशास्त्रं, मनोवैज्ञानिकं, शारीरकशास्त्रम् इत्येवमादयः बहुत्र बहुधा चर्चितं वर्तते । अस्मिन् च शोधे एतादृषोपजीव्यकाव्येषु विद्यमानान् मुख्यान् वैज्ञानिकान् अंशान् कान्श्चन स्वीकृत्य प्रस्तुतं वर्तते । गर्भोपनिषदः तथा श्रीमद्भागवतस्य रीत्या गर्भस्य वर्धनं, जीवस्य शरीरान्तरप्रवेशः च निरूपितः वर्तते । बौधायनकात्यायनापस्तंबप्रणितशुल्बसूत्राधारेण ज्यामितिः तत्रापि पैथागोरस् सिद्धन्तः इति यः सर्वविदितं वर्तते सः न्यरूपि । पुनश्च अन्ते अग्निपुराणोक्तदिशा मानवशरीरस्य भागाः उक्ताः, तत्र च अस्थीनि कति इत्यत्र कथं विभिन्नता वर्तते इति दर्शितम् । एवं च भारतीयज्ञानपरंपरा बहुविशिष्टान् विचारान् जगते दत्ता अस्ति । इतोपि अस्माभिः तत्सर्वं सङ्गृह्य संशोध्य च नैजविचारान् निरूपणीयं वर्तते ।**

**KEY POINTS:**

**गर्भोपनिषदः शिशोः वर्धनविचारः, श्रीमद्भागवतमहापुराणोक्तरीत्या गर्भस्थस्यशिशोः वर्धनम् वेदगणितोक्तरीत्या गुणाकारः, लीलावत्युक्तरीत्या वर्गः, शुल्बसूत्ररीत्या पैथागोरस्सिद्धान्तः ।**

संस्कृतक्षेत्रं बहु अगाधम् अनन्तं च विद्यते इति सर्वविदितमेव तत्र तावत् संस्कृतं न केवलं भाषा वर्तते परन्तु अत्र वैज्ञनिकी दृष्टिः उपलभ्यते । वेद- कालाद् आरभ्य अद्य पर्यन्तं संस्कृतभाषा कालानुकूलतया क्वचित् कदाचित् शब्देषु, वाक्येषु च भिन्नताम् अप्राप| अनेके मन्त्रद्रष्टारः१, पौराणिकाः२, स्मृतिकाराः३, दार्शनिकाः४ च न केवलं तेषां परिधौ परन्तु तत् तद्युगा- नुकूलतया स्वशास्त्रं प्रतिपेदे । यदा च युगानुकूलत्वं चिन्त्यते तदा सामाजिकी दृष्टिः, आचारविचारः, वैज्ञानिकता च चिन्त्यत एव । एवञ्च सर्वेऽपि दृष्टारादयः पूर्वोक्ताः ऋषिः इति पदेन परिगणितुं शक्याः सन्ति । ऋषि इत्यनेन ज्ञायते यत् - 'ऋषति गच्छति ज्ञानेन संसारपारम्५' इत्यर्थः, सिद्यति च ऋष गतौ इत्यनेन धातुना । 'अजान् ह वै पृश्नीं स्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत्ते ऋषयोऽपवतु तदृषीणामृषित्वम्' इति वेदेषु६ । विज्ञानम्७ इति पदस्य अपि भिन्न एव अर्थः वर्तते वेदेषु शास्त्रेषु च । उपनिषदः८ दार्शनिकग्रन्थाःच तु आत्मरूपे ज्ञाने इदं विज्ञानम् इति पदं प्रयुक्तवन्तः। चतुर्दशानां विद्यानां धरणं हि यथार्थतः।

विज्ञानमितरत् विद्यात् येन धर्मो विवर्धते ॥ ९

इत्येवं विज्ञानस्य भिन्नत्वं वैशिष्ट्यं च दर्शयामासुः पुराणानि|इदानीं तावत् विज्ञानम् इति पदं लौकिकार्थे (science) केवलं प्रयुज्यते । एवं सति **भारतीयज्ञानपरम्परायां लौकिकविज्ञानविचाराः इत्यस्य उपक्रमः क्रियते- सर्वप्राथम्येन भगवता पिप्पलादेन१० प्रणीतगर्भोपनिषद्११ स्वीक्रियते:**

तत्र शरीरं कथम् इति दर्शयन् आचार्यः वदति पञ्चभूतात्मकं, षड्रसैः आश्रितं, सप्त धातुषु दृश्यमानं, त्रिमलात्मकं, द्विलिङ्गात्मकम् इदं शरीर-मिति । पृथिव्यप्तेजोवायुराकाशमिति पञ्चभूतैः शरीरं निर्मितं वर्तते । यत्र च शरीरे कठिनता दृश्यते सा पृथिव्या निर्मितम् । यच्च द्रवं रक्तमूत्रादिकं तत् अद्भ्यः निर्मितम् । यत्र च उष्णता दृश्यते जीर्णक्रियादिषु तत्तेजसः निर्मितम्| ये च प्राणापानव्यानोदानसमानाः वायवः शरीरस्थित्यर्थं विद्यन्ते । यत्र अवकाशः वर्तते कर्णादिषु तदाकाशेन निर्मितम् । एवं शरीरं कैः निर्मितम् इत्युक्तम्

अस्यामुपनिषदि१२ । मानवैः अशितं पीतं यद्वर्तते आहारपदवाच्यं मधुराम्ललवणतिक्त- कटुकषायरसयुक्तं तद् जीर्णं भूत्वा शोणितं (Blood) भवति । तेन रक्तेन मांसं(Fat), मांसाद् मेदः (Adipose Tissue) मेदसः स्नावा (Cartilage) स्नाव्नः अस्थीनि (Bone) अस्थिभ्यः मज्जा (Bone Marrow), मज्ञःशुक्रं (Seminalfluid) इति सप्त धातवः उत्पद्यन्ते । ये च कोशाः भवन्ति ते केवलं शुक्रधातुमभिवर्धन्ते । एवं च शुक्रशोणितयोः (Egg) संयोगेन १३ गर्भः (Embryo) निर्मितः भवति । ऋतुकालेभार्यागमनम् इति या उक्तिः अस्तितद्वत्समीचीनकाले तथा करणात् प्रथमरात्रौ कलिलं संपद्यते । सप्त- रात्रेः अनन्तरं बुद्बुदरुपेण परिणमते, पञ्चदश दिनेभ्यः अग्रे पिण्डः भवति । एवमेव अग्रे मासद्वये शिरः वर्धितः भवति । मासत्रयानन्तरं पादः निर्मितः भवति । चतुर्थमासे जठरः तथा कटिः निर्मिता भवति, षष्ठेच मासे सर्वाणि अपि ज्ञानेन्द्रियाणि निर्मितानि भवन्ति । सप्तमे मासे जीवस्य प्रवेशः भवति तथा अष्टमे मासे सर्वसंपूर्णः भवति । यदि पितुः रेतसः आधिक्यं तदा पुरुष शिशुः तथैव मातुः रेतसः आधिक्यं तर्हि स्त्री शिशुः भवति । उभयोः रेतसः तुल्यत्वेन नपुंसको भवति इत्यर्थः । यदि माता तस्मिन् मासे व्याकुलिता भवति तदा च अन्धाः खञ्जाः वामानाः च भवन्ति शिशवः१४ । अतः एव दृष्टम् इदानीमपि सप्तमासेभ्यः अनन्तरं मातरं बहिः न प्रेषयन्ति तथा मनोव्याकुलार्थं कारणानि यानि भवन्ति तस्मात् दूरे एव भवन्ति । एवं च जीवस्य प्रवेशः यदा भवति तदा पूर्वजातेः अथवा पूर्वजन्मनः स्मरणं भवति तस्य शिशोः । एवं यदृष्यते अस्याम् उपनिषदि सः एव विचारः श्रीमद् भागवते महापुराणे च विद्यते१५ । गर्भस्थजीविनः वर्धनम् इत्ययंविचारः, यथा आधुनिकाः वैद्याः निरूपयन्ति तद्वदेव विद्यते अस्मिन्पुराणे । यथा सर्वे जानन्ति पूर्वजन्मकर्मानुसारेण जीवी जन्म प्राप्नोति । पुरुषस्य वीर्यसेचनद्वारा स्त्रियः गर्भाशयं गच्छति गर्भः१६ । प्रथमे एव रात्रौ अण्डेन सह योगेन कललम् इति रूपं प्राप्नोति । पञ्चदिनानन्तरं बुद्बुदम् इति रूपं प्राप्य दशसु दिनेषु मांसं भवति । एकमासानन्तरं शिरः उद्भवति । मासद्वयानन्तरं हस्तपादौ इत्येवम् अवयवाः उत्पद्यन्ते । मासत्रये च नखाः, लोमानि, अस्थि, चर्म च उत्पद्यन्ते । चतुर्षु मासेषु रक्त- रुधिर- मज्जादि सप्तधातवः१७ उत्पद्यन्ते । पञ्चमासानन्तरं१८ अशनाया - पिपासे निर्मीयेते, तत्तु दृश्यते एव, यथा गर्भस्थस्य जीविनः इच्छानुसारेण एव माता आहाराधिकं स्वीकरोति । मातुः आहारद्वारा एव गर्भस्थः जीवी वर्धितो भवति । षष्ठे मासे गर्भे दक्षिणां दिशं गच्छति सः जीवी । अस्मिन् काले एव मातुः शरीरस्य अन्तः विद्यमानेभ्यः कृमिभ्यः दष्टः१९ भवति, पौनःपुन्येन मूर्छितो भवति जीवी । तदा च काले पूर्वजन्म स्मरणरूपविशिष्टशक्तिः२० जायते सर्वेषाम् अपि गर्भस्थानां जीविनाम्, पूर्वजन्मकृतपापेभ्यः इदं शरीरं पुनः लब्धम् इति ज्ञात्वा खेदः भवति तस्य जीविनः । सप्तमासानन्तरं ज्ञानशक्तिः उत्पद्यते, एवं अन्तिमक्षणपर्यन्तं विशिष्टशक्तिद्वारा भगवतः प्रार्थनां२१ कुरुते सः जीवी । गर्भसमये अपानेन वायुना प्रेरितः भवति क्षणे एव बहिः प्रपञ्चं प्रविशति । तदा श्वासगतेः विपरीतत्वात् पूर्वजन्मस्मरणादिविचारान् विस्मरोति, ज्ञानशक्तिः च नष्टा भवति । पुनः अस्मिन् अज्ञाने संसारे अज्ञानी भूत्वा पतति स्वकर्मानुसारम् । अयमेव विचारः आधुनिकवैद्यैः अपि स्ववैद्यकीयशास्त्रे प्रतिपादितं२२ वर्तते । एवं रूपेण उपजीव्यकाव्येषु अन्यतमे श्रीमद्भागवतमहापुराणे वर्तते आधुनिकी दृष्टिः२३।

**इदानीं तावत्गणित संबद्धाः विचाराः प्रस्तूयन्ते**

लीलावतौ तावत् विद्यते गणितसंबद्धाः अनेके विचाराः । अत्र च गुणाकारः कथं क्रियत्रे इति षट् उपायानि निरूप्यते । प्रथमतः विद्यते अयं विचारः प्रथमः अङ्कः यः वर्तते तस्य गुणाकारः करणीयः । तत्र श्लोकोयं विद्यते यत्"गुण्यान्त्यं अङ्कं गुणकेन हन्यात् उत्सार्य तेनैवमुपान्तिमादीन्"२४ इति ।

Multiply the Continue similarly add all. Then the last but one etc. last integer of the multiplicand by the multiplier these. २५

Multiplicand Multiplier

15 X 12
12 X 5 = 60
12 X 10 = 120
Adding 180

द्वितीयं विधानं विद्यते यत् अङ्कस्य विभागः करणीयः प्रथमं तदनंतरं अन्येन अङ्केन प्रत्येकं विभक्तः अङ्कः गुणितः भवेत् तदा अपि गुणाकारः सिध्यति ।" गुण्यस्त्वदोधो गुणखण्दतुल्यं तैः खण्डकैः सङ्गुणितो युतो वा "इत्यस्य अयमर्थः सिध्यति यत्–

Multiply the multiplicand by, Split the multiplier into parts each parts and add together. २६

Multiplicand Multiplier

15 X 12

12 = 8 + 4

15 X 8 = 120

15 X 4 = 60

Adding 180

एवं गुणाकारस्य विषये ज्ञायते वेदगणिताधारेण । अन्ये च क्रमाःअत्र न निरूपिताः, तेषांसुलभावगमत्वात्शोधपत्रदैर्घ्यभयाच्च । एवं सति लीलावतौ २७ तावत् वर्गं ज्ञातुं विचारत्रयं प्रस्तौति आचार्यः भास्करः । तत् विषये अपि किञ्चित् ज्ञातुं प्रस्तूयते अयं विचारः अत्र । प्रदत्तां सङ्ख्यां द्विधा विभज्य अनन्तरं प्रत्येकं सङ्ख्यां द्विगुणितं करणीयम् । अग्रे च प्रत्येकं संख्यायाः वर्गं सङ्कलनं करणीयं येन च प्रदत्तस्य वर्गः लभ्यते इति उच्यते ।" खण्डद्वयस्य अभिहतिर्द्विनिघ्नई तत् खण्ड वर्गैक्ययुक्ता कृतिर्वा" २८

Split the given number into two parts and add the sum of the square of these parts to twice the product of these parts २९

Example:

Square of 49

49 = 40 + 9

$49^2 = 2 X 40 X 9 + 40^2 + 9^2$

= 720 + 1600 + 81

= 2401

Referring to Algebra $(a + b)^2 = a^2 + b^2 + 2ab$

## शुल्बसूत्रोक्ताः केचनविचाराः प्रस्तूयन्ते

बौधायनः३० कृष्णयजुर्वेदसंबद्धतया धर्मसूत्राणि तथा शुल्बसूत्राणि प्रणिनाय । शुल्बसूत्रेषु विद्यते नैके विचाराः ये च आधिक्येनयज्ञवेद्यादि निर्माणं कथं करणियमित्यमुंविषयंनिरूपयन्ति । तत्र यागानुसारेण वेद्यादि-निर्माणं विभिन्नं भवति । अतः सः आचार्यः कानिचन सूत्राणि विलिख्य कथं च यज्ञवेदी भवेत् इति उवाच । तत्र बहुमुख्यतयापैथगोरस सिद्धान्तः ३१ इति अद्य यदुच्यते तत् प्रथमं स्थानम् आरोहति । इदं च सूत्रम् आरचितं ८००BC मध्ये एव, इत्युक्तौ पैथागोरस अपेक्षया सहस्रं वर्षेभ्यः प्राक्इत्यर्थः । परन्तु अस्माकं भारतियाः आचार्याः बौधायनापस्तंबकात्यायनाः गणिते आसक्ताः न आसन् परन्तु वेदेषु शास्त्रेशु तपस्सु च आसक्ताः आसन् । अतः कारणात् गणितसूत्रत्वेन परिगणनं न क्रियते चेदपि अस्य सिद्धान्तस्य

आरम्भः भारतियैः कृतं इत्यत्र नास्ति संशयः । सिद्धान्तोऽयं विव्रीयते अधुना-दीर्घ चतुरस्य मध्ये तिर्यङ् रूपेण एकां रेखां यदा लिख्यते तदा च सा रेखा अपरत्र विद्यमानरेखयोः संकलितं भवति इत्यर्थः । उदाहरणरुपेण अत्र निरूप्यते-"दीर्घचतुरस्य अक्ष्णया रज्जुः पार्श्वमानी तिर्यन्मानी च यत् पृथग् भूते कुरुतः तदुभयं करोति"३२ । कात्यायनोपि इममेव सिद्धान्तं प्रत्यपादि ।

The diagonal of a rectangle makes a square equal to the sum of the squares made by its vertical side and horizontal side separately. The diagonal of a rectangle makes a square equal to the sum of squares made by its vertical side and horizontal side separately. This is the knowledge of field that the diagonal of a rectangle makes a square equal to the sum of the squares made by its vertical side and horizontal side respectively. ३३

Example: ३४, ३५

The sides of the rectangle

ABCD are AD, DC and
diagonal AC. According to Sulba Suthra
ADHG+DEFC = □ACJJ or $AC^2 = AD^2 + DC^2$

## अग्निपुराणोक्तदिशामानवशरीरम्

पुराणानि यद्यपि उपजीव्य काव्यानि सन्ति तथापि न केवलं वेदेषु विद्यमानान् विचारान् वदन्ति परन्तु तत् तत् कालीनसामाजिकव्यवस्था अपि निरुप्यन्ते । पुनः तस्मिन् काले विद्यमानाः भौगोलिकविचाराः३६, नद्यः३७, पर्वताः३८, ऋषयः३९ इत्येवं अनेके विचाराः प्रस्तूयन्ते । एतानि च महापुराणनि अष्टादश यानि सन्ति तानि कृष्णद्वैपायनेन व्यासेन लिखितानि४० सन्ति इति प्रतीतिः वर्तते । तेषु पुराणेषु अन्यतमं वर्तते अग्निपुराणं, तस्मिन् च पुराणे वर्तते यत्शरीरे विद्यमानानि अङ्गानि कानि इति । एवं पुराणमिदं मानव- शरीरस्य अपि अध्ययनार्थं बहुपूर्वमेव अवकाशम् अकल्पयत् । तस्मिन् च पुराणे विद्यमानोयं विचारः प्रस्तूयते । ४१प्रथमतः पुराणमिदं कथयति चतुर्विध- प्रलयानां विषये, ते च सन्ति नित्यः नैमित्तिकः प्राकृतः आत्यन्तिकः४२ च इति । अन्तिमद्वयं आत्मनः ऐक्यता संबद्धम् अथवा आध्यात्मिकं वर्तते । तत्र कथं जीवात्मा परमात्मना सह अभेदं प्राप्नोति पुनः च देहात् देहान्तरं कथं गच्छति जीवात्मा इति उच्यते ४३ । एषा चर्चा गर्भतः आरभ्य मानवशारीरिकविज्ञानं उक्त्वा अग्रे कथं सः जीवः साधयेत्, अन्तिमं लक्ष्यं च आप्नुयात् इति उच्यते । शुक्रशोणित संलग्नं ऋतुकाले न भवेत् पुनश्च ऋतुकालात् ४४ अनन्तरं षोडश दिनेषु भवेत्तदा गर्भः जायते इत्युच्यते । पूर्वमेव गर्भोपनिशद्युक्त विचाराः प्रस्तुताः इत्यतः पुनः तद्विषये प्रयासः न विधीयते । अस्मिन्विचारे आधिक्येन समानाः एव अंशाः चरकसुश्रुत वाग्भटविष्णुधर्मोत्तराग्निपुराणेषु विद्यते । अग्नि पुराणे तावत् उच्यते ३६१ अस्थीनि सन्ति इति परन्तु सुश्रुतादयः दन्तान् तथा लघु अस्थीनि अपरिगणय्य २०६/३०० इत्येवं स्वविचारान् वदन्ति ।

## उपसंहारः :

भारतीयज्ञानपरंपरायां वैज्ञानिकविचाराः इत्युपक्रान्तः अयंविचारः अत्र उपसंह्रियते । अस्मिन् च शोधप्रबन्धे दर्शितं अथवा निरूपितं वलं परिचयात्मकं तथा नूतनादृष्टिः भवतु इति धिया । यदि वयं सर्वं सम्यक्शोधं कर्तुं प्रयत्नं कुर्मः तर्हि विशिष्टः विचारः उद्भवत्येव प्रत्येकस्मिन्शास्त्रे । अतः वेदाः इत्युक्तौ चारुवादिनां भण्डधूर्तनिशाचरानां गानं न परन्तु तत्र विद्यते आचारः, विचारः, जीवनशैली, परिसरः, आध्यात्मिकता, संस्कृतिः, वैज्ञानिकता च इत्यवगम्य तत्रत्य चिन्तनं सम्यक्विचारणियं शोधच्छात्रैः इत्यभिप्रायः ।

## पादटिप्पणी-

१. विश्वामित्रवसिष्ठादयः । २. कृष्णद्वैपायनः व्यासः । ३. मनुयाज्ञवल्क्यादयः । ४. गौतमकणादकपिलादयः ।
५. वाचस्पत्यम् । ६. तैत्तिरीयसंहिता । ७. विशिष्टं ज्ञानं विज्ञानम् । ८. संज्ञानं विज्ञानम् आज्ञानम् .....
ऐतरेयोपनिषत् । ९. कूर्मपुराणम् १४.६ । १०. दधीचिपुत्रः प्रश्नोपनिषदः प्रवक्ता आचार्यः पिप्पलादः ।

११. मुक्तिकोपनिषद्युक्ता अष्टोत्तरशतोपनिषत्सु एका १२. पञ्चात्मकं पञ्चसु वर्तमानं षडाश्रयं षड्गुणयोगयुक्तम् । तत् सप्तधातु त्रिमलं द्वियोनि चतुर्विधाहारमयं शरीरम् ॥ भवति पञ्चात्मकमिति कस्मात् पृथिव्यापस्तेजोवायुराकाशमिति अस्मिन् पञ्चात्मके शरीरे । का पृथिवी का आपः किं तेजः को वायुः किमाकाशम् । तत्र यत् कठिनं सा पृथिवी, यद्द्रवं ता आपो, यदुष्णं तत्तेजो, यत् संञ्चरति स वायुः, यत् सुषिरं तदाकाशमि-त्युच्यते । तत्र पृथिवी धारणे, आपः पिण्डीकरणे, तेजः प्रकाशने, वायुर्गमने, आकाशमवकाशप्रदाने । पृथक् क्षेत्रे शब्दोपलब्धौ त्वक् स्पर्शे चक्षुषी रूपे जिह्वा रसने नासिका आघ्राणे उपस्थश्चानन्दने अपानमुत्सर्गे बुद्ध्या बुद्ध्यति मनसा सङ्कल्पयति वाचा वदति । षडाश्रयमिति कस्मात् मधुराम्ललवणतिक्तकटु-कषायरसान् विन्दते । षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादाश्चेति । इष्टानिष्टशब्दसंज्ञाः प्रणिधानाद्दशविधा ।

१३. पुमान् रेतः सिञ्चति योषितायां बह्वीः प्रजाः पुरुषात् संप्रसूताः । मुण्डकोपनिषत्, २.१.५ १४. व्याकुलितमनसः अन्धाः खञ्जाः कुब्जाः वामनाः भवन्ति । १५. श्रीमद् भागवतम् ।

१६. रेतः सिञ्चति योषितायाम् (उपनिषद् वाक्यम् ) १७. रस-रक्त-मांस-मेधा-अस्थि-मज्जा-शुक्राः । १८. Internet Image । १९. शिवापराधक्षमापनस्तोत्रम् (आदिशङ्कराचार्याः) २०. शिवापराधक्षमापन- स्तोत्रम्(आदिशङ्कराचार्याः) २१. शिवापराधक्षमापनस्तोत्रम् (आदिशङ्कराचार्याः) २२. Medical Science, https://www.webmd.com./baby/ss/slidesho-fetal-development २३. श्रीमद् भागवतम्,३-३१-१ । २४. गुणनकर्मणि सङ्ग्रहश्लोकः।
(Six Methods for Multiplication, Scientific Thoughts of India Book I -Methematics by Dr. C. Krishna Nambudiri) २५. (Six Methods for Multiplication, Scientific Thoughts of India Book I -Methematics by Dr. C. Krishna Nambudiri)
२५. (Six Methods for Multiplication, Scientific Thoughts of India Book I -Methematics by Dr. C. Krishna Nambudiri) २६. गुणनकर्मणि सङ्ग्रहश्लोकः । (Six Methods for Multiplication, Scientific Thoughts of India Book I -Methematics by Dr. C. Krishna Nambudiri) २७. लीलावतौ, भास्कराचार्यः । २८. लीलावतौ, भास्कराचार्यः २९. Six Methods for Multiplication, Scientific Thoughts of India Book I -Methematics by Dr. C. Krishna Nambudiri ३०. कृष्णयजुर्वेदीय-शुल्बसूत्र-धर्मसूत्रादिप्रणेता । ३१. A2 + B2 = C2 ३२. बोधायनशुल्बसूत्रम्, १.१२ तथा आपस्तम्बशुल्बसूत्रम् । ३३. Six Methods for Multiplication, Scientific Thoughts of India Book I -Methematics by Dr. C. Krishna Nambudiri ३४. Internet Image ३५. Six Methods for Multiplication, Scientific Thoughts of India Book I -Methematics by Dr. C. Krishna Nambudiri ३६. जम्बूद्वीपादिवर्णनम्, भागवतमहापुराणम् ।
३७. सप्तसिन्धवः, ऋग्वेदः, (असिक्नियामरुद्वृधे, ऋग्वेदः, १-७५-५) करीषिणी-मसिक्नीं च कुशचीरं च महानदीम् (महाभारतम्, ६-९-२३) ३८. महाभारतम्, १-४८-८, महेन्द्रो मलयः सह्यो शुक्तिमान् ऋक्षपर्वतः । विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ॥ (पुराणानि, मत्स्य-शिव-स्कन्दादयः) ३९. सनक-सनन्दन-सनत्कुमार-सनत्सुजातयः ऋषयः । ४०. अष्टादशपुराणेषु व्यासस्य वचनं द्वयम् । परोपकारः पुण्याय पापाय परपीडनम् ॥ ४१.अग्निपुराणम् । ४२. भागवतस्कन्धः, १२, अध्यायः, ४ । ४३. अग्निपुराणम् । ४४. अग्निपुराणम् ।

## ग्रन्थर्णम् :


- श्रीमद्भागवतमहापुराणम्, गीताप्रेस्स्गोरख्पुरम्
- अग्निपुराणम्, गीताप्रेस्स्गोरख्पुरम्
- उपनिषत्, शाङ्करभाष्यम्
- आयुर्वेदःअष्टाङ्गहृदयम्
- Mishra B B, Polity in the Agni Purana, Cal., 1965, p 204
- Scientific Thoughts of India Book I – Mathematics by Dr. C Krishnan Nambudiri
- बौधायनधर्मसूत्रम् (Online Internet Archive)
- याज्ञवल्क्यस्मृतिः(Online Internet Archive)



**Ganesh Bhat**
Research Scholar
Amity School of Liberal Arts
Department of Sanskrit and Performing Arts
Amity University, Haryana
Amity Education Valley
Gurugram (Manesar)-122413, Haryana State
Mobil No. : 9008691205
E-mail : bhat.gani@gmail.com


********

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# अभिधामूलका व्यञ्जना

**Dr. Rekhadevi S.H,**
Assistant Professor,
faculty 0f language and literature
Karanataka Sanskrit university, Bangluru

काव्यव्यापारे ये शब्दाः कविना प्रयुज्यन्ते तेषां प्रयोगस्य कानिचित् मूलप्रयोजनानि सन्ति । कविः किंचित् विशिष्टार्थं मनसि निघाय काव्यं रचयति । तस्य अर्थस्य वहनं पाठकस्य कृते यया शकत्या क्रियते सा व्यजञ्जना इत्युच्यते । साहित्यदर्पणे कविराजविश्वनाथः व्यञ्जनायाः व्याख्यां निम्नदर्शिताभ्याम् पङ्क्तिभ्यां करोति ।

"विरतासु अभिधाद्यासु यथाऽर्थे बोद्यते परः ।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च" ॥ इति ।

अभिधादयः शक्तयः स्वस्य अर्थबोधनस्य कार्यं कृत्वा शान्ताः भवन्ति । तदनन्तरम् अन्यस्य अर्थस्य बोधनं या वृत्तिः करोति सा व्यञ्जना इत्युच्यते । सा व्यञ्जनावृत्तिः शब्दे च अर्थे च वर्तते ।

काव्यप्रकाशे मम्मटाचार्यः ' गङ्गायां घोषः ' इति उदाहरणद्वारा व्यञ्जनायाः व्याख्यां करोति । उदाहरणे 'गङ्गा ' शब्दस्य मुख्यार्थः – जलप्रवाहः – तटः, प्रयोजनानि– पवित्रता, शितलता, अदिनि । व्यञ्जनाया व्याख्या

"तटादौ ये विशेषाः पावनत्वादयः ते च् अभिधा–तात्पर्य लक्षणाभ्यः व्यापारान्तरेण गम्याः । तच्च व्यञ्जन–ध्वनन–द्योतनादि शब्दवाच्यमवश्यमेषितव्यम् "। इति

इयं व्यञ्जना द्विधा भवति ।

१. लक्षणामूलका वा अर्थी–व्यञ्जना
२. अभिदामूलका वा शब्दी–व्यञ्जना

**अभिधामूलका व्यञ्जना**

अभिधामूलकायाः व्यञ्जनायाः स्वरुपं मम्मटाचार्येण काव्यप्रकाशे एकस्मिन् श्लोके वर्णितमस्ति ।

**" अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते । "**
संयोगाद्यैः अवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ॥ इति

"श्लोकस्य अर्थः अनेकार्थस्य शब्दस्य अभिधाशक्तिः संयोगादि सम्बन्धद्वारा नियन्त्रिता भवति । तथापि तदनन्तरं यः व्यापारः वाच्यार्थभिन्नस्य अर्थस्य ज्ञानं कारयति सः व्यापारः व्यञ्जना इत्युच्यते । अत्र यतः आदौ केवलं अभिधाव्यापारो**S**स्ति । अतः इयं व्यञ्जना अभिधामूलका शब्दी–व्यञ्जना इति कथयते ।

अभिधाशक्तेः वाचकत्वस्य नियन्त्रणम् ममटाचार्येण व्याख्यायाः कृते श्लोके 'संयोगाद्यैः' इति पदं दृश्यते । संयोगादयः अनेके संम्बन्धाः अनेकार्थस्य शब्दस्य विविधेषु अर्थेषु कञ्चित् निश्चितार्थं ज्ञापयितुं कारणभूताः भवन्ति । ये अभिधाशक्तिं कुर्वन्ति ते सम्बन्धाः के के तत्तु आचार्येण भर्तुहरिणा तस्य वाक्यपदीये व्दयोः श्लोकयोः दत्तमस्ति । यथा –

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं. शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वादयः ।
शब्दार्थस्यानवच्छेदे विशोषस्मृतिहेतवः ॥

निर्दिष्टानां सम्बन्धानां अर्थाः

- संयोगः – प्रसिद्धः सम्बन्धः ।
- विप्रयोगः – प्रसिद्धस्य सम्बन्धस्य विनाशः विभागः वा ।
- साहचर्यम – एकस्मिन समये एकव्स्मिन स्थाने वा स्थितिः अथवा एकस्मिन कार्ये परस्परस्य अपेक्षा ।
- विरोधिता – परस्परस्य नाशनं वा परस्परेण सह न भवनम् ।
- अर्थः –तत्फलम यत्प्रयोजनेन अन्येन वा सिद्धं न भवति ।
- प्रकरणम् – अम्प्रासङ्गिकवस्तुनः वक्तुः वा बुद्ध्यां स्थितिः अथवा प्रसङ्ग.ः संगतिर्वा
- अन्यस्य शब्दस्य सन्निधिः – वाक्ये अन्यस्य शब्दस्य सामीप्यम् ।
- सामर्थ्यम् – अनेकेषु अर्थेषु एकस्मिन् अर्थे विद्यमाना शक्तिः या वाक्यस्य अन्वयं योग्यरीत्या अन्वयं योग्यरीत्या कर्तुं शक्नोति ।

- औचिति – योग्यता ।
- देशः _ स्थलवाचकः सन्दर्भः ।
- कालः _ समयवाचक सन्दर्भः ।
- व्यक्तिः – लिङ्ग.म् _ स्त्रीलिङ्ग.;, पुल्लिंगं इत्यादयः ।
- स्वरादयः – उदात्त, अनुदात्तः इत्यादयः स्वराः आदयः इति पदेन अभिनयादिसम्बन्धाः सूचिताः भवन्ति ।

सम्बन्धानां उदाहरणसहितं विवरणम्

मम्मटाचार्येण भर्तुहरिणा निर्दिष्टानां सम्बन्धानां कानिचित् उदाहरणानि दत्तानि सन्ति ।

तेन प्रत्येकस्य सम्बन्धस्य स्वरुपं स्पष्टं भवति ।

**१. संयोग्ः तथा विप्रयोगः**

- **उदारणम्**

शङ्क.चक्रो हरिः अशङ्क.चक्रो हरिः इत्युच्यते ।

- **विवरणम्**

कोषानुसारेण 'हरि' इति शब्दस्य बहवः अर्थाः सन्ति । यथा यमनिलेन्दुचन्दार्कविष्णुसिंहांशुवाजिषु । शुकाशिकपिभेकेषु ह्रिर्ना कपिले भिषु इति । अत्र हरि शब्दस्य यमः , इन्द्रः, अनिलः, विष्णुः, आदयः अर्थाः दर्शिता सन्तिअ । किन्तु सशङ्क.चक्रो हरिः

इत्यस्मिन् शङ्खः, चक्रं, एताभ्यां संयोगेन वियोगेन वा (अशङ्क.चक्रो हरिः) हरिः शब्दस्य वाचकता 'भगवान् विष्णु' इत्यर्थे नियन्त्रिता भवति ।

यथा शङ्खः चक्रं च एतायोः संयोगः विष्णुना सह भवति तथैव तयोः वियोगः तेनेव सह भवति । यतः वियोगः तथैव भवति यत्र तत्पूर्वं संयोगः भूतोऽस्ति । शङ्ख.चक्रयोः संयोग वियोगः वा विष्णुं विहाय (अन्येषु अर्येषु) न दृश्यते ।

अन्यमुदाहद्रणम्– सवत्सा धेनुः, अवत्सा धेनुः ।

२. **सहचर्यम्** –

- **उदाहरणम्**

" रामलक्ष्म्णविति दशरर्था "।

- **विवरणम्**

विश्वकोशानुसारं 'राम ' इति शब्दस्य अनेके अर्थाः सन्ति । यथा रामः पशुविशेषे स्यात् जमदग्न्ये हलायुधे ।

राघवे वासिते श्वेते मनोज़्**ऽपि च वाच्यवत् ।**

अत्र 'राम' शब्दस्य बलरामः, परशुरामः, रघव, सुन्दरः, श्वेतः आदयः अर्थाः सन्ति ।

'लक्ष्मणः' इति शब्दस्यापि दशरथपुत्रः, सारसः, दुर्योधनपुत्रः आदय अर्थाः सन्ति ।

किन्तु ' रामलक्ष्मणौ ' इत्यस्मिन् प्रयोगे राम इति शब्दस्य वाचकता दाशरथिः राम । इत्यर्थे नियन्त्रिता भवति ।

अपि च लक्ष्मणः इति शब्दस्याति वाचकता दाशरथिः लक्ष्मणः इत्यर्थे नियन्त्रिता भवति ।

एवः व्दयोरपि शब्दयोः अन्यानां अर्थानां व्यावृत्तिः सहचार्यसम्बन्देन भवति ।

**३. विरोधिता**

- **उदाहरणम्** : रामार्जनगतिस्तयोः इति भार्गवकार्थविर्ययोः ।
- **विवरणम्**

उदाहरणे रामः तथा अर्जुनः इति पदव्दयं दृश्यते । तयोः इति पदेन केचित् व्दौ यौ परस्परस्य विरोधितौ स्तः सूचितौ भवतः । अतः रामस्य अर्जुनस्य च व्दयोर्मध्ये यव्दत् विरोधः असीत् तव्दत् विरोधः प्रस्तुतयोः द्वयोर्मधे अस्ति इति सूचितं भवति ।तेन 'रामः' 'इत्यस्य अर्थः अन्यान अर्थान् विहाय भार्गवः परशुरामः' इति निश्चितः भवति । तथैव 'अर्जुनः' इति निश्चितः भवति । एवं विरोधितया व्दयोः पक्ष्योः अन्येषां अर्थानां व्यावृत्तिं भूत्वा विवक्षितौ अर्थौ मात्र प्रतीयेते ।

४. **अर्थः**

- **उदाहरणम्**

+"स्थाणुं भज भवच्छिदे इति हरे ।"

**विवरणम्**

उदाहरणे स्थाणु इति पदं दृशते । सामान्यतः तस्य अनेके अर्थाः सन्ति । यथा–(कोशानुसारम्)

स्थाणुर्वा ना ध्रुवः शङ्क.ः 'स्थाणु रुद्र उमापतिः' इत्यादयः । किन्तु वाक्ये 'भावच्छिदे पदमस्ति । तस्य अर्थः

'जन्ममरणयोःचक्रतः मुक्तिः' इति । तेन 'स्थणु' शब्दस्य अर्थस्य
वाचकता 'जन्ममरणरुपचक्रतः मुक्तिः' इति प्रयोजनेन 'भगवान् शिवः' इत्यस्मिन् अर्थे एव नियन्त्रिता भवति ।
५ **प्रकरणम्**
प्रकरणम् इत्यस्य अर्थः काच्छित् प्रसङ्ग.ः सन्दर्भः वा ।

- **उदाहरणम्**

" सर्वं जानाति देव इति युष्मदर्थे " ।

- **विवरणम्**

उदाहरणे प्रयुक्तस्य 'देव' इत्यस्य सामान्यतः बहवः अर्थाः सन्ति । कोशानुसारम्
'अमरा निर्जरा देवास्मिदशा विबुधासुराः' 'राजा भटारको देवः' । 'देवो मेघे सुरे राज्ञि' – इत्यादयः ।
'देव' इति पदस्य वाचकता प्रकरणेन कारणेन 'युष्मद्' शब्दस्य अर्थेन प्रस्तुतः 'राज' इत्यर्थे एव निअयन्त्रिता भवति ।
६. **लिङ्ग.म्**

- **उदाहरणम्**

"कुपितो मकरध्वजः इति कामो ।"

- **विवरण्**

उदाहरणे 'मकरध्वजः' इति पदमस्ति । तस्य अर्थः समुद्रः, कामः इत्यादयः। किन्तु वाक्ये 'कुपितः' इति पदमपि अस्ति ।
अतः 'मकरध्वजः' शब्दस्य वाचकत कोपोलिङ्गे.न (चिन्नेन) 'कामदेवः' इत्यर्थे नियन्त्रिता भवति ।
७. **अन्यस्य शब्दस्य सन्निधिः**
* **उदाहरणम्**
"देवस्य पुरातेः इति शम्भौ ।"

- **विवरणम्**

सामीप्यात् शिवशङ्क.रः इत्यर्थे नियन्त्रता भवति । शिवं विहाय अन्यः कोपि देवः पुरः शत्रुः (अरातिः)
८. **सामर्थ्यम्**
* **उदाहरणम्**
" मधुना मत्तः कोकिलः इति वसन्ते ।"
मधु शब्दस्य बहवः अर्थाः सन्ति । यथा मधु पुष्परसे क्षौद्रे मद्ये ना तु मधुद्रुमे । वसन्त दैत्यभिद्यैत्रे स्याज्जीवन्त्यां तु योषिति । इत्यादयः । मधु शब्दस्य वाचकता वसन्तऋतोः समर्थ्येन कारणेन वसन्त इत्यर्थे निअयन्त्रिता भवति । वसन्तं विहाय अन्यः अर्थः कोकिलं मत्तं कर्तुं न शक्नोति । तादृशं सामर्थ्यं अन्यस्मिन् नास्ति ।
९. औचितिः
* उदाहरणम्
' पातु वो द्यितामुखम् इति सामुख्ये ।'
* विवरणम्
मुखम् इति शब्दस्य अनेके अर्थाः सन्ति । यथा–मुखं निःसरेणे वक्त्रे प्रारम्भो पापयोरपि । सन्ध्यन्तरे नाटकादेः **श्ब्दऽ पि च नपुंसकम् इत्यादयः**
**'मुख' शब्दस्य वाचकता 'उत्कण्ठितस्य मनोरथस्य साफत्यं' इति औचित्येन कारणेन सामुख्य (अनुकूलता) इत्यर्थे निअयत्रिता भवति ।**
१०. देशः
उदाहरणम्– "भाति अत्र पर्मेश्वर इति राजधानिरूपात् देशात् राजनि"
* विवरणम्
परमेश्वर पदस्य बहवः अर्थाः सन्ति । यथा–विष्णुः शिवः राजा इत्यादयः । परमेश्वरः इति पदस्य वाचकता राजधानिरूपेण देशेन कारणेने 'रूज' इत्यर्थे नियन्त्रिता भवति ।
विष्णोः शोभा वैकुण्ठे भवति । शिवस्य शोभा कैलासे भवति । किन्तु राजधान्यां राज्ञः एव शोभा भवति ।
११. **कालः**
* **उदाहरणम्**
"चित्रभानुर्विभाति इति दिने खौ रात्रौ ।"

- **विवरणम्**

चित्रभानु शब्दस्य अनेके अर्थाः सन्ति । तथा विचित्रकिरणयुक्तः सूर्यः अग्निः इत्यादयः ।'दिनम्' तथा रात्रिः व्दावपि काल वाचकौ शब्दौ । दिने इति पदेन चित्रभानुः इत्यस्य अर्थः सूर्यः इत्यर्थे तथा रत्रौ इति पदेन तस्य अर्थः वह्निः इत्यर्थे नियन्त्रितः भवति । दिने सूर्यस्य शोभा तथा रत्रौ अग्नेः शोभा वर्तते ।

१२. **व्यक्तिः**

अत्र् व्यक्तिः शब्दस्य लिङ्गः इत्यर्थे (पुलिङ्ग. , स्त्रीलिङ्गः आदयः)

* **उदाहरणम्**

" मित्र भाति इति सहृदि । मित्रे भाति इति खौ ।"

- **विवरणम्**

मित्रं शब्दस्य बहवः अर्थाः सन्ति । यथा सूर्यः सुहृद् आदयः ।

'मित्रं' शब्दस्य वाचकता 'व्यक्तिः' इति कारणेन नियान्त्रिता भवति । 'मित्रं' शब्दः नपुंसकलिङ्गे. अस्ति चेत 'सुहृद' इति अर्थः, अपि च पुल्लिङ्गे. अस्ति चेत् 'सूर्यः' इति अर्थः सूचितः भवति ।

१३. **स्वरः**

* **उदाहरण्म्**

'इन्द्रशत्रुः' इत्यादौ वेद एव, न काव्ये स्वरो विशेषप्रतीतीकृत्

विवरणम् ।

'इन्द्रशत्रुः' इति पदस्य विग्रहः तत्पुरुषसमासप्रकारेण तथा बहुव्रीहिसमासप्कारेण कर्तुं शक्नुमः।

ततपुरूषसमासप्रकारेण – इन्द्रस्य शत्रुः अत्रः अनुदातः स्वरः भवति । तेन इन्द्रस्य मरणम् सूचितं भवति ।

बहुव्रीहि प्रकारेण – इन्द्रः शत्रुः यस्य सः । तत्र उच्चस्वरः उअदात्तः भवति । इन्द्र द्वारा तस्य शत्रोः नाशनं सूचितं भवति ।

एवं उदातादि स्वरां वेदे एव विशेषार्थं सूचितमयन्ति । न काव्ये ।

१४, **आदिग्रहणम्**

* **उदाहरणम्**

एतावन्मात्रस्तानिका एतावन्मात्रभ्याम् अक्षिपत्राभ्याम् ।
एतावन्मात्रावस्था एतावन्मात्रैं दिवसैः ॥

**विवरणम्**

विरहिणोनायिकायाः वर्णन् अत्र दृश्यते । किन्तु तद्वर्णनं दूर्तमुखेन अन्यस्त्रियाः मुखेन वा कृतमस्ति । शब्दैः सह सा हस्ताभ्याम् अभिनयं करोति । अतः शब्देषु प्रत्यक्षविशेषाणानि न दृश्यते किन्तु अभिनयसम्बान्धितानि सर्वनामानि दृश्यन्ते ये अभिनय विना अर्थं निश्चितं कर्तुं न श्क्नुवन्ति । अतः अत्र अभिनय – सम्बन्धः शब्दानं वाचकता नियन्त्रिता करोति ।

**अभिधामूलका–व्यञ्जनायाः उदाहरणम्**

उपरिनिर्दिष्टैः विविधैः सम्बधैः अनेकार्थस्य शब्दस्य वाचकता नियत्रिता भवति । एवं अस्ति चेदपि क्वचित् अनेकार्थः शब्दः कस्यपि अन्यस्य अर्थस्य प्रतिपादनं करोति तत्र अभिधा व्यपारस्य शब्दः कस्यपि समाप्तं भूत्वा व्यञ्जनाया अन्यस्य अर्थस्य बोधनं भवति । यतः अत्र मुख्यार्थबाधाः नास्ति अतः लक्षणापि नास्ति । इदं अभिधामूलका–व्यञ्जना एकेन उदाहरेण स्पष्टं भवति ।

अत्र कस्यचित् राज्ञः वर्णनं क्रियते ।

भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य ।
यस्यानुपप्लवगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत् ॥

इदं वर्णनाम् यथा राज्ञा सह सम्बध्यते तथैव हस्तिना सह अपि सम्बध्यते ।

व्दयोः पक्षयोः श्लोकस्य अर्थः पश्याम ।

**राजापक्षे अर्थः**

मनसा शुध्दः / सुन्दरः, शत्रुभिः अतिरस्कृतः, विशालकायः, उन्नतवंशो उन्नतः / प्रसिध्दः, विशालोन्नतः, शरसंधाने दृढः तथा अभ्यास्तः, अविरतसंपन्नः,सत्पुरुषाणां इतकर्ता एवं श्त्रूणां निवारहिता राजा यस्य हस्तः निरन्तरं कृतेन शोभितः आसीत् ।

**हस्तिपक्षे अर्थः**

भद्र नाम्ना हस्तिनां जात्यां जातः, उन्नत्वेन यस्य आरोहणं कठिनं तव्दत् शरीरधारी, तृणध्वजेन सम् उन्नतः, मदजलसुगन्धेन अकृष्टाः अलयः तैः परिवृत्तः, तृणध्वजेन सम् उन्नतः, मदजलसुगन्धेन अकृष्टाः अलयः तैः परिवृत्तः,

धीरगम्भीरचलनयुक्तः श्रेष्टः हस्ति यस्य शुण्डः निरंतरं स्रवता जलेन शोभनः आसीत् ।

**विवरणम्**

अस्मिन् उदाह\रणए् प्रस्तुतः 'राजा' इति वाच्यार्थः तथा अप्रस्तुतः 'हस्ती' इति व्यङ्ग्यार्थः स्तः । 'भद्रात्मनः' इत्यादीनां अनेकार्थानां शब्दानां अर्थेषु अभिधाशक्तया प्रकरणसम्बन्धव्दारा ' राजा तथा तदन्विताः योग्याः अर्थाः' ' हस्ती तथा तदन्विताः योग्याः अर्थाः प्राप्नुवान्ति । इदं सर्वं व्यञ्जनाव्यापारेण भवति । यदा 'अनेकविशेषणयुक्तः हस्ती' एतस्य अर्थस्य ज्ञानं भवति तदा राजा तथा हस्ती इति व्दयोः अर्थयोः उपमान–उपमेय भावः व्यञ्जनया प्रतीयते ।

**उपसंहारः**

अनेकार्थ शब्दस्य वाचकता विविअधैः सम्बन्धैः एकस्मिन् अर्थ अभिधया नियन्त्रिता भवति तदनन्तरं क्वचित् अन्यस्य अर्थस्य प्रतीतिः भवति । सा प्रतीतिः व्यञ्जनाव्यापारेण भवति । यतः आदै अभिधया अर्थ निर्धरणं भवति अतः इयं व्यञ्जना अभिधमूलका इत्युच्यते ।

**परामर्शनग्रन्थसूचि**

१. काव्यप्रकाश (मम्मटाचार्य)
२. भारतीयकाव्यमीमासे (कन्नड)
३. तुलनात्मक अध्ययन (कन्नड)
४. काव्यप्रकाश हिन्दि व्याख्यान

**Dr. Rekhadevi S.H,**
Assistant professor,
faculty 0f language and literature
Karanataka Sanskrit university
PMK road, chamarajpet, Bangluru 560018
M – 9591071457,
E – rekhasreenivasaclk@gmail.com

********

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# श्रुतिप्रत्यक्षयोः विरोधपरिहारविचारः

**डा. गणपति वि. हेगडे**
प्रभारी प्राचार्य,
असिस्टेण्ट प्रोफेसर अद्वैतवेदान्तविभाग
मुम्बादेवी आदर्श संस्कृत महाविद्यालय
मुम्बई भारतीय विद्या भवन, मुम्बई

श्रीमदप्पय्यदीक्षितेन्द्राणां नैके ग्रन्थाः अद्वैतवेदान्तदर्शनसम्बद्धाः परिमलन्यायरक्षामणि प्रभृतयः सन्ति । तेषु शास्त्रसिद्धान्तलेशसंग्रहः विशिष्टः वर्तते । ग्रन्थेऽस्मिन् प्रधानशास्त्रसिद्धान्तभेदाः सङ्कलिताः, सोपपत्तिनिरूपिताश्च सन्ति । अत्र प्रतिपाद्यमानानां समेषां सिद्धान्तानां मूलं भगवत्पादीयं भाष्यमेव । सिद्धान्तेषु अवान्तरभेदाः मन्दमतीनां बुद्धिशोधनायैव तस्मात् आचार्येषु अप्रामाण्यशङ्का न कर्तव्या । अकल्पितं ब्रह्मात्मैक्यं स्पष्टीकर्तुं कल्पितेषु विषयेषु मतभेदाः न दोषाय किन्तु भूषणमेव । तदुक्तम् वार्तिकाचार्यैः -

यया भवेत्पुसां व्युत्पत्तिः प्रत्यगात्मनि । सा सैव प्रक्रियेह स्यात् सा साध्वी सा चानवस्थिता ॥ इति ।

सिद्धान्तलेशसंग्रहे सर्वेषां वेदान्तानाम् अद्वैतपरत्वं प्रथमपरिच्छेदे प्रतिपादितं वर्तते । यज्जगतः अभिन्ननिमित्तोपदानकारणं ब्रह्म तदेव- प्रत्यगात्मचैतन्यस्वरूपम् । तेन जीवजगतोः ब्रह्मभेदः परास्तो भवति । सजातीयविजातीयस्वगतभेदराहित्यम् अद्वैतं सिध्यति । तदनु भेदविषय- प्रत्यक्षस्य अद्वैतश्रुतेश्च विरोधः सञ्जातः । घटः सन् इत्यादि प्रत्यक्षेण घटोपलक्षितचराचरप्रपञ्चस्य सत्ता प्रत्यक्षादिप्रमाणसिद्धा निर्विषया स्यात् । नाहमीश्वरः मनुष्योऽहमित्याद्यनुभवेन सार्वजनीनेन जीवपरभेदोऽपि जागर्ति । शारीरके आरम्भणाधिकरणे ब्रह्मणि अवगम्यमानम् इदमद्वैतं प्रत्याक्षादि- सिद्धेन भोक्तृ-भोग्यभेदेन बाध्यते इति पूर्वपक्षे व्यावहारिकं भोक्तृ भोग्यलक्षणं विभागम् अभ्युपगम्य समुद्रतरंगादिदृष्टान्तेन **“स्याल्लोकवत्”१** इति परिहारः उक्तः वर्तते । तदनुसारम् अप्पय्यदीक्षितेन्द्राः अविरोध- प्रतिपादनपरं द्वितीयपरिच्छेदं विषयविषयीभावसङ्गत्या प्रतिपादयन्ति तथैव बहुधा समाधानानि पूर्वाचार्यसम्मतानि प्रदर्शयन्ति । तत्रादौ तत्त्वशुद्धिकाराः प्रत्यक्षेण घटो वा तत्सत्तता वा न गृह्यते किन्तु अधिष्ठानभूतं सद् ब्रह्मैव गृह्यते इति कथयन्ति । तर्हि सत् सत् इत्येवं प्रतीतिः स्यात् । घटः सन् इति कथं प्रतीतिरिति चेत् मैवम् । यथा भ्रमस्थले इदमंशेन सह इन्द्रियव्यापरः रजतप्रतीतिस्तु भ्रान्त्या । एवम् अधिष्ठानेन सता सह इन्द्रियव्यापारः घटादि प्रतीतिस्तु भ्रान्त्या भवेत् ।

नन्विदं रजतं किन्तुशुक्तिरिति अनन्तरकालीनबाधदर्शनात् दृष्टान्तो न युज्यते इति चेन्न, प्रत्यक्षादिप्रमाणं न घटादि तन्निष्ठपारमर्थिकत्वं गृहणाति । किन्तु घटः सन् -इति घटाद्यनुविद्दं तदधिष्ठानं निर्विशेष- चिन्मात्रम्, इदमंशवत् । सर्वस्माद्भिन्नत्वेन प्रतीयमानं घटादिकं तु साक्षी- रूपभ्रान्त्या प्रतिभासते आरोपितांश इव । संप्रति प्रत्यक्षबाधो नानुभूयते तथापि इन्द्रियव्यापारदूर्ध्वं सर्वतो व्यावृत्त एव घट साक्षीरूपभ्रान्त्या भासते । ततः परं **“नेह नानास्ति किञ्चन”२** इति श्रुत्या त्रैकालिकमिथ्यात्वं प्रपञ्चस्य बोध्यते । एवं च जगतः मिथ्यात्वं श्रौतं ज्ञानं प्रमा । सत्यत्वं प्रात्यक्षिकं भ्रमात्मकमिति श्रुतिरेव प्रबला ।

न्यायसुधाकारमते यद्यपि चक्षुरादि इन्द्रियव्यापारः घटेन साकं भवति तथापि घटः सन् इत्यत्र अधिष्ठानस्यैव सत्ता गृह्यते न घटादेः । नीलो घटः इति प्रतीतौ नैल्यम् अधिष्ठानस्य न भवति । सद्रूपस्य ब्रह्मणः रूपाद्यभावात् नैल्यं तु घटस्यैव । जगदुपादानत्वश्रवणात् सर्वसम्मतत्वाच्च घटः सन् इत्यत्र उपादानगतसत्ता घटे प्रतीयते । कार्ये कारणातिरिक्तसत्ता स्वीकारे गौरवात् ।

सदेव सौम्य इति श्रुतिरेव ब्रह्मणः सद्रूपत्वे मानम् ।

संक्षेपशारीरकाचार्याणां मते पराग्विषयं प्रत्यक्षम्, प्रत्यग्विषया श्रुतिः भवति । तत्त्वावेदकं प्रमाणं श्रुतिः, अतत्त्वावेदकं प्रत्यक्षादि । घटादीनाम् अनावृतत्वात् तद्विषयकं प्रत्यक्षप्रमाणम् आभासमात्रम् । तस्मात् प्रत्यक्षस्य पराग्विषयघटादौ पृथक सत्वग्राहित्वेपि तस्य प्रमाणाभासत्वात् न तेन तत्त्वावेदकप्रमाणश्रुतिबाधः ।

केचित्तु - घटादिसत्वग्राहिप्रत्यक्षस्य स्थले अनुगतसत्ता प्रतीयते । सा च सत्ताजातिरूपा भवतु । इह घटः, इदानीं घट इत्यादिप्रतीतौ सत्ताजाति- रूपत्वेन वा तत्तद्देशकालसम्बन्धरूपत्वेन वा घटादिस्वरूपत्वेन वा मिथ्यात्वा- विरोधित्वात् श्रुतीनां न प्रत्यक्षविरोधः। अबाध्यत्वरूपसत्त्वस्य प्रत्यक्ष- ग्राह्यत्वेपि न मिथ्यात्वश्रुतिविरधः । कालत्रयाबाध्यत्वरूपसत्त्वमेव मिथ्यात्व- विरोधि तच्च ब्रह्मण एव भवति । प्रपञ्चस्य तु यावद्ब्रह्मज्ञानमबाध्यत्वरूपं सत्त्वं तच्च न मिथ्यात्वविरोधीति न मिथ्यात्वश्रुतेः प्रत्यक्षविरधः ।

अन्ये केचन वदन्ति - "**प्राणा वै सत्यं तेषामेष सत्यं**"[३] इति श्रुत्यनु- सारेण सत्यत्वं द्विविधम् । प्राणोपलक्षितप्रपञ्चस्य ब्रह्मणश्च अबाध्यत्व- रूपसत्यत्वं समानम् । तथापि त्रिकालाबाध्यत्वं ब्रह्मणः सत्वं व्यवहारकालीन अबाध्यत्वम् ब्रह्मज्ञानपर्यन्तम् अबाध्यत्वम् वा प्रपञ्चस्येति श्रुतिप्रत्यक्षयोः व्यवस्थाकल्पनात् श्रुतेः प्राबल्यं सिध्यति प्रत्यक्षेण गृह्यमाणं घटादिसत्वं ब्रह्मज्ञानोदयपर्यन्तम् । अपरे केचन कथयन्ति श्रुतिप्रत्यक्षयोर्विरोधे श्रुतिरेव बलीयसी यतः सा अपौरुषेया स्वतः प्रमाणभूता पुरुषदोषवर्जिता । प्रथमं प्रवृत्तमपि प्रत्यक्षं दोषशङ्का कलङ्कितम् । प्रथमं सर्पमिति पश्चात् रज्जुरिति प्रत्यक्षेणैव अनुभवति ।बहुत्र प्रत्यक्षेणैव प्रत्यक्षं बाधते क्वचित् शब्देन क्वचिद्युक्त्या । यथा -

तलवद् दृश्यते व्योम खद्योतो हव्यवाडिव । न तलं विद्यते व्योम (व्योम्नि) न खद्योतो हुताशनः ॥

तस्मात् प्रत्यक्षदृष्टेऽपि युक्तमर्थे परीक्षितुम् । परीक्ष्य ज्ञापयन्नर्थान्न धर्मात् परिहीयते ॥ ४

उपलभ्याप्सु चेद्गन्धं केचिद् ब्रूयुरनैपुणाः । पृथिव्यामेव तं विद्यादपो वायुं च संश्रितम् ॥ ५

इत्यादिभिः श्लोकैः प्रत्यक्षात् आगमप्राबल्यं सिद्धम् । अतः निर्दोषत्वात् श्रुतिः प्रबला अपच्छेदन्यायेनापि । परस्परनिरपेक्षयोः प्रमाणयोः पूर्वात् परस्य प्राबल्यम् अपच्छेदन्यायेन सिध्यति । तात्पर्यवती श्रुतिः प्रत्यक्षाद्बलवती न तु श्रुतिमात्रम् । उपक्रमादिषड्विधतात्पर्यलिङ्गैः अवगमिता तात्पर्यवती श्रुतिः प्रत्यक्षात् बलवतीति भामतीकाराणामाशयः ।

## पादटिप्पणी-

१. ब्रह्मसूत्रम्, २-१-१३ ।
२. बृहदारण्यकोपनिषत्, ४-४-१९ ।
३. बृहदारण्यकोपनिषत्, २-१-२०
४. नारदस्मृतिः ।
५. मोक्षधर्मपर्व, २३३-९ ।

## परिशीलितग्रन्थाः

१. ब्रह्मसूत्रम् (शाङ्करभाष्योपेतम्) - मोतिलाल बनारसीदास पब्लिशन् दिल्ली, १९९८ ।
२. भगवद्गीता - गोरखपुर प्रेस ।
३. वेदान्तपरिभाषा - प्रो. पारसनाथद्विवेदी, सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः, वारणासी २००० ।

४. उपनिषत् सन्देश - रामकृष्णाश्रम प्रकाशनम् ।
५. उपनिषद्भाष्यम् -१,२,३ - श्रीशङ्करभगवत्पादाचार्याः, श्रीदक्षिणामूर्तिमठ प्रकाशन वारणासी, २००४
६. अद्वैतसिद्धिः - श्रीमधुसूदनसरस्वती, चौखम्बा संस्कृतप्रतिष्ठान, वारणासी १९६५ ।
७. वेदान्तसारः - श्रीसदानन्दः, चौखम्बा कृष्णदास अकाडमी वारणासी, २००२
८. सिद्धान्तलेशसंग्रहः -श्रीमदप्पय्यदीक्षितः, चौखम्बा कृष्णदास अकाडमी वारणासी,२००२ ।
९. महाभारतम् - गीताप्रेस गोरखपुर-१९६५ ।
१०. नारदस्मृतिः - रत्ना पुस्तक भण्डार-१९९५ ।

**डा. गणपति वि.हेगडे**
प्रभारी प्राचार्य,
असिस्टेण्ट प्रोफेसर अद्वैतवेदान्तविभाग
मुम्बादेवी आदर्श संस्कृत महाविद्यालय
मुम्बई भारतीय विद्या भवन,
के.एम्.मुन्शी मार्ग, गिरगांव चौपाटी, मुम्बई - 400007
दूरभाषा- 9482944911
ईमेल्- ganapativg@gmail.com

********

**Journal of Veda Samskrita Academy, ISSN 2250-1711**
**Volume XVIII : July to December – 2021**

# तात्पर्यार्थवादः (तदर्थवादश्च)

**डा. मनमोहन तिवारी**
सहयुक्त आचार्यः (संस्कृतविभागः)
प्रो.राजेन्द्र सिंह (रज्जू भय्या) विश्वविद्यालयः प्रयागराजः

वाक्यार्थविचारकुशलाः तत्रभवन्तः मीमांसकाः पदार्थसंसर्गरूपं वाक्यार्थं वाच्यलक्ष्यव्यङ्ग्यव्यतिरिक्तेभ्यो स्वीचक्रुः। तदनु आचार्यशिरोमणिः काव्यशास्त्रीयमहाप्रबन्धं काव्यप्रकाशाख्यं ग्रन्थं वितन्वन् मम्मटोऽपि तात्पर्यार्थोऽपि केषुचित् इति तेभ्यो वाच्यलक्ष्यव्यङ्ग्येभ्यो पृथक् अभिहितान्वयवादं प्रतिपादयन् तात्पर्यार्थवादं तदर्थवादं वा प्रतिपादयामास। तत्र काव्यलक्षणघटकविशेष्यभूतशब्दार्थौ इति पदं विवेचयन् वाचकलाक्षणिक-व्यञ्जकश्चेति शब्दान् तथा वाच्यलक्ष्यव्यङ्ग्यभूतान् अर्थान् प्रतिपाद्य पदार्थसंसर्गरूपं वाक्यार्थं निरूपयामास।

स च तात्पर्यार्थः वाक्यस्य तात्पर्याख्यया शक्त्या बोधितः सन् प्रत्येकपदवृत्त्यविषयः अपदार्थोऽपि वाक्यार्थः बोधविषयको भवति।

**आकाङ्क्षायोग्यतासन्निधिवशाद्वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थः विशेषवपुः अपदार्थोऽपि वाक्यार्थः समुल्लसतीति अभिहिता- न्वयवादिनां मतम्।** काव्यप्रकाशे 2. उल्लासे

.प्रभाकरमीमांसकास्तु **वाच्य एव वाक्यार्थः** इति अन्वितानां पदार्था- नामभिधानम् अर्थात् अभिधया बोधं निरूपयन्ति अतोऽन्विताभिधानवादिनः इत्युच्यन्ते। कुमारिलभट्टैकदेशिनां मते तात्पर्यार्थोऽपि स्वीकृतः विद्यते। अत्र जिज्ञास्यते यत् के पुनः अभिहितान्वयवादिनः मीमांसकाः, नैय्यायिकाः, वैयाकरणाः वेदान्तिनः, आलङ्कारिकाः वा अन्यत्र दर्शनेषु प्रायः शब्दार्थयोः विचारस्य अप्रस्तुतत्वात्। का नाम तात्पर्याख्या शक्तिः इति।

**तात्पर्याख्याशक्तिः = स वाक्यार्थः परं प्रधानतया प्रतिपाद्यः येषां तानि तत्पराणि पदानि तेषां भावः तात्पर्यम्, तद्रूपा शक्तिः तात्पर्याख्या शक्तिरिति।**

***अथ च*** यथा पदार्थो व्यञ्जकः तथा वाक्यार्थोऽपि। अन्वयरूपे वाक्यार्थे पदानां शक्तिस्वीकारे गौरवम्, अतो पदानां पदार्थमात्रे शक्तिः अपि च अन्वयानामनेकविधत्वात् तत्र शक्तिस्वीकारे गौरवम्, परं वृत्तिं विनार्थबोधनेऽतिप्रसक्तिः स्यात् अतः पदार्थानां मिथोऽन्वयरूपे वाक्यार्थे शब्दस्य तात्पर्याख्या वृत्तिरभ्युपगन्तव्या। तत्प्रतिपाद्यस्य अर्थस्य तात्पर्यार्थतया व्यपदेशः।

**तात्पर्याख्यां वृत्तिमाहुःपदार्थान्वयबोधने। तदर्थं तात्पर्यार्थं वाक्यं तद्बोधकं परे॥** सा.द.द्वि.प. कारिका 20

अयमभिप्रायः यत्, पदानामभिधैकैकं पदार्थं बोधयित्वा उपक्षीणा अतो वाक्यार्थस्य (पदार्थानां मिथोऽन्वयरूपस्य) बोधिका तात्पर्याख्या वृत्तिः। अनया वृत्या बोधितोऽर्थः तात्पर्यार्थः इति। तद्बोधकञ्च वाक्यमिति अभिहितान्वयवादिनः आहुः। तद्यथा घटं करोत्यनेन घटवृत्तिकर्मत्वानुकूला कृतिरित्यर्थो बोध्यते। तत्र घटशब्दस्य घटोऽर्थः, अम् प्रत्ययस्य च कर्मतारूपोऽर्थः वृत्तिता न कस्यापि शब्दस्य अर्थः, अतोऽपदार्थोऽपि वृत्तितातात्पर्यवशाद् अनयोः संसर्गविधया भासते इति स्पष्टम्।

अभिहितान्वयवादे तु अभिधया केवलं पदार्थोपस्थितिः जायते। पदार्थानां परस्परसंसर्गरूपवाक्यार्थोपस्थितिः वाक्यस्य तात्पर्याख्यया शक्त्या भवति। अन्विताभिधानवादे तु अभिधयैव परस्परान्वितपदार्थोपस्थितिः जायते अतो अस्मिन्मते पदार्थसंसर्गरूपवाक्यार्थबोधाय तात्पर्याख्यायाः शक्तेः आवश्यकत्वन्नास्ति।

**विशिष्टाः पदार्थाः एव वाक्यार्थः न तु पदार्थानां वैशिष्ट्यम्।** काव्यप्रकाशे 5.उ.224

अभिधया बोधितानां पदार्थानामन्वयं वदन्ति इति तच्छीलाः अभिहिता- न्वयवादिनः, अभिधयैव परस्परान्वितपदार्थोपस्थितिं वदन्ति इति तच्छीलाः अन्विताभिधानवादिनः। उभयोः मतयोः वाक्यार्थ एव नाभिधया

बोध्यः, तावता तस्मात्प्रतीयमानस्य तदतिदूरभूतस्य व्यङ्यार्थस्य अभिधया उपस्थिति- विषयकत्वे का चर्चा ? इति प्रभाकरमीमांसकमते वाक्यार्थबोधाय तात्पर्या- ख्यायाः शक्तेः आवश्यकत्वं न विद्यते। तथापि मतेऽस्मिन् सामान्यरूपस्य अन्वितपदार्थस्य अभिधया बोधः भवितुं शक्नुयात्, न चान्वितविशेषस्य इति। अन्वितविशेषो हि व्यङ्यार्थः। अतोऽभिहितान्वयवादे पदार्थानामाकाङ्क्षा- योग्यतासन्निधिवशात् परस्परसंसर्गो यत्र अपदार्थोऽपि विशेषरूपः वाक्यार्थः तत्र का वार्ता व्यङ्यस्य अभिधेयाताम्। अन्विताभिधानवादे तु सामान्यरूपेणा-न्वितपदार्थोपस्थितिरेवाभिधया जायते न च केनचिद्विशेषार्थेनान्वितस्यार्थस्य इति। काव्यप्रकाशे. 5. उ.का.47.69

तद्यथा शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति, श्रोतुश्च प्रतिपन्नत्व- मनुमानेन चेष्टया। अन्यथाऽनुपपत्या तु बोधेच्छक्तिं द्वयात्मिकाम् , अर्थापत्याऽवबोधेत् सम्बन्धं त्रिप्रमाणकम्। का. प्र.पं.उ.2

व्यवहारतः उत्तमवृद्धस्य गामानय इति वाक्यं श्रुत्वा तथा मध्यमवृद्धस्य गवानयनरूपव्यापारं प्रेक्ष्य तत्रोपस्थितः बालः प्रथमतः अखण्डवाक्यस्य अखण्डवाक्यार्थे एव शक्तिं गृह्णाति। पश्चात् गां बधान्, अश्वमानय इति वाक्यं श्रुत्वा आवापोद्वापाभ्यां प्रत्येकं पदार्थस्य बुद्धिं बुद्धौ निर्धारयति। तात्पर्यम्, उत्तमवृद्धस्य वाक्यं श्रुत्वा मध्यमवृद्धस्य आनयनव्यापारान्विता- भिधेयान् बालः चक्षुविषयीकरोति। इत्थं शब्दं श्रवणविषयीकृत्य गवानयन- रूपाभिधेयान् बुद्धिस्थं कृत्वा तत्रोपस्थितः बालः अनुमानप्रमाणेन मध्यमवृद्धस्य चेष्टया अनुमिनोति यत् अयमेतदर्थविषयकज्ञानवान् तद्विषयकचेष्टादि मत्वात्, इदमेव प्रतिपन्नत्वमिति उच्यते। पुनः अर्थापत्या वाच्यवाचकभाव- सम्बन्धं निश्चिनोति यत् गामानयेति वाक्यमाकर्ण्य अस्य वाच्यवाचकभावम् अजायत अर्थात् यदि अयमेतदर्थविषयक ज्ञानवान् न अभविष्यत् तर्हि गवानयने अस्य प्रवृत्तितरपि न अभविष्यत्। अतः प्रत्यक्षेण, अनुमानेन, अर्थापत्या वा प्रमाणैः बालः त्रिप्रमाणकं वाच्यवाचक- भावसम्बद्धं सुनिश्चिनोति । यदि तत्परत्वं तदर्थत्वमुच्यते तदा व्यञ्जनावृत्तिवेद्येऽपि अर्थे तदर्थतानपायात् स्वीकृतमेव। भट्टलोल्लटधनञ्जयधनिकप्रभृतीनां मीमांसकैकदेशिनां मते शब्दश्रवणानन्तरं यावन्तोऽर्थाः प्रतीयन्ते तेषु सर्वेषु वाच्यलक्ष्यव्यङ्यभूतेषु अर्थेषु शब्दस्य तात्पर्याख्यावृत्तिः, तात्पर्याकृष्टाभिधैव वा व्यापारोऽस्ति।

**अतः अभिधयैव व्यङ्यार्थबोधः न व्यक्तिर्नव्यञ्जना इति नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते, सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधा व्यापारः, यत्परः शब्दः स शब्दार्थः, इत्यादयो न्यायाः व्यवह्रयन्ते।**

तत्र रसादिप्रतीतिरपि केनचिन्निमित्तेन साध्या निमित्तान्तरानुपलब्धेः शब्द एव निमित्तम्, निमित्तत्वञ्च वृत्तिं विना शब्देऽसम्भवात् अतोऽभिधैव वृत्तिः तत्र, यदि वा शब्दश्रवणानन्तरं यावानर्थः प्रतीयते तत्र सर्वत्र अभिधैव व्यापारः। एवं वाच्या एव रसादयः। यदर्थे यस्य शब्दस्य तात्पर्यं स तस्यैव शब्दस्य अर्थः, इति रसादिव्यङ्यस्यापि तदर्थबोधविषयकत्वात् तात्पर्यतया अभिधैव अभिष्यते?। यत्तु विषं भक्षय मा चास्य गृहे भुङ्थाः इति विषभक्षणादपि दुष्टमेतद्गृहे भोक्तव्यम्, इति उपात्तस्यैव शब्दस्य अर्थे तात्पर्यं न तु यस्मिन्कस्मिन्नर्थे यस्य कस्य शब्दस्य इति, अदग्धदहनन्यायेन यावदप्राप्तं तावदेव विधेयं यथा दध्ना जुहोति इत्यत्र दधिमात्रं विधेयं हवनस्य अन्यतः सिद्धेः स्वर्गकामो यजेत् आदिविधिवाक्येन अतः दधिमात्रस्य करणत्वं विधेयम्, तात्पर्य्याभिधाना अभिधैव वृत्तिश्चात्र। अतः तात्पर्यमजानन्तो तात्पर्यतया तात्पर्यार्थं प्रतिपादयन्तः तत्र भवन्तः मीमांसकाः रसादिव्यङ्यस्यापि तदर्थत्वं प्रतिपादयामासुः।

एतत्सर्वमभिसन्धाय ध्वनिप्रतिष्ठापकाचार्यैः स्वप्रखरप्रतिभाभिः सूक्ष्मातिसूक्ष्मदृशा विचार्य निरणायि यद्, व्यञ्जनैव व्यङ्यार्थबोधनक्षमा वृत्तिः न तात्पर्यशक्तिर्न वा अभिधा इति। यदि वा तात्पर्यतया अभिधा एव दीर्घ-दीर्घतरव्यापारः वाच्यलक्ष्यव्यङ्ग्यबोधे इषुवत् स्यात्, तर्हि ब्राह्मण ते पुत्रः जातः आदि वाक्येन हर्षादीनां कथन्न वाच्यत्वम् ।

कथं वा श्रुत्यादि प्रमाणस्थले पूर्व-पूर्वापेक्षया पारदौर्बल्यं स्वीकृयते। अतो ध्वनिकृता आचार्यानन्दवर्धनेन उक्तं यत्-
प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥ ध्वन्यालोके 1.4
यथा हि अङ्गनासु लावण्यं चारुत्वहेतुभ्य; विभिन्नेभ्यः अवयवेभ्यः पृथक् प्रतिभाति
तथैव महाकवीनां वाणीषु वाच्यलक्ष्यतात्पर्यव्यतिरिक्तेभ्यः किमपि तत्त्वान्तरं सहृदयहृदयैकगम्यं ध्वनिरूपं प्रतीयमानं वस्तु प्रतिभाति।
यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥ ध्वन्यालोके 1.13
एवं पञ्चात्मकस्य ध्वनेः स्वरूपं यथा- ध्वनति ध्वनयति वा यः स व्यञ्जको शब्दो ध्वनिः, १ ध्वनति ध्वनयति वा यः स व्यञ्जकोऽर्थः २ ध्वनिः, ध्वन्यतेऽनेन इति ध्वनिः. व्यञ्जनाव्यापारः३ ध्वन्यते इति ध्वनिः त्रिविधः व्यङ्यार्थः४ ध्वन्यतेऽस्मिन्निति ध्वनिः काव्यम्। तात्पर्यमपि त्रिविधं यथा -वाक्यशक्तिरूपम् १ शब्दवृत्तिधर्मविशेषरूपम् २ वक्तुः इच्छारूपम् ३ अतो न च तात्पर्याभीष्टा व्यञ्जना न वा ध्वनिः इति। काव्यात्मतया प्रतीयमानत्वात्,।

**डा. मनमोहन तिवारी**
सहयुक्त आचार्यः (संस्कृतविभागः)
प्रो.राजेन्द्र सिंह (रज्जू भय्या) विश्वविद्यालयः प्रयागराजः

*****

Journal of Veda Samskrita Academy, ISSN 2250-1711
Volume XVIII : July to December – 2021

# राजनीतिषु राजगुणदोषाणां महत्वचिन्तनम्

**डा. वेङ्कटरमण हेगडे**
प्राध्यापकः, धर्मशास्त्रविभागः
सर्वकारीय महाराज संस्कृत महापाठशाला, मैसूरु

**भूमिका** :

ब्रह्मणा जगदिदं प्रलयकालानन्तरं प्रकाशितमिति मन्वादिशास्त्रकारैरुप-दिष्टम् । तच्चाण्डजोद्भिजस्वेदज जरायुजात्मकं परस्पराधर्षणहिंसनभक्षणशीलं च वरीवर्ति । तत्रापि सशक्तैकादशेन्द्रियगणयुक्ता मानवा इतरजीवापेक्षया जगत्यस्मिन् प्रबलो वर्तते । तस्माच्च कारणात् स दुर्बलान् इतरजीवान् हिंसति भक्षयति अधर्षयति च । कुत्रचित् जीवनार्थम् आहारर्थं हिंसनं यद्यपि स्वभावसिद्धं तथापि तस्य दुराशोपहितस्य कारणात् सृष्टिरियं बाधिता स्यात् । तदा देवार्थं यज्ञार्थं च सिद्धं हविः काकोऽद्यात्, शुनको वा लिह्यात्, न कस्यचित् कुत्रचित् स्वाम्यं स्यात् । सर्वम् अधरोत्तरं स्यात् । तत्परिहाराय, सर्वेषां जीविनां जीवनानुकूलकल्पनाय काचन नीतिः, दण्डः, दण्डधरश्च प्रजापतिना उपकल्पितः । दण्डाभावे सर्वेऽपि नयेन नश्यन्ति नाशयन्ति च । तस्मात् आचार्यः कौटल्यः “विनयसाधनं दण्डः” इत्युवाद । मनुश्च दण्डप्रशंसां बहुधा कृतवान् । यथा- “सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः । दण्डस्य हि भथात्सर्वं जगद्भोगाय कल्पते ॥ देवदानवगन्धर्वा रक्षांसि पितरोरुगाः । तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीडिताः ॥ दुष्येयुः सर्ववर्णाश्च भिद्येरन् सर्वसेतवः । सर्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात् ॥“ (७/२२-२४) इत्या- दिना । वस्तुतो दण्डो नाम दमः, शिक्षा वा । यदि प्रजाः स्वयमेव परस्परदण्डप्रणयनोद्युक्ताश्चेत् तदा सर्वलोकविनाशः स्यात् । अत एव च दण्डधरो दण्डप्रणेता च कश्चन अवश्यकः । तं च प्रजापतिः सृष्टवान् । स एव राजा । तदुक्तं मनुना यथा- “अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात् । रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभुः ॥“ इति । लोकवादोऽन्योऽपि वर्तते । अस्मिन् लोके मानवानां मध्ये एव यदा संघर्षः समभवत् तदा त एव मिलित्वा तेषामेव रक्षार्थं राजानमकुर्वन् इति । स च परंपरया प्रजाः पालयति स्म । राजा यद्यपि लोकसृष्टो यद्वा ब्रह्मसृष्टः, सः प्रभुत्वशक्त्या युक्त आसीत् । यथोक्तं मनुना- “इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च । चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥ यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः । तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥“ (७/४,५) इत्यादिना । एवं च राजा स्वप्रभावानुसारेण अग्निः वायुः अर्कः सोमो धर्मराट् कुबेरो वरुणो महेन्द्रश्च (इव) भवति । तस्मात् मनुष्य इति बालोऽपि राजा नावमन्तव्यः । स च नररूपेण स्थितो देवः । अग्निः दुरूपसर्पिणमेकमेव दहति, किन्तु राजाग्निः दुरूपसर्पिणः पुत्रदारभ्रात्रादिरूपं कुलमेव दहति । तस्य प्रसादे महती श्रीः, पराक्रमे विजयः, क्रोधे मृत्युश्च वसति । एवं स सर्वतेजोमयः इति । एवं प्रभुत्वशक्तियुक्तत्वात् राजा राष्ट्रस्य कारकः । सप्तांगेषु राजा प्राधान्यं लभते । तस्य कर्ममात्राश्रयेण राष्ट्रं सुस्थं दुस्थं वा भवति । राजा वर्णाश्रमाणां पालको भवेत् । स्वराष्ट्रे चोरसाहसिकादीनां भयात् तथा परराजभयाच्च प्रजा वारयेत् । तदर्थं नित्यमपि न्यायवृत्तः सन् व्यवहारान् संपश्येत् मन्त्रिपुरोहितैः सह मंत्राननुमंत्रयेत्, मंत्रितं च निश्चित्यानु- तिष्ठेत् । तदेतत् सर्वं कर्तुं स्वयं निग्रही गुणोपेतो दोषरहितश्च भवेत् । एवं भूतो राजा लोके यशः प्राप्नोति परत्र च उत्तमां गतिं लभते । यदि राजा लोभात् कामक्रोधवशवर्ती भवति तदा सकुटुम्बपरिवारः प्रणश्यति राष्ट्रं च नाशयति । तस्मात् सप्तांगराज्ये राजा प्राधान्यं भजते । तस्य अयशयशसी दोषगुणाश्रयेण एधेते । अतोऽत्र राज्ञो गुणदोषाणां चिन्तनं यथावसरं क्रियते ।

**राजगुणाः** :

याज्ञवल्क्येन राजगुणाः स्पष्टीकृताः, यथा- "महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः । विनीतः सत्वसंपन्नः कुलीनः सत्यवाक् शुचिः ॥ अदीर्घसूत्रः स्मृतिमानक्षुद्रोऽपरुषस्तथा । धार्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित् ॥ स्वरंध्रगोप्ताऽऽन्वीक्षिक्यां दण्डनीत्यां तथैव च । विनीतस्त्वथ वार्तायां त्रय्यां चैव नराधिपः ॥" (या.स्मृ. अ,१-३०९, ३१०, ३११) इति ।

**महोत्साहः** -

पुरुषार्थसाधनकर्मारम्भाध्यवसाय उत्साहः, महानुत्साहो यस्यासौ, महोत्साहो भवेत् राजा इति विज्ञानेश्वरः । कर्तव्यार्थेषु स्थेयान् प्रयत्न उत्साह इति मल्लिनाथः । एवं साध्यार्थं साधयितुं मानससंकल्पः शारीरप्रयत्नः च उत्साहः । राजा तद्वान् स्यात् । शक्तित्रये उत्साहशक्तिरप्येका । तदाश्रिता उत्साहसिद्धिः । उत्साहाभावे शक्त्यभावः, तदभावे तदाश्रितसिद्ध्यभावः । एवं पुरुषार्थलाभमूलमुत्साहः । तदभावे पुरुषार्थलाभवैकल्यं स्यात् । उत्साहाभावे धर्मकामार्थचिन्तनं दूतसंप्रेषणं कार्यशेषं प्रणिधीनां चेष्टितम्, अंतःपुरप्रचारं, मण्डलप्रचारं पंचवर्गम् अष्टविधं कर्म षड्गुणांश्च चिंतितुमसमर्थः स्यात् । ततो न वर्धते । अतो राजा महोत्साहो भवेत् ।

**स्थूललक्षः** -

बहुदेयार्थदर्शी स्थूललक्षः । राजा तथा भवेदित्यन्वयः । यदि बहवर्थदं कर्म द्रष्टुं प्रभुरसमर्थो भवति तदा स्वराष्ट्रे परचक्रे वा हितम् अहितं वा न गृह्णाति । हिताहितयोरज्ञानेन मित्रभ्रातृव्यादीन् निश्चेतुं न शक्नोति । मित्रारिमध्यमानां निश्चयाभावेन षाड्गुण्यकर्म कर्तुं दुस्सा- ध्यम् । एवं परंपरया स्थूललक्षत्वाभावेन मंत्राभावेन च राज्यलाभो न सिद्ध्यति । लब्धं च न वर्धते न वा रक्षितं भवति । ततश्च राज्यनाशो निश्चितः । अतो राजा स्थूललक्षः स्यात् ।

**कतज्ञः** -

परकृतोपकारापकारौ न विस्मरतीति सः । स्वराष्ट्रे परराष्ट्रे वा उपकारापकारकारिणौ राजा न विस्मरेत् । तयोर्विस्मरणेन मित्रादीनां निर्णयं न लभते । राजनीतिषु अरिमित्रोदासीनानां ज्ञानमतीवावश्यकम् । अत एव याज्ञवल्क्येनोक्तम् - "अरिर्मित्रमुदासीनोऽनंतरस्तत्परः परः । क्रमशो मण्डलं चिन्त्यं सामादिभिरूपक्रमैः ॥" (१/३४५) इत्यादिना अरिमित्रोदासीनाः के, ते कथं ज्ञेया इति । एवं च तेषां ज्ञानं विना मण्डलचिन्तनं न घटते ।

अरिमित्रोदासीनाः त्रिविधाः सहज-कृत्रिम-प्राकृतभेदात् । तत्रारिः को घातव्यः, क उच्छेत्तव्यः, कः पीडनीयः, कः कर्शनीय इति चिंतनीयः । मित्रं च को बृंहणीयः, कश्च कर्शनीय इति चिंतयेत् । ज्ञात्वा च सामादिभिरुपायैः कार्यं साधयेत् । तस्मात् राजा कृतज्ञो भवेत् ।

**वृद्धसेवको विनीतश्च** -

राजा तपोज्ञानादिवृद्धानां सेवको भवेत् । "अस्य नित्यश्च विद्यावृद्धसंयोगो विनयसिद्ध्यर्थं, तन्मूलत्वात् विनयस्य" इत्याचार्यः कौटल्यो वृद्धासेवनकर्मणः फलं विनय इति स्पष्टमुपदिशति । विनयः शिक्षणं शास्त्रसंस्कारो वा इति मंगलाव्याख्यानम् । "पूर्वमहर्भागं हस्त्यश्वरथप्रहरणविद्यासु विनयं गच्छेत्, पश्चिममितिहासश्रवणे । पुराणमितिवृत्तमाख्यायिकोदाहरणं धर्मशास्त्रं चेती- तिहासः । शेषमहोरात्रभागमपूर्वग्रहणं गृहीतपरिचयं च कुर्यात् अगृहीता- नामाभीक्ष्ण्यश्रवणं च । श्रुताद्धि प्रज्ञोपजायते प्रज्ञया योगो योगादात्मवत्तेति विद्या- सामर्थ्यम्" इति कौटल्येन विहितो विद्यावृद्धसंयोगः । विद्यया वृद्धानां संयोगेन तत्सेवया च विद्यां गृहीत्वा संधार्य वर्धयित्वात्मानं विनीतं कुर्यात् राजा,

अभिषेकात्पूर्वमुत्तरत्र च । विनयापादको वृद्धसंयोगः । विनयः कृतकः स्वाभाविकश्च । "शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिविष्टबुद्धिं विद्या विनयति नेतरम्" इति कौटल्य आह । स्वभावत एव शुश्रूषादिगुणयुक्त एव विद्यावृद्धसंयोगेन विनीतो भवति, नेतरः । विनीतो राजा भवितुमर्हति, नेतर इति शास्त्राभिप्रायः । अविनयात् बहवो राजानो नष्टा इति मनुः सोदाहरणं प्रतिपादितवान् । उभयविधविनयाभावात् ते नष्टाः । विनयकारणेन च वनस्था अपि राज्यादीनि प्रतिपेदिरे । यथाह मनुः- "वेनो विनष्टोऽ- विनयान्नहुषश्चैव पार्थिवः । सुदाः पैजवनश्चैव सुमुखो निमिरेव च ॥ पृथुस्तु विनयाद्राज्यं प्राप्तवान्मनुरेव च । कुबेरश्च धनैश्वर्यं ब्राहमण्यं चैव गाधिजः ॥" (७/४१, ४२) इति । अत एव कौटल्याचार्य आह- विद्याविनीतो राजा हि प्रजानां विनये रतः । अनन्यां पृथिवीं भुंक्ते सर्वभूतहिते रतः ॥ (अ-५) । इति । एवं राज्ञः स्वाभाविकः कृत्रिमश्च विनय आवश्यकः, वृद्धसेवा च ।

**सत्त्वसंपन्नः -**

संपदापदोर्हर्षविषादरहितः इति विज्ञानेश्वरः । राजकार्याणि चानेकपुरुष- यत्नसाध्यानि संति । तत्र कदाचित् संपदागच्छति कदाचिदापदपि । तादृशेषु नातिहर्षविषादे गच्छेत् । द्वंद्वमुक्तो वा सहिष्णुर्वा भवेत् । तदर्थं रजस्तमगुणौ अभ्यासेनेंद्रियजयेन च निवार्य सत्वगुणं वर्धयेत् । एवं सत्वगुणसंपन्नः स्यात् ।

**कुलीनः -**

मातृतः पितृतश्चाभिजनवान् एव राजयोग्यो भवति । तच्च शास्त्रो- क्ताष्टविधविवाहेषु क्षत्रियोचित-धर्मविवाहेन तन्मातापितृभ्यां साध्यते ।

**सत्यवाक् -**

सत्यवचनशीलो राजा भवेत् । प्रजासु न्यायव्यवहारेषु च तथा भवेत् न शत्रुषु । षाड्गुण्यमंत्रादीनां गोपनीयत्वात् । प्रजापालनकर्मणि वाक् कर्मणोरैक्यं यथा भवति तथा भवेत् । यद्वदति तदाचरेदित्याशयः ।

**शुचिः -**

बाह्याभ्यंतरशुचिमान् स्यात् । स्नानादिना बाह्यशौचं साधयेत् । अष्टविधस्नानं धर्मशास्त्रोक्तम् । यथायोग्यं तत्साधयित्वा आचमनप्राणा-यामादीन्याचरेत् । संध्यावंदनं च कुर्यात् । "संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु" इत्युक्तत्वात् । तथा ज्ञातिमरणादिषु यथाशास्त्रं वर्तेत । आभ्यंतरशौचं च मनः शौचम् । बाह्यशौचापेक्षयाभ्यंतरशौचस्य प्राधान्य- मुक्तं शास्त्रेषु । तीर्थप्रकाशे मित्रमिश्रेण मनस्तीर्थस्य महत्वं बहुधा उक्तम् । "सत्यशौचं मनःशौचं शौचमिन्द्रियनिग्रहः । सर्वभूतदयाशौचं जलशौचं तु पंचमम् ॥ यस्य सत्यं च शौचं च तस्य स्वर्गो न दुर्लभः ॥ इति गारुडे (११० अ) च मनःशौचफलमपि उक्तम् । सत्वगुणेन तत्सिद्ध्यति मनःशौचम् । एवं राजा बाह्याभ्यन्तरशुचिः स्यात् ।

**अदीर्घसूत्रः -**

कार्याणां कर्मणामारम्भे प्रारब्धानां च कर्मणां समापने यो न विलम्बते सः । राजा तथा स्यात् । राजा स्वकार्याणि प्रजापालनार्थं कुर्वन् सामदानभेददण्डाख्यैश्चतुर्भिरुपायैः षड्गुणविवेकैश्च वर्तेत । तत्र षाड्गुण्य-चिन्तनं मन्त्रः । मन्त्रं च मन्त्रिषु पुरोहितादिभिः संमन्त्र्य अभिप्रेतार्थाननुसंधार्य स्वकीयं निर्णयं कृत्वा तस्यानुष्ठानमाचरेत् । तथा चोक्तं बृहस्पतिना- (१/३९,४०) "तत् प्रजापालनं प्रोक्तं त्रिविधं न्यायवेदिभिः । परचक्रा- च्चौरभयाद्बलिनोऽन्यायवर्तिनः ॥ परानीकस्तेनभयमुपायैः शमयेन् नृपः । बलवत्परिभूतानां प्रत्यहं न्यायदर्शनैः ॥" इति । विष्णुरपि- "अथ राजधर्माः । प्रजापरिपालनम् । स्वयमेव व्यवहारान् पश्येत् । परचक्रोपघातांश्च शस्त्रनित्यतया । परेणाभियुक्तश्च सर्वात्मना स्वं राष्ट्रं गोपायेत् । सम्यग् दण्डप्रणयनं कुर्यात् । (अ-३) इत्यादि उपदिदेश । तानि मन्त्रपूर्वाणि राजकार्याणि अविलम्बेन कार्याणि ।

मन्त्रितार्थानुष्ठानविलम्बे महाननर्थः स्यात् । यथाह माघः शिशुपालवधमहाकाव्ये कृष्णवचनमिव- "मन्त्रो योध इवाधीरः सर्वाङ्गैः संवृतैरपि । चिरं न सहते स्थातुं परेभ्यो भेदशंकया ॥ (२/२९) इति । तथा- "उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता । समो हि शिष्टैराम्नातौ वत्स्र्यंतावामयः स च ॥ (२/१०) इति च । कौटल्यस्तु पंचांगो मन्त्र इत्युक्त्वा त्रिभिश्चतुर्भिर्वा मंत्रयेत्, तानेकैकशः पृच्छेत्, अवाप्तार्थः कालं नातिक्रामयेत्, न दीर्घकालं मंत्रयेत इत्यादिना अदीर्घसूत्रः स्यादिति विवेचयति ।

**स्मृतिमान् -**

अधिगतार्थाविस्मरणं स्मृतिः । तद्वान् स्यात् । तदभावे परा-चरितोपकारापकारविस्मृत्या मित्रशत्रुप्रज्ञाहान्या तत्तदुचितकार्यारंभं विनि-पातप्रतीकारं वा कर्तुमक्षमः स्यात् । ततश्च महाननर्थः स्यात् ।

**अक्षुद्रोऽपरुषः-**

असद्गुणद्वेषी भवेत्, न सद्गुणद्वेषी । परदोषकीर्तनं पारुष्यं, तच्छलो न भवेत् । परदोषाकीर्तनशीलः स्यात् । आभ्यां गुणाभ्यां प्रजापालनकर्म सुकरं स्यात् ।

**धार्मिकः -**

धर्मं चरतीति धार्मिकः । धर्माचरणशीलः स्यात् राजा । तदर्थं पुरोहितमृत्विजश्च वृणुयादिति धर्मशास्त्राणि । स्वयं हव्य-कव्ये निर्वोढुमश-क्यत्वात् तथा कुर्यात् । ते राज्ञो धर्मकार्याणि साधयन्ति । "तस्माद्गा-र्हस्थ्यनैयमिकेषु पुरोहितं दध्यात् । उभयस्य पालनात्, असामर्थ्याच्च" इति (अ-१९) वसिष्ठेनोक्तम् । न केवलं स्वयं धर्माननुतिष्ठेत्, किन्तु चतुरो वर्णान् स्वधर्मे स्थापयेत् । तदुक्तं गौतमेन (११/९,१०)- "वर्णा-श्रमांश्च न्यायतोऽभिरक्षेत् । चलतश्चैतान् स्वधर्मे स्थापयेत् ।" इति । वस्तुतः चतुर्णां वर्णानां स्वे स्वे धर्मे व्यवस्थापनमेव प्रजापालनम् । अत एव कौटल्येनैवमुक्तं स्वधर्मः स्वर्गायानंत्याय च । तस्यातिक्रमे लोकः संकरादुच्छिद्यते । तस्मात् राजा भूतानां स्वधर्मं न व्यभिचारयेत् । स्वधर्मं स्थापयन् इह परत्र च नंदति । व्यवस्थितार्थमर्यादः कृतवर्णाश्रमस्थितिः । त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति ।। इति । तस्माद्राजा धार्मिको भवेत् ।

**प्राज्ञः -**

गम्भीरार्थावधारणक्षमः स्यादिति । राजा गूढपुरुषाणां दूत-अमात्यादीनाम् इङ्गिताकारचेष्टा-जल्पादीनामर्थग्रहणसमर्थः स्यात् ।

**शूरः-**

निर्भयः स्याद्राजा । यद्यपि सामदानभेददण्डाख्येषु चतुर्षूपायेषु दण्ड-स्यांतिमं स्थानं तथापि सामादिना असाध्यमरिं प्रति युद्धमनिवार्यं स्यात् । यदा तत्प्राप्यते तदा न संग्रामान्निवर्तेत । प्रजापालनं संग्रामादनिवर्तनं द्वि- जाग्रशुश्रूषा च राज्ञः श्रेयस्करम् । आहवेषु अपराङ्मुखा मिथो जिघांसन्तो महीक्षितः परैर्हताः स्वर्गं यान्ति । भयादिना पराङ्मुखा नरकं अयशश्च लभन्त इति बृहत्पराशर (अ-९) मनु-याज्ञवल्क्यादिषु धर्मशास्त्रेषु सम्यग् वर्णितम् । अतः शूरः स्यात् ।

**रहस्यवित् स्वरन्ध्रगोप्ता च -**

गोपनीयार्थगोपनचतुरः स्यात् । स्वरन्ध्र- गोप्ता च स्यात् । स्वदोषाणां विषये परो यथा न वेत्ति तथा वर्तेत । तदुक्तमाचार्येण कौटल्येन- "नास्य गुह्यं परे विद्युः छिद्रं विद्यात् परस्य च । गूहेत् कूर्म इवाङ्गानि यत्स्यात् विकृतमात्मनः ॥ (अ-१५) इति । मंत्रांश्च आफलोदयात् रक्षेत् । यथोक्तं याज्ञवल्क्येन- (१/३४४) मंत्रमूलं यतो राज्यं तस्मान्मंत्रं सुरक्षितम् । कुर्याद्यथास्य न विदुः कर्मणामाफलोदयात् ॥ इति ।

**आन्वीक्षिकी त्रयी वार्ता दण्डनीतिषु विनीतः-**

आन्वीक्षिक्यादयश्चतस्रो विद्याः । तासु विनीतः शिक्षितः स्याद्राजा । त्रय्यां धर्माधर्मावुक्तौ । तस्मात्तां विद्यात् । कृषिपाशुपाल्ये वणिज्या च वार्ता । अर्थानर्थौ तस्याम् । धान्यपशुहिरण्यकुप्यविष्टिप्रदानात् औपकारिकी । साङ्ख्यं योगो लोकायतं चेत्यान्वीक्षिकी । हेतुभिर्विद्यानां बलाबलेऽन्वीक्षमाणा आन्वीक्षिकी लोकस्योपकरोति, व्यसनेऽभ्युदये च बुद्धिमवस्थापयति प्रज्ञावाक्य-क्रियावैशारद्यं च करोति । आन्वीक्षिकी त्रयीवार्तानां योगक्षेमसाधनो दण्डः, तस्य नीतिर्दण्डनीतिः । सा अलब्धलाभार्था लब्धपरिरक्षिणी रक्षितवर्धनी वृद्धस्य तीर्थेषु प्रतिपादिनी च । तस्यामायत्ता लोकयात्रा । एवं कौटल्येन धर्मशास्त्रैश्च विद्यानां महत्वमुपकारकत्वं चोपवर्णितम् । त्रयी च प्रजाः स्वे स्वे धर्मे व्यवस्थापयति । तां विना राजा स्वधर्मं न वेत्ति, प्रजा अपि स्वधर्मे स्थापयितुं न शक्नोति । तथा वार्ताऽविज्ञाने करसङ्ग्रहादिज्ञानं न स्यात् । आन्वीक्षिक्यज्ञाने क्रियावैशारद्यं नाधिगच्छति । दण्डनीत्यज्ञाने प्रजापालनाक्षमः स्यात् । अतो राजा विद्यासु विनीतः स्यात् । तत्र तीक्ष्णदण्डो भूतानामुद्वेजनीयः । मृदुदण्डः परिभूयते । यथार्ह दण्डः पूज्यः। कामक्रोधाज्ञानादिना दुष्प्रणीतो दण्डः सर्वानुद्वेजयति । तस्माद् राजा लोभवर्जितः कामक्रोधादीनि परिहापयेत्। तत्परिहानेन दोषानुत्सारयेत् अव्यसनी च स्यात् । अत एव राजगुणेषु अव्यसनो भवेदित्युक्तम्।

**अव्यसनः** -

व्यस्यति श्रेयोमार्गात् इति व्यसनम् । व्यसनरहितो भवेद् राजा । तदिदं मृत्योरपि कष्टतरम् इति मनुः, यथा- "व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते । व्यसन्यधोऽधो व्रजति स्वर्यात्यव्यसनीमृतः ॥" (७/५३) इति । "यद्यपि मृत्युव्यसने द्वे अपीह लोके संज्ञाप्रणाशादिदुःखहेतुतया शास्त्रानुष्ठानविरोधितया च तुल्ये तथापि व्यसनं कष्टतरं, परत्रापि नरकपातहेतुत्वात् इति कुल्लूकः । व्यसनी शास्त्रोक्तधर्मानुष्ठानविरहितो बहून्नरकान्याति । अव्यसनी तु शास्त्रानुष्ठानात् स्वर्गं गच्छतीति भावः । तानि चाष्टादशव्यसनानि वर्जयेदिति मन्वादिशास्त्रम् । अष्टादशव्यसनानि तत्फलानि च मनुना वर्णितानि । यथा- दशकामसमुत्थानि तथाष्टौ क्रोधजानि च । व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत् ॥ (७/४५) । मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः । तौर्यत्रिकं वृथाट्या च कामजो दशको गुणः ॥ (७/४७) । पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् ॥ वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥(७/४८) इति । एवमुक्तेषु अष्टादशव्यसनेषु पानमक्षैक्रीडा स्त्रीभोगो मृगया च कामजगणेऽतिकष्टमावहति । दण्डपात- नवाक्पारुष्यार्थदूषणानि क्रोधजगणे कष्टतमानि । वेननहुषसुदाः पैजवनादयो व्यसनपतिताः श्रूयन्ते । हरिश्चन्द्रयुधिष्ठिरादयोऽक्षक्रीडाव्यसननिमित्तेन कष्टपरंपरामनुबभूवुः । तथा बहवो राजानः पानस्त्रीभोगवाक्पारुष्यादि- व्यसनगणदूषिताः समूलं विनष्टाः । तस्मात् राजाऽव्यसनी स्यात् । पूर्वोक्त- सप्तकवर्गे पूर्वं पूर्वं व्यसनं गुरुतरम् । यथा द्यूतात् पानं कष्टतरं, द्यूते पाक्षिकधनावाप्तिरस्ति, मद्यपानेन मत्तस्य संज्ञाप्रणाशाद्यथेष्टचेष्टया देह-धनादिविरोध इत्यादयो दोषाः । एवं कामजव्यसनदोषाः क्रोधजव्यसन-दोषाश्च राजानं सपरिवारं सराष्ट्रं च नाशयन्ति । इह अकीर्तिकराः परत्र च नरकफलदाः सन्ति दोषाः । तदेतेषां सर्वेषां मूलं लोभः । लोभमूला भोगा- सक्तिरेव व्यसनम् । न केवलं पानादिकं व्यसनम् । तेषामपि शास्त्रेऽनु-ज्ञानात् । अत एव व्यसनानि व्याख्याय कुल्लूकभट्टैरेवमुक्तम्- "एतेनातिप्रसक्तिर्व्यसनेषु निषिध्यते न तु तस्य सेवनमपि" (७/५३, म.स्मृ.)इति । एवं पानादिषु लोभादत्यासक्तिरेव व्यसनपदाभिधेयो दोषः । देषास्ते संख्याताष्टादशकामक्रोधजाः । तयोः कामक्रोधयोर्मूलं लोभ इति विदुषां शास्त्रविदां मतमनुवदति मनुः, यथा- "द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदुः । तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ ॥ (७/४९) इति । लोभ- जयश्चेन्द्रियजयेन साध्यः ।

तस्मात् इन्द्रियाणां चक्षुरादीनां विषयासक्ति- निवारणे नित्यं प्रयतेत राजा । जितेन्द्रिय एव प्रजाः पालयितुमलं भवति । जितेन्द्रियो हि स्वदोषरहितः पूर्वोक्तगुणयुक्तश्च राजा भवति । स एव राजा प्रजा रञ्जयति । सांप्रतकालेऽपि राजस्थानीयानां राजपुरुषाणां पूर्वोक्तदोषराहित्यं गुणयोगश्चात्यन्तमावश्यक इति अस्य लेखनस्य प्रस्तुतता ।

इति शम् ॥

**ग्रन्थर्णम्**

१. मनुस्मृतिः, मन्वर्थमक्तावलीयुता
२. याज्ञवल्क्यस्मृतिः, मिताक्षरासहिता
३. विष्णुस्मृतिः
४. कौटलीयार्थशास्त्रम्, श्रीमंगलाव्याख्यायुतम्
५. तीर्थप्रकाशः, मित्रमिश्रविरचितः
६. गरुडपुराणम् (शब्दकल्पद्रुमः)
७. शिशुपालवधमहाकाव्यम्, मल्लिनाथकृतव्याख्यायुतम्
८. बृहस्पतिस्मृतिः
९. वासिष्ठधर्मशास्त्रम्
१०. गौतमधर्मसूत्रम्

**डा. वेङ्कटरमण हेगडे**
प्राध्यापकः, धर्मशास्त्रविभागः
सर्वकारीय महाराज संस्कृत महापाठशाला
मैसूरु-५७०००४, कर्नाटक
मोबैल् : ९४८०४७६१४४

********

Journal of Veda Samskrita Academy, ISSN 2250-1711
Volume XVIII : July to December – 2021

# Satyavati, Kunti and Draupadi, exhibited the real constituent and paved the way for many female writers with reference to Shobhaa De.

**Dr. Sapna G.S.**
Associate Professor, Head, Department of English
Seshadripuram College,Seshadripuram, Bengaluru

**Abstract -** Archaeologically, Indianfemales had to face many ups and downs in the course of their development. Women are deliberated puppets in the hands of man but women in the Mahabharata not only stand in contradiction to the decisions taken by men but also play a very vital role in many situations. From the Vedic age till today, she faced every circumstance with bravery and dignity. But in our ritual women have always been reflected as the embodiment of 'Shakti.' That's why we can't say that the women in the Mahabharata are completely minor or obedient and don't have their own identity. They executed their obligations and tasks as mother, wife, and daughter according to the customs of society. Their ambition, intelligence, and internal strength made them daring and tough enough to face the tests of life. Women of the Mahabharata were helpless in the hands of the Patriarchal system but they cannot be measured pathetically. Individuality, identity, existence, subordinates and mental strength are the major qualities which are passed to many Indian woman writers. Shobhaa De can be considered one such writer who portrays such above mentioned talents in the writings. Feminism draws to evaluate the depictions of gender roles, which impose social standard, behaviour, associations, laws and prospect on the groundwork of gender nepotism, to the support of comparable mutual, monetary, political civil liberties to woman. Shobhaa De, an illustrious Indian female writer in English, has access to the necessary normal ability to discuss very vulnerable aspects of individual life diplo- matically. English literature in India rest motion to be biased by the feminists. She admits as true in a frank narration of incidents to project urban culture. She has changed the traditional picture of lasting, accepting and generous women with a novel image of daring and progressive urban women. Shobhaa De's narrative *Socialite Evenings* shows the image of a novel lady neighbouring to grasping male dominated culture. In *Socialite Evening*, Karuna is an adaptation of stylish upper-class women who, to situate into rehearsal her self-sufficiency and self-utility hesitates even not to pierce into extra-marital affiliation. To achieve every bit of these, they get fascinated towards the astonishing world and rebel in contradiction of the set norms of the married colleen in the family. To implement their liberation, all her heroines reckless the traditional, edifying plus moral values of the family and society.

**Key words**: - Feminism, patriarchy, self-identity, self-realization, modern woman, exploitation, rebel, liberation,identity, ex-marital relation.

**Introduction :**

The defeat of women is a deepest truth of the past and it is the major grounds for all psychological disorders in evolution. The way the characters of Kunti, Sathyawathi and Draupadi have been depicted, they can serve as role models for today's feminists. Female engraving was measured as a foremost media of modernism and feminist declaration, these maiden writers said that feminism means hitting a conclusion to each and every suffering of female. Feminism has slanted the accuracy of life and creative writing plus forceful consciousness of identity as a woman and interacts in womanly effort. Female's liberation is not only the association, which is sprint by female for female but it is a sort of soul rescue association, which inspires culture to think that maiden are also human beings and think about their struggle, belief and desires. Female writers in India are moving presumptuously with their well-built and certain strides equivalent to the swiftness of the globe. We see them convulsive out in full bloom spreading their

individual fragrances. The feminist philosophy began to sway the English literature in India. They are documented for their originality and versatility with the aboriginal savour of the soil that they transport to their work.

**Emotional insight and existential concerns :**

Indian fiction in English has travelled an extended line of attack to attain its current splendour and greatness plus at current integer of female writers through their writings examine the world of matron. Her chief involvement consists of their exploring the moral effectiveness of women characters and their fight with aggravation in creating their own individuality. She writes about the superior class society in India. She explored the lives of bored homemakers and their loveless well-off spouse and family. Her paperback reflects the lifestyles of the privileged plus the bourgeois of the municipal world. She has dealt amid issues related to females. Among these female writers Shobhaa De has grossed a separate liberty for her scrupulous detective work towards emotional insight and existential concerns, towards women. She has become the representation of prominence diverse perspectives of women's freedom and liberation, the way she relates each and every aspect of human association in all-purpose and man-woman relationship precisely is excellent. To project urban culture, she has changed the traditional picture of durable, acquiescent and selfless women with a new picture of courageous and liberated urban women. She is well-known for audacious and frank style of writing.

**Uniqueness of Women in Shobhaa De's Novels**

The Mahabharata shows a variety of traits of and attitudes towards women. These women were ahead of their time and were brave enough to put forth their voices against the male dominating society. Some women characters in the Mahabharata are frank and bold in their demand of sexual happiness which has been a taboo in Indian tradition. These characters teach us the greatest lessons of life of how to be outspoken, courageous, faithful and devoted. Shobhaa De's novels typify the innovative Indian female's tone of voice. 'New woman' desires to travel around self-uniqueness, tries to find liberty in all segment of her continuation plus re-establishes the traditionalist protest of females. The need for females to seek their sovereignty is the message in her novels. Indian women have been under direct control since times. Poles-apart aspects were answerable for female restraint; they can be pigeonholed as collective informative, unadventurous etc. In Indian patriarchal civilization, Indian females have always been trained ever since her untimely existence that they have to go after her husband. They were beneath the pressure of man.

Ascend of feminism; there emerged the innovative matron, who is entirely different from her traditional foil. These new females are aware, convinced and sometimes even antagonistic. Her parents tendered her no substitute to assume about her own individuality. In Indian culture, the nativity of a girl child never receives a convivial retribution nor from the parents nor from the community. Thus, the voyage of such female turns out to be a container revise of feminism, all province of her enlargement; communal, supporting women's identity in Shobhaa De's novels with mention to *Socialite Evenings* and emotional leftovers the centre of investigate. To get hold of an inventive identity she is seen dealing with the world around her own terms. Current female is ambitious for the motivation that she realises that it is her financial reliance which approves a masculine to command his spouse and spotlight her to corporeal and self- induced soreness. She has become thoughtful of her intent, that is to release herself from the command of undeserved taboos and customs obligatory on her by the male-dominated society, becoming aware of her own rights, she has started a brawl, of course, the fight is not going to be simple and petite lived since it is against the human elements like self-esteem, voracity, aspiration and self-centredness. Shobhaa De deems in a unpleasantly sincere narration of incidents and unwrap heartedness. Her novels fragment male-controlled pre-eminence. De demonstrates a vital shift in the position of her women who are self-sufficient. So far, the women are looked at as man's opportunity and they have also accepted it without remonstration. But the contemporary female has realized the unfair nature of such an approach and therefore they have started thinking on different lines. On the other hand, they have obligatory strength to face life with all its ups and downs. It is in this admiration, Shobhaa De alters meaningfully starting other Indian female novelists in English, she represents a variety of women from the dominated, conventional

and condemnable to the extremely breathing and open-minded female.They do not depend for their survival on their fathers, husbands or sons. Nothing is held in reserve in her fiction. Female should be an independent moral fibre and entity by being aware of the choices open to her. They are self-confident, sensible and secure like all the epic characters. Shobhaa De projects the info of cleansing females through self-realization and the expedition for self-identity.

Shobhaa De considers that the females have to be observant of her own identity as a human being and should reflect for themselves.

**Women's distinctiveness in *Socialite Evenings* :**

*Socialite Evenings,* the first novel of Shobhaa De is about the journey of an outstanding Bombay socialite Karuna, from a middle group young woman to a self- sufficient woman. The novel presents the bodies of relations and weddings existing in the wealthy class of Indian society. A lasting theme in the novel is the search for identity and selfhood. Karuna was born in a dusty clinic in Satara, a remote village in Maharashtra and does not remember much of her childhood except the strict attentiveness of her father. Her mother, who was apprehensive with domestic chores, does not dedicate much time to 'know' her daughter. Karuna the protagonist of *Socialite Evenings* is the perfect example of the melancholy of women in India, Karuna's existence starts only when they travel to Bombay as of her father's official transmit. She meets with Anjali, a high-flying socialite and the wife of a prosperous playboy. Karuna's atmosphere transforms, Karuna starts dreaming of a livelihood in films and holidays abroad. When she enters college and gets wedded to Bunty, a well-heeled big business male, the family unit recognises him for the reason that of his social eminence. This decrease of female to matter or a commodity is in the main a phallocentric pattern. But he is not the precise 'husband material' ascertained Karuna. Woman is thus condensed to matter for a mere purpose. Karuna's significant other tends her as substance, a measly entity subjected to his own determination. He was just a run of the mill Indian husband-unexciting, lacklustre, intuitive, wasn't gazing for any stimulation either rationally or emotionally, she gets bored with her spouse who does not pay attention to her interests, tries to down her blues in reading books and crossword puzzles her husband takes care of her as a measly object focus to his wills as a result there is a complete defeat of her character. She proposes to form her own bona fide arrival which gives her a sense of freedom. She gets equipped to live her life on her own stipulations by repudiating the idea of getting married twice over. She revolts against her insensible husband and at last divorces him.

As a self-realized person, she comes to know that extra marital affair proves to be a refuge in the desolate tract. It is clear that Karuna has just an official connection with her husband. Intimacy between the spouse and wife is lacking for Karuna who by no means calls her spouse by his forename but derogatorily as 'Black label'. Karuna suffers due to the cold-hearted and non-responsive attitude of her husband. Because of her disgusting and unproductive occurrence, she accepts singlehood status as a pronouncement of herself: "I still resisted them. I presume my real affect were dissimilar. It does not fetch any contentment to woman in addition to she refuses the offers of Girish and Ranbir, since she does not want to mislay her personality. It wasn't wealth or success I was looking familiar to in my life at that point it was the autonomy to do what I wanted." As a self-realized individual, Karuna plump for singlehood as a way of life. Yet again when her husband tries to square with her, she understands his disloyalty and dishonesty consequently rejects him. In the process of initiating her identity, she unearths her husband and elevates up journalism as her profession. Karuna is the modern new-fangled colleen, who is self-regulating in every technique. Karuna occupies herself full of action with write ups of her reminiscences. She shatters away of the secure of weddings in addition to lands her fact definite into the profession of her preference that is modelling. She becomes an Aristocratic to concrete her profession in media. She pilots her plant in all phase with her trinkets, acumen and bravado. Karuna is initiated into the life of a replica by her adviser Anjali. Karuna had a women's identity in Shobhaa De's novels with reference to *Socialite Evenings,* who always yearned to be a part of the elegant and good-looking set. She accomplishes superior status through

her writings and smugness in her endeavour. Anjali and Ritu are too accessible as unconventional plus unbound new-fangled females. Right the way through the novel, Karuna figures out as a female who stresses her womanly mind from side-to-side complaint and disobedience.

All the women in the novel are eye-catching, self-possessed and cognisant of their seats and are rational enough to hide their unresponsive aspect. Modelling assists her to produce a personality for herself. Similarly, Anjali, a youthful socialite undergoes an enormous treaty ever since her incompatible wedding and her husband's cruel stance.

As a writer of woman-centred literature, De has exerted for the complete deliverance of women and is a free thinker. She projects the ideas of healing women through self-realization and has opposed the orthodox role of female and dominates her male counterparts. In fields such as domestic, communal, sexual and commerce, De's females' rebel alongside the traditional icon of Indian female. Here, Shobhaa De's attack is not aligned with the individuals, it is adjacent to the structure that favours men and causes women's oppression and marginalization.

**Conclusion :**

Being a woman, De a writer par excellence, is paying more consciousness to the difficulties of women who appear alive on celluloid in several outstanding writings, written to perfection. She currents the important realism plus makes us aware of the misery of women and prejudice done to them by their reverse parts in the patriarchal humanity. The call for is to seek their self-identity is the implication in her novels. All her novels are the objection narrative united with the male-dominated Indian way of life where females are disadvantaged of the freedom of expression and exploitation. Satyavati, Kunti and Draupadi demonstrated themselves emotionally, mentally and physically strong to deal with every situation and they were prosperous in changing the stereotyped image of a woman, however, they could not surpass the barriers laid by patriarchal society. Their uniqueness and faith in their power helped them to take better decisions. The control over their feelings and emotions made them wilful women of the epic. They were skilled enough to control the situations that were against them and turned them in their favour. Thus, like all the three women of Mahabharatha- Satyavati, Kunti and Draupadi, exhibit the actual element and boldness in their character, Shobhaa De has also streamlined her writings in the same manner.

**REFERENCES**

C.L.Khatri and Sandhya Saxena "Five Indian Women Novelists-Feminist vision" Yking books, Jaipur India, 2013 PP 179- 211

De, Shobhaa "Socialite Evenings" Penguin Books (1989) 2013

http://shodhganga.inflibnet.ac.in/bitstream/10603/3839/11/11 _chapter%204.pdf

http://www.bodhijournals.com/pdf/V1N3/Bodhi_V1N3_010. Pdf

http://www.languageinindia.com/jan2015/ponezhilshobhaade2 .pdf

Jayanti Ghosh, Satyavati: The Matriarch of the Mahabharata, in Faces of the Feminine in Ancient, Medival and Modern India, 33(Mandrakanta Bose, ed.2000)

Rao, Alapati Purnachandra " Urban Women in Shobhaa De's Fiction" Prestige Books International, New Delhi, 2013

Shri Vyasa, Shrimat Bhagavat Mahapuranam (Gorakhpur: Geeta Press, 1980) 1963.

**Dr. Sapna G.S.**
Associate Professor,
Head, Department of English
Seshadripuram College,
Seshadripuram
Bengaluru 560003.
Mobile no. 9964948493
Email id- gshsapna@gmail.com

********

Journal of Veda Samskrita Academy, ISS N 2250-1711
Volume XVIII : July to December – 2021

# The relevance of Ancient wisdom in Sanskrit literature to Modern Science and Management

**Dr. Rama Rao .S**
H.O.D. of Sanskrit,
Seshadripuram First Grade College,
Yelahanka New Town, Bengaluru

**Abstract :**
In this paper, a sincere attempt has been made to explore the importance, greatness and usefulness of the most scientific language Samskritam. There are thousands of literary works on various topics that were discussed in depth by many great authors of ancient India. Vedas, puranas, epics and many other literary works were written more than 5000 years ago in Sanskrit language. However in this paper the author will explore the scientific and management aspects from a few books. One of the largest books in the world, the 'Mahabharata' tells the story of a country's culture and two families tearing itself apart. In ancient India it was said that nothing exists which is not within its pages – Another important book is Kautilya'sArthashastra in which the economics, politics and management science discussed thoroughly and authoritatively which is a matchless literary work for ever.
**Key Words:** Ancient Indian Sanskrit literature Modern Science and Management,Mahabharata, Arthasastra

**INTRODUCTION :**

**Vidya Shastram cha Shastram cha dwevidye pratipattaye.**
**Aadyahasyayavriddhatavedviteeyaadriyate Sada**

We have two useful and important vidyas (knowledge) 'Shastra Vidya', the knowledge of weapons and shaastra vidya knowledge of science (philosophy etc.) The most ancient and scientific culture available in this world is 'BharatieyaSanatanaSamskrti' which is Anadinitya (imperi- shable).

The wealth of Indian knowledge of science (Bharatieyasha- astrasamptath) is very vast and most ancient in the world literature .The vast range of the literature originating from the vedictime ,the chronical as well as the secular literature of the Buddhist and Jains.

The scientific and technical writing's both primary and secondary have formed the main basis of discussions of the various sciences, and as such those have been treated, along with their scientific and technical contents, in the respective chapters vedas, puranas, epics, tarkas (anveekshiki) vyakarna (grammer), mimamsa,Vedanta (theologies) etc…works which are most valuminous and fantastic literary gems constructed by revered brahmarshis, maharshis, acharyas and seers. They fulfil the aihika (Materialistic) and adhyatmika (spiritual) literature. The vast range of the literature originating from the vedictime, the chronical as well as the secular literature of the Buddhist and Jains.

Fortunately these literary works were constructed in thisholy language. Vedavyasa, Valmiki, Narada, Lord Parashurama, Yajnyavalkya, shukra, Bruhaspati, Charaka, sushruta, Aryabhata, Bhaskara, Varahamehira, Shankara, Ramunaja, Ananda teertha, Chanakya, Kaanada, Panini etc. adopted and utilized language samskrtam to expose and enrich their deep knowledge and stood permanently in the minds of all human beings in the world. Now also many modern writers constructed a number of prose, poetry, dramas etc. works depending on those that matchllessancientliterature.

**The Rigveda** : the most ancient and important collection comprising 1,028 and 10,462 v, cas distributed over 10 mandals or books .

**The Samaveda**: This is an asthology of Rgveda. The sammita has come down to us in three recensions or schools such as Kauthumas the Kanayaniyas and the Jaiminiyas or Talavakaras. It is a collection of both songs and verses. The majority of the verses are borrowed from the Rgveda although there are often

marked variation of a linguistic character or those due to exigences of musical adaptations.

**The Yajurveda**: as a compendium of scientific formulas , the samhita of the Yajurveda came to be developed in a large number of schools of Adhvaryu priests and recensions. All although Patanjali in the introduction of his mahabhashya, mentions 100 schools of the veda of Adhvarus.

**The Atharvaveda** : This comprises 731 hymns and about 6000 verses grouped under 20 books of which the 18th from the Atharvaveda proper and last two supplementary additions of comparatively recent date .It is borrowing by the Rgveda are considerable as much as 1\7 deriving without variation from the rcas , belonging to books X, I and VIII. but quite a number of the verses are original and bear marks great antiquity.

**The Brahmanas** : The second great diculions of the vedic literature have been styled by Winternitz as the 'science of sacrifice'. In the introduction to the sathapathapbrhmana the necessity of dividing sacrificial duties among different classes of priests namely the Hotara the Udgatara the Adhvaryu and the Brahmana.

**4 ) Atharva veda :** If the Brahmans , In the course of their theological disputations, sought through a great deal of light of the earliest metaphysical and linguistic speculations and indulged in many mythological fabrications around the substance of hymns and verses of the respected samhithas , they did not fail to do so with respect to matters scientific. In this way many astronomical , pathological and animal life assume a clear perspective through Brahmanic inter- pretations.

**The Aranyakas- Upanishads** : The third division of the vedic literature comprises the Aranyakas ( forest text ) and the fourth division the Upanishads ( Secret doctrines ) which arose out of the samhithas and Brahmanas of the different Vedic schools. The Aitareya – Aryanka which includes the Aitareya Upanishad is the part of the Aitareya brahmana like the Kausitaki. Aranyaka – Upanishad represents the concluding portion of the Kausithaki brahmana. The panca- vimsabhramanaends in the chandogya Upanishad of which the first section is an Aranyaka. The janiminiya and the kena Upanishads belong to the Jaiminiya or Talavakara schools of the samaveda. The upanishads of krishnaYajurveda schools include the taittiriyaaryanka Upanishad a continuation of the Brahmana bearing the same name and the Mahanarayana. The Katha or Kathaka, The Swetasvatara, The Maitrayaniupanishad. The greatest and the most important of all upanishads is the Brahadaranyaka which belongs to the Satapatha Brahmana of the Shukla Yajurveda . The Isa – Upanishad forming the lost section of the Vajasaneyisamhita is short but valuable. The Mundaka and the Prashnaupanishads are the offshoots of the Atharvaveda . There are about 238 upanishads attributed to one or the other of the vedic schools, most of them having no connection with the veda, are a kin to the puranas and the Tantras and belong to a much later date. Of these severalnon Vedicupanishads mention may be made of the Subelaupanishads and Garbha Upanishads. The former deals with the metaphysics, cosmology, physiology and other matters, Where as the later, as the title implies is an embryological text having same importance in the history of the medicine. Written in the form of dialogs often reminding us as Plato, theupanishads are primarily important as repositories of the physical concepts, concepting the both organic and inorganic world. A short distinction is made between the two worlds, organic bodies such as *god, man, animals and plants* are in essence of atman itself and are regarded as wandering souls. In organic bodies called mahabhutani although controlled by Brahman, are not wandering souls,but only the stage, the material substratum enabling the souls to play their past embedded in this concept of mahabtutani is the idea of five elements whose gradual evolution from water as the only primordial element into the *earth,water ,fire and the ether* as the fine mahabhutani is the trouble in the upanisha

**The vedangas, the sutras and the origin of Sanskrit scientific literature:**

The vedangasare the another important group of literature which deal separately with the six branches of knowledge Viz shiksha (phonetics) kalpa (ritual) vyakarana (grammar) nirukta (etimology) chandah (metrics), jothishya ( astrology). This branch of study arose within the vedic school themselves as a necessary condition for mastering the Vedas. Being works of

human specialists, these are called vedangs or auxiliary science of veda.

**The sutra style:**

The authors of vedangas adopted in general the sutras in the highly condensed aphorist style intended to sumup only the pith of the learning in the short sentence, generally using nouns often compounded at great length and avoiding the use of the verbs as for as possible. The main purpose was to facilitate easy memorization of a waste body ritualistic and other material. The style became so dominant feature that this was adopted without question by the various philosophical schools. The grammarians, the phoneticians and specialists on metrics and the writers of Arthasastea, the Kamashastra, the Natya shastra and so on. Of the various vedangas mentioned, use may leave aside the phonetics that are largely concerned with the rules of pronunciation. But others contain matters of scientific importance.

**The Kalpa sutra:**

The kalpa sutras are available in four different classes viz-the Srauta , The Grhya, The Dharma and the Shluba. As the materials of the samhitas and the Brahmans constitute the basis of the sutras, passages in them form scientific Import, have received fresh treatment and sometimes further elaboration at the hands of the sutrakaras. Such is particularly case regard to the vedic calendar which have received lengthy treatment in the latyanasrauta sutra, nidana sutra of the samaveda. The Fourth class of kalpa sutras, the sulba sutra are often attached to a srauta sutra and the important of the oldest Indian geometry, irrational numbers and other mathematical topics.

**Grammar , Lexicography and matrics:**

The pratisakhyas which are works on phonetics attached to the different vedas bear testimony to the beginnings of the grammatical studies in India. Although long live of grammatical must have existed before Panini's Ashtadhyayi, possibly rendered obsolute the efforts of his predecessor writen in 4000 short sutras, the work deals with technical terms, nouns in compostation and caserelation, rules or adding suffix to the roots and so on, always from the point of view of the language and using it correctly in composition. The most important and exhaustive lexicographic work that we now possess is The Nama-linganushasana of the Amarasimha better known as Amarakosha.

**JYOTHISHA**:

As a vedganga the science of Astronomy is available in the accession of the
Rig Veda and Yajurveda but containing the same materials. As in the astronomical text, this will receive further treatment in the chapter on Astronomi. The astronomical elements though the portion of the equinoxes that can be deduced from the clear statement belongs to the period of samhitas and Brahmanas. The ancient Sanskrit literature is a treasure house of scientific topics and discussions there on They are of perennial relevance and valuable for all time. Dealing with all these themes and topics is indeed a daunting challenge and includes the risk of taking the present paper to a great length.

Hence I proceed to the next topic namely the concept of management in ancient Sanskrit literature.In the ancient India during the period of Chandragupta Maurya in the 4$^{th}$ century B.C. several management ideas and practices were found which was based on the KautilyasArthasastra.

KautilyasArthasastra is an Indian treatise in management and was written by Kautilya also known as Chanakya and Vishnugupta. He was the minister and adviser to Chandragupta Maurya. He was previously the professor of politics and economics at Takshashila university. The arthasastra deals with the principles of economics, administration and Nitishastra popularly called Chanakya Neeti or principles of political ethics were two of the important works of Kautilya. Kautilyas Arthasastra was written in Sanskrt and contains 150 chapters, which are classified by topic in 15 books, which covers three parts, namely national security issues, administration of justice and economic development policies. Several lessons in management can be explored from Kautilyas arthashastra. In his arthashastra, Kautilya maintained that a king or leader or CEO should have no self interest, happiness and joy for himself, his satisfaction lies in the welfare of his people, i.e. he has to submerge his personality into the larger personality of his people.

This is based on the cultural ethos of self-abKautilya states in the happiness of his subject lies the happiness of the king; and in their welfare lies his welfare, he shall not consider as good only that which pleases him but treat as beneficial to him, whatever pleases his subjects."Bahujanasukhaya Bahaujanahitaya cha" – The welfare of the many and the happiness of the many. Infact, this concept of the happiness of the many need integrated into the area of corporate management as the basic principle.

